ISSN : 7552277-906X

# श्रीवैष्णवी

## वार्षिकी शोधपत्रिका

राष्ट्रियसंस्कृतसंस्थानम्

( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्यां प्रत्यायितः समविश्वविद्यालयः )

श्रीरणवीरपरिसरः, कोट-भलवाल, जम्मूः - 181122 ( जम्मू एवं काश्मीर )

ई मेल : ranbirjmu@gmail.com वेबसाईट : www.rsksjmu.ac.in

2017

# श्रीवैष्णवी

## ( वार्षिकी शोधपत्रिका )


संरक्षकः
**प्रो. परमेश्वरनारायणशास्त्री**
कुलपतिः

प्रधानसम्पादकः
**प्रो. बच्चाभारती**
प्राचार्यः (प्र.)

सम्पादकाः
**डॉ. दयानिधिशर्मा**
सहायक-प्रोफेसर

**डॉ. दे. दयानाथः**
सहायक-प्रोफेसर

**डॉ. जि. राजशेखररेड्डी**
सहायक-प्रोफेसर



**राष्ट्रियसंस्कृतसंस्थानम्**
( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्यां प्रत्यायितः समविश्वविद्यालयः )
**श्रीरणवीरपरिसरः, कोट-भलवाल, जम्मूः - 181122**

प्रकाशक:
प्राचार्य:
**राष्ट्रियसंस्कृतसंस्थानम्**
(समविश्वविद्यालय:)
श्रीरणवीरपरिसर:, कोट-भलवाल, जम्मू:-181122 (जम्मू एवं काश्मीर)
दूरभाष: 0191-2623090
ई मेल : ranbirjmu@gmail.com
वेबसाइट : www.rsksjmu.ac.in

---

**परामर्शदात्रीसमितिः**

| | |
|---|---|
| प्रो. हरिनारायणतिवारी | डॉ. प्रभातकुमारमहापात्र: |
| प्रो. जगदीशराजशर्मा | श्री शरच्चन्द्रशर्मा |
| डॉ. सतीशकुमारकपूर: | डॉ. कृष्णमुरारीमणित्रिपाठी |

---

© सर्वाधिकार: जम्मूस्थराष्ट्रियसंस्कृतसंस्थानस्य
श्रीरणवीरपरिसराधीन:

प्रकाशनवर्षम् 2017

प्रथमसंस्करणम् : 500 प्रतय:

ISSN : 7552277-906X

मूल्यम् : ₹ 125.00

मुद्रक:
**डी.वी. प्रिंटर्स**
97-यू.बी., जवाहर नगर, दिल्ली-110007
मो.: 9818279798, 9990279798

**प्रो. पी.एन्. शास्त्री**
कुलपति
**राष्ट्रिय संस्कृत संस्थान**
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
**('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)**

**Prof. P.N. Shastry**
Vice-Chancellor
**RASHTRIYA SANSKRIT SANSTHAN**
Deemed to be University
(Under MHRD, Govt. of India)
**(Accredited by NAAC with 'A' Grade)**

**RSkS/VC/Msg/2016-17/**244 **Date 22.03.2017**



# शुभाशंसनम्

संस्कृतभाषायां किमपि तादृशं वैचित्र्यं वैशिष्ट्यं च दृश्यते यत् अक्षुण्णरूपेण प्रवहमाना ज्ञानसरित् अनादिकालादद्यावधि नित्यं परिपुष्टा चकास्ति । विश्वज्ञानकोशस्य अमूल्याः निधयः वेद-रामायण-पुराण-भारत-स्मृतिप्रभृतयो ग्रन्थाः अस्यामेव भाषायां विरचिताः वर्तन्ते। हिंसातङ्कमारणादिभिः ऐहिकदुःखभारैर्भरितस्य वर्तमानमानवस्य त्रिविधदुःखविघाताय एतेष्वार्षग्रन्थेषु निहितस्य ज्ञानसन्दोहस्य समुद्घाटनाय संस्कृतसेवकाः तत्पराः भवेयुरिति वर्तमानसमयस्य अपेक्षा अस्ति।

राष्ट्रियसंस्कृतसंस्थानस्यायं श्रीरणवीरपरिसरः वर्तमानसमयस्य आवश्यकतां निभाल्य काले काले शोधाध्ययनमाध्यमेन तान् तान् एव ज्ञानविज्ञानव्यूहान् प्रकाशयितुं बद्धपरिकरः दृश्यते। अस्मिन्नेव उपक्रमे **'श्रीवैष्णवी'** नाम्नी शोधपत्रिका विविधभाषासु सुबद्धान् निबन्धान् संदधाना ज्ञानप्रकाशोद्घाटनाय सहायिका भविष्यतीति विश्वसिमः। महतः अस्य कार्यस्य सिद्ध्यर्थं सर्वेभ्यो शुभं भवतु।

प. ना. शास्त्री

**(परमेश्वरनारायणशास्त्री)**
**कुलपतिः**

**प्रो. एस्. सुब्रह्मण्य शर्मा**
कुलसचिव (प्र.)
**राष्ट्रिय संस्कृत संस्थान**
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
**('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)**

**Prof. S. Subrahmanya Sarma**
Registrar (I/c)
**RASHTRIYA SANSKRIT SANSTHAN**
Deemed to be University
(Under MHRD, Govt. of India)
**(Accredited by NAAC with 'A' Grade)**



## मङ्गलवचांसि

ज्ञानं हि मनुष्यं पशुभ्यः पृथक् करोति। अतः ज्ञानं मानवस्य चरमं लक्ष्यं विद्यते। प्राचीनम् अर्वाचीनं लौकिकम् अलौकिकञ्च ज्ञानस्य स्रोतांसि वर्तन्ते। एतस्य ज्ञानस्य प्रवाहस्तु भाषामाध्यमेन विषयमाध्यमेन च दृश्यते। भाषया एव विचाराणां प्रकाशनं कर्तुं शक्नुमः। अनेन विद्योपासकाः लाभान्विताः भवन्ति। भाषायां रचिताः निबन्धाः बहुकालपर्यन्तं समाजं प्रेरयन्ति। नानाशास्त्राणां विमर्शस्य प्रकाशनमपि ग्रन्थमाध्यमेन कर्तुं शक्नुमः। राष्ट्रियसंस्कृतसंस्थानस्य श्रीरणवीरपरिसरस्य वार्षिकी शोधपत्रिका 'श्रीवैष्णवी' अन्यतमा वर्तते। एतस्यां पत्रिकायां विद्यमानाः विदुषां छात्राणां च सारपूर्णलेखाः विबुधमनस्तोषकाः भवेयुः इति आशास्महे।

अस्मिन् क्रमे परिसरप्राचार्येभ्यः सम्पादकेभ्यः, विद्वद्भ्यः, छात्रेभ्यश्च साधुवादान् व्याहरामः।

21/03/2017

**(प्रो. एस्. सुब्रह्मण्य शर्मा)**

56-57, Institutional Area, Janakpuri, New Delhi-110058 Ph.: (O) 28520979 (Fax) 28520976
EPABX : 28524993, 28521994, 28524995 E.Mail : sanskrit.registrar@gmail.com / ps2reg.sansthan@gmail.com

**राष्ट्रिय संस्कृत संस्थानम्**
(मानित विश्वविद्यालय) श्री रणवीर परिसर,
कोट-भलवाल, जम्मू-181122
(मानव संसाधन विकास मंत्रालय, भारत सर्वकाराधीन)

**Rashtriya Sanskrit Sansthan**
(Deemed University) Shri Ranbir Campus,
Kot-Bhalwal, Jammu-181122
(Under Ministry of H.R.D. Govt. of India)

**Accredited by NAAC with 'A' Grade**

क्रमांक__________ दिनांक__________



## प्रस्ताव

भारतीय ज्ञान दृष्टि की शुचिता और शङ्ख सदृश धवलता अनुपम हैं। प्राचीन परम्परा का निर्वहन और साम्प्रतिक परिप्रेक्ष्यों में परस्पर सामञ्जस्य का उपागम भारतीयता का परिचायक है। विविध वेद उपनिषद और शास्त्र विद्या की प्रवाहशीलता के स्वर की अनुगूँज हमारे जीवन में ऊर्जा का सञ्चार करे। जीवन में समदर्शी विचारों को प्रश्रय मिले। लोकमंगल की साधना की विस्तृति का अनुभव हो। अध्ययन-अध्यापान की परम्परा की निरन्तरता सार्वकालिक रूप में स्तुत्य और श्लाघनीय हो। इन्हीं ध्येय वाक्यों की आंशिक पूर्ति के निनाद के स्वर इस परिसरीय वार्षिक शोधपत्रिका 'श्रीवैष्णवी' में सुनाई पडते हैं जो मूलतः परम पूज्य प्रातःस्मरणीय भारतीय एवं पाश्चात्य विद्या निष्णात ऋषि तुल्य विद्वत्प्रवर पूर्व प्राचार्य प्रो. रामानुज देवनाथन् के अनुपम प्रयत्नों का प्रतिफल है।

दिनांक: 16.03.2016
स्थान: जम्मू

**(प्रो. बच्चा भारती)**
**प्राचार्य (प्र.)**

तारः संस्थानम् Resi : 2439669, GRAM : Sansthanam (O) Tele : 0191-2623090, 2623533, Fax : 0191-2623090, e-mail:-ranbirjmu@gmail.com



**प्रो. बच्चाभारती**
प्राचार्य (प्र.)



**डॉ. दयानिधिशर्मा**
सहायक-प्रोफेसर



**डॉ. दे. दयानाथः**
सहायक-प्रोफेसर



**डॉ. जि. राजशेखररेड्डी**
सहायक-प्रोफेसर

# सम्पादकीयम्

'ज्ञानं तृतीयं मनुजस्य नेत्रम्' इति अस्मिन् जगति प्रसिद्धमस्ति। ज्ञानी एव जगतः व्यवहारं सम्यक्तया जानाति। **"तस्मात् ज्ञानी भवार्जुन"** इति गीतोक्तवचनं तु सर्वदा अस्माभिः स्मर्यते। यथोक्तम्–**"ज्ञानवान्मानवः प्रोक्तो ज्ञानहीनः पशुः स्मृतः"** ज्ञानस्य प्रकाशनाय माध्यमरूपेण भाषायाः योगदानम् अपेक्षते। भाषया एव विचारविनिमयः भवति। चतुर्विधभाषाकौशलानां प्रयोगद्वारा विविधविषयाणां ज्ञानमर्जयितुं वयं समर्थाः इति अनुभवामः। लेखनकौशलं विचाराभिव्यक्तेः प्रमुखं सोपानं विद्यते। नानाशास्त्राणां संरक्षणाय लिखितांशानां ग्रन्थानां वा बहु महत्त्वम् अङ्गीक्रियते। यदि विविधविद्यानां विवरणमपि लिखितभाषायां प्राप्यते, तर्हि सर्वेषां जनानाम् उपयोगाय कल्पते। राष्ट्रिय-संस्कृतसंस्थानस्य श्रीरणवीरपरिसरे 'श्रीवैष्णवी' इत्यस्याः वार्षिकशोधपत्रिकायाः प्रकाशनं प्रतिवर्षं क्रियते। अस्मिन् वर्षेऽपि एतस्याः प्रकाशनम् आचार्याणां प्राध्यापकानां शोधार्थिनां छात्राणां च लेखैः सम्पाद्यते। अत्र प्रस्तुताः लेखाः संस्कृत-हिन्दी-आंग्ल-डोगरी भाषासु निबद्धाः सन्ति। अस्याः पत्रिकायाः प्रेरकाः प्रातःस्मरणीयाः पूज्यगुरुचरणाः पूर्वप्राचार्याः आचार्याः प्रो. रामानुजदेवनाथवर्याः वर्तन्ते। तेषाम् अनुकम्पया पत्रिकेयं सर्वेषाम् उपकाराय प्रकाश्यते इति। ज्ञानस्य क्षेत्रे तत्त्वज्ञानमेव सर्वेषां मानवानां जीवनस्य लक्ष्यं भवेत्। यथा प्रोक्तम्;

**तस्मात्सर्वप्रयत्नेन सर्वावस्थासु सर्वदा।**
**तत्त्वनिष्ठो भवेत्ताक्ष्र्य यदीच्छेन्मोक्षमात्मनः॥**

**॥ ताहि भजिय मन तजि कुटिलाई ॥**

**सम्पादकाः**

# विषयानुक्रमणिका


| | |
|---|---|
| शुभाशंसनम् –प्रो. परमेश्वरनारायणशास्त्री, कुलपति: | *iii* |
| मङ्गलवचांसि –प्रो. एस्. सुब्रह्मण्यशर्मा, कुलसचिव: | *iv* |
| प्रस्ताव –प्रो. बच्चाभारती (प्राचार्य:, प्र.) | *v* |
| सम्पादकीयम् | *vii* |


**संस्कृत खण्ड**


| | | | |
|---|---|---|---|
| 1. | यदागमास्तद्गुणीभूतस्तद्ग्रहणेन गृह्यन्ते | –डॉ. सच्चिदानन्दशर्मा | 01 |
| 2. | लक्ष्यानुवेधनमन्त्र: | –डॉ. सतीशकुमारकपूर: | 06 |
| 3. | रप्रत्याहारस्य सिद्धि: तत्खण्डनञ्च | –डॉ. चिरञ्जीवीअधिकारी | 07 |
| 4. | जन्मकुण्डल्यानुसारेण चन्द्रस्य महादशा.... | –डॉ. रामदास शर्मा | 11 |
| 5. | ध्वनिसम्प्रदायस्योद्भव: प्राचीनता च | –डॉ. नीतू शर्मा | 17 |
| 6. | काव्यवाङ्मयम् | –डॉ. तेजनाथपौडेल: | 20 |
| 7. | यजुर्वेदीयशिक्षाग्रन्थेषु सन्धि-विमर्श: | –डॉ. दीपककुमारशर्मा | 23 |
| 8. | षट्प्रश्नोपनिषदि मुख्यप्राणतत्त्वम् | –डॉ. के.एल.पवनकुमार: | 31 |
| 9. | महाभारतयोगदर्शनयो: सम्बन्ध: | –डॉ. शुभश्री दाश: | 39 |
| 10. | हरबर्टीयविधे: गुणदोषविमर्श: | –डॉ. मदनसिंह: | 43 |
| 11. | पातञ्जलदर्शनम् | –डॉ. प्रमोदकुमारबुटोलिया | 45 |
| 12. | संस्कृतकोशवाङ्मयविकासपरम्परा | –डॉ. जी. राजशेखररेड्डि | 49 |
| 13. | कौण्डभट्टदिशा धात्वर्थनिरूपणम् | –डॉ. अम्बरीशकुमारमिश्र: | 57 |
| 14. | समावेशात्मकशिक्षायां श्रवणक्षतियुक्त... | –डॉ. हरिओम | 60 |
| 15. | शैक्षिकानुसन्धाने प्राक्कल्पनाया: रचना... | –डॉ. सन्तोष गोडरा | 64 |
| 16. | पुराणमाहात्म्यम् | – डॉ. जि. अमरेश्वरकुमार: | 68 |
| 17. | चतुरमल्लिनाथ: | –सुरेश स्वामी | 74 |
| 18. | कारकार्थविचार: | –पुरुषोत्तमदास: | 77 |
| 19. | साहित्यशास्त्रे उपमालङ्कार: | –ऋषिकुमार: | 80 |
| 20. | आधुनिकसंस्कृतसाहित्यस्य परिचय: | –शशि शर्मा | 85 |
| 21. | श्रीराधाचरितमहाकाव्ये श्रीराधाकृष्णयो: ... | –श्यामलाल: | 87 |

| | | | |
|---|---|---|---|
| 22. | वाक्यपदीयब्रह्मकाण्डे शब्दब्रह्मप्रतिपादनम् | –नीरज शर्मा | 89 |
| 23. | काव्यतत्त्वेषु अलङ्कार: | –राहुल लोधा | 92 |
| 24. | वर्तमानसन्दर्भे श्रीमद्भगवद्गीताया: महत्त्व... | –चेतनकुमार: | 94 |
| 25. | शब्दार्थसम्बन्धविचार: | –अनमोल शर्मा | 97 |
| 26. | शैक्षिकप्रबन्धनम् | –असीमकुमारपाठक: | 100 |
| 27. | उपनिषदां महत्त्वम् | –प्रतिमा बेहरा | 101 |
| 28. | शैवाचार्यो भास्करकण्ठ: | –नरेन्द्र भारती | 104 |
| 29. | विवाहस्य महत्त्वम् | –सस्मिता प्रधान | 110 |
| 30. | जीवनकौशलानि तेषां विकासश्च | –देवराज त्रिपाठी | 112 |

**हिन्दी खण्ड**

| | | | |
|---|---|---|---|
| 31. | कॉलरिज के काव्य सिद्धान्तों में ... | –डॉ. दयानिधि शर्मा | 114 |
| 32. | हिन्दी साहित्य में ब्राह्मण कवियों ... | –डॉ. संजय कुमार मिश्र | 119 |
| 33. | वैदिक वाङ्मय का संक्षिप्त परिचय | –डॉ. धनेश कुमार पाण्डेय | 123 |
| 34. | मूल्य संवर्द्धन में विद्यालय की भूमिका | –विवेक कुमार | 126 |
| 35. | वर्षा ज्ञान के चक्र | –जीवन कुमार | 130 |
| 36. | राष्ट्रिय संस्कृत संस्थान | –प्यारे लाल | 134 |

**डोगरी खण्ड**

| | | | |
|---|---|---|---|
| 37. | डुग्गर दे शरीद देवता | –अकुंश शर्मा | 135 |
| 38. | बावे माता | –राजन बाली | 138 |
| 39. | स्वस्थ तन, स्वस्थ मन | –सतीश कुमार | 139 |
| 40. | नमां साल | –सुमित शर्मा | 141 |

**आङ्ग्ल खण्ड**

| | | | |
|---|---|---|---|
| 41. | Wisdom of Abhinavagupta in ... | –Dr. D. Dayanath | 143 |
| 42. | Values of Sport in Our Life | –Dr. Rajender Lal | 145 |
| 43. | Cybercrime | –Sh. Vishal Mahajan | 147 |
| 44. | E-Learning | –Sh. Sehdev Singh | 152 |
| 45. | Teacher's Role for Student ... | –Bikram Dash | 156 |

** स्मृति चित्र : प्रो. स्व. रामानुज देवनाथन्


✦✦✦

 ISSN : 7552277-906X

# यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते

–डॉ. सच्चिदानन्दशर्मा

आगमः मित्रवदादेशश्च शत्रुवदित्युच्यते। पूर्वतः विद्यमानशब्दस्थाने अन्यशब्दोपजन आगमः। शब्दसामीप्यमवाप्यागमस्तत्र मित्रत्वेन विराजते तद्रूपताञ्चाप्नोति। भाष्यकारेण उक्तम्– आगमश्च नामापूर्वः शब्दोपजनः। आगमे शब्दस्य स्थाने शब्दान्तराभिवृद्ध्या शब्दनित्यत्वे न कापि क्षतिः।

एवमादेशे शब्दस्य स्थानेऽपरशब्दप्रयोगेण तत्र न्यूनता अभिवृद्धेश्च नावकाशः। शब्दनित्यत्व स्वीकारेण नित्यानित्यत्वदोषः परिसमाप्यते। प्रथमशब्दस्थाने शब्दान्तरप्रतिपत्त्या दोषाभावः।

अत उक्तम्-

**सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः**
**एकदेशविकारे हि नित्यत्वं नोपपद्यते।**[1]

आगमविषये अत्रोच्यते-आगमः आगमिनमवाप्य तद्गुणतामाप्नोति, यथा–कांचः काञ्चनसंसर्गान्मारकतीं द्युतिमाप्नोति तथैवागमः आगमिनः शब्दादिसान्निध्यमवाप्य तद्रूपतां भजते।

यथा वा–"यमाश्रितो हि वक्रोऽपि चन्द्रः सर्वत्र वन्द्यते"[2] अत्रागमरुपः वक्रचन्द्रः आगमिनं शिवमवाप्य तद्गुणीभूतत्वाच्चन्द्रः सर्वत्र वन्द्यते–प्रशस्यते।

अन्या उक्तिः "पारस परसि कुधातु सुहाई"[3] अत्र सामान्यागमस्वरुपमयः आगमिनं पारसमणिमवाप्य तद्गुणीभूतत्वात्तद्ग्रहणेन (तत्स्पर्शेन) स्वर्णरूपेण गृह्यते, सत्सान्निध्यात्तन्महत्त्वं वर्धते।

अन्यदुहारणम्–"कीटोऽपि सुमनः सङ्गादारोहयति सतां शिरः" अत्रागमरूपः कीटः आगमिनं सुमनमवाप्य तद्गुणीभूतत्वान्तन्महत्त्वं वर्धते तद्ग्रहणेन गृह्यते।

"भवानीशङ्करौ वन्दे श्रद्धाविश्वासरूपिणौ"[4] अत्रापि श्रद्धाविश्वासरूपागमौ आगमिनौ शिवाभिवञ्चावाप्य तद्गुणीभूतत्वात्तन्महत्त्वमादधानौ तद्रूपतां भजेते।

"केहि न सुसंग बडप्पन पावा" इत्युक्तिं चरितार्थयन् इमा उक्तयः "धूम कुसंगति कारिख होई, लिखिअ पुराण मंजु मसि सोई"।

**धूमउ तजउ सहज करुआई, अगर प्रसङ्ग सुगन्ध बसाई।**[5]
**जानत तुम्हहिं तुम्हहिं होई जाई।**

इत्याद्युदाहरणैः सिद्ध्यति यदागमः आगमिनमवाप्य तद्‌गुणीभूतत्वात्तद्‌ग्रहणेन गृह्यन्ते।

शास्त्रे यं शब्दमाश्रित्य आगमो विधीयते स आगमः आगमिनः अवयवत्वात् आगमी बोधकशब्देनागमविशिष्टस्यापि ग्रहणं जायते। अत एवोक्तम् आगमः तद्‌गुणीभूतशास्त्रेण तदवयवत्वेन बोधितः तद्ग्राहकेण शब्देन गृह्यते।

यथा लोके देवदत्तस्य हस्तके पञ्चांगुलिस्थाने षडंगुल्पाद्याधिक्ये सत्यपि तद्विशिष्टस्यैव देवदत्तग्रहणेन गृह्यते तथैव शब्दादागमे जाते तेन शब्देन तदागमविशिष्टस्य ग्रहणं शास्त्रे जायते।

यथा-प्रणिदापयतीत्युदाहरणे प्र नि उपसर्गात् दा धातोर्णिचि पुगागमे दापि "आगम समभिव्यवहारे आगमविशिष्टस्यैवार्थवत्वमिति नियमात् दा धातोर्विहिते पुगागमे आगमविशिष्टार्थ-वत्वाद् दापो ग्रहणं जायते।"

"दाधा घ्वदाप्" इति सूत्रेण दाधातोर्विधीयमाना घु संज्ञा दापः न सम्भवति "अर्थवद्ग्रहणे नानर्थकस्येति नियमादनर्थकदाप् शब्दस्य घु संज्ञाऽभावात् दाधा घ्वदाप्" इति सूत्रे अर्थवान् दारुपधातोरुच्चारितत्वात्।

दाप् धातौ दारूपत्वाभावः, शंकामुपस्थापयता-उच्यते-ननु दाप् घटक दा शब्दः दारूपोऽतः तस्य घुसंज्ञा भवेत्?

घुसंज्ञासूत्रे अर्थवतः दाधातोः द्युसंज्ञा विधानात् दाप्घटकदाशब्दे अर्थवत्त्वाभावाद् घुंसज्ञाऽभावः। दापः अर्थवत्त्वे सत्यपि तत्र दारूपत्वाभावात्, दाप्घटकदाशब्दस्य दारूपे सत्यप्यर्थवत्वाभावाद् घुसंज्ञाऽभावात्प्रणिदापयतीत्यादौ णत्वसिद्धिः।

प्रयोगेऽस्मिन् णत्वसिद्ध्यर्थमेषा परिभाषाऽत्र प्रस्तूयते-

**यदागमास्तद्‌गुणीभूतास्तद्‌ग्रहणेन गृह्यन्ते।।**[6]

प्रणिदापयतीत्यादावाकारान्तस्य दाधातोः पुगागमे पुकः[7] दाधातोरवयवत्वात्तद्‌गुणीभूतत्वाच्च पुगागमविशिष्टस्य दाधातुना ग्रहणात् घुसंज्ञा णत्वादिकार्यं च सिद्ध्यति।

ननु यमुद्दिश्यागमो विहितः स तद्‌गुणीभूतत्वात्तदागमिनोऽवयवत्त्वात्तद्ग्रहणेन तद्विशिष्टस्यापि ग्रहणमिति नियमात्प्रणिदारयतीत्यादौ दाशब्दात् दारः ग्रहणं कथन्न स्यात्?

दारयतीत्यत्र दृधातोर्णिचि ऋकारस्य "अथोञ्णिति"[8] इति बृद्धावाकारे "उरण रपरः" इति रपरत्वे दारयतीति रुपं जायते। दृधातोः ऋकारस्य बृद्धौ रपरत्वे आर् इत्यत्राकार निरूपितावयत्वं रेफेऽस्ति परं दा निपितावयत्वं रेफे नास्ति, दाशब्दोद्देश्यत्वेनारि रेफविधानाभावात् दाशब्देन दारोऽग्रहणात् घुसंज्ञाऽभावाण्णत्वाभावः।

पुनराशंकयता उच्यते-घुसंज्ञक दा धातौ दकारोत्तरवर्त्यकारस्य विद्यमानत्वाद्दात्वमित्युच्यते तद्वदात्वं दृधातोर्वृद्धौ सत्यां निष्पन्ने दार्शब्देऽप्यस्ति, प्रनिदारयतीत्यादौ आकारोद्देश्यत्वेन आरिति विधीयमाने रेफे अनया "यदागम" परिभाषया आत्वबोधनात् दारुपं स्वीकृत्य "दा घ्वदाप्" इति घुसंज्ञा कथं न स्यात्?

समाधाने उच्यते-“आने मुक्” इति मुग्विधानसामर्थ्यादस्या: परिभाषाया: अनित्यत्वाद्दा-शब्देन दारोऽग्रहणात् घु संज्ञाऽभाव:।

सोदाहरणं परिभाषाया अनित्यत्वं स्पष्टयता उच्यते – पच् धातो: शानच्प्रत्यये[9] शप्यनुबन्धलोपे आने परे अङ्गस्यातो मुमागमे प च् अ म् आन संयोगादिना पचमान इति रुपे जाते यद्यस्या: परिभाषाया: अनित्यं न स्वीक्रियते तर्हि अनया यदागम परिभाषया शपोऽकारेण मुगागमविशिष्टम: ग्रहणात् तद्गुणीभूतत्वादाकारग्रहणेन ग्रहणादम्यत्वबोधनात् सवर्णदीर्घेण पचान इति रूपं स्यात्। आगमी मुक: आगमिना शपोऽकारेणग्रहणात् मुग्विशिष्टेऽम्यत्वबोधनात् मुग्विधानं व्यर्थीभूय ज्ञापयत्येषा परिभाषा अनित्येति तेन पचमान इति रूपं सिद्ध्यति।[10]

यदागमपरिभाषाया अनित्यत्वाद् दिदीये इत्यादौ यणादिर्न सिद्ध्यति। दीङ्धातोर्लिर्ट्यात्मने पदे त स्थाने एशादेशे हित्वे “दीङो युडचि क्ङिति” इति सप्रत्ययस्य युडागमे रूपं सिद्ध्यति। अनया यदागमपरिभाषया यदि आगम: युट् आगमिन: ए प्रत्ययत्वेन गृह्यते तर्हि युड्विशिष्ट ये स्थाने एकारे स्वीकृते दिदी ए अत्र यणादेशेन दिघे इत्यनिष्टं रूपं स्यात्। परिभाषाया अनित्यत्वाद्युड्विशिष्ट ये शब्दे एप्रत्ययास्वीकारात् यणोऽभावात् “दिदीये” इति रुपं सिद्ध्यति।

एवं हृधातोर्लिटि तिपि णलि ऋकारस्य वृद्धौ जहार, अत्र ऋकारस्य वृद्धावार स्थाने यदागम परिभाषया आत्वे स्वीकृते जह्वा इत्यादन्तत्वादौत औणल: इत्यौत्त्वापत्ते:। परिभाषाया-अनित्यत्वादार् स्थाने आत्वबुद्ध्यभावादौत्वादिकन्न।

ननु ऋकारस्य बृद्धावार् इत्यत्राकार रेफौ भिन्नवर्णावुत वा एकमेव एवं दिदीये इत्यत्र येकारे यकार-एकारौ भिन्नभिन्न वर्णावुत एकएव?

उत्तरयता उच्यते-नैतौ भिन्नवर्णौ “उरण रपर:” “आद्यन्तौ टकितौ” इत्यनयो: सूत्रयोरु-भयत्रावयत्वबोधनात् भिन्नवर्णत्वाऽभाव:।

ऋबृद्धावारित्यत्र रपरसूत्रेण रेफ: पर: अन्तावयवो यस्येत्यर्थबोध:। एवमाद्यन्तौ टकितौ” इति टित्कितौ आद्यन्तावयवाविति बोधनादुभयत्रारोपितावयवत्व सादृश्ये पर्यवसानम्। यथा-अवय-विनाऽवयवो गृह्यते तथा आगमिन: ग्रहणेनागमविशिष्टग्रहणमनया यदागम परिभाषया बोध्यते।

येकारे ऋकारे चावयवत्वबोधान्नैतौ भिन्नवर्णा वपि त्वेकएव। वर्णग्रहणेऽस्या: परिभाषाया: प्रवृत्तिर्भवति न वेति विचारयता उच्यते-

ननु “आने मुग्” इत्यत्र मुग्ज्ञापनापेक्षया वर्णग्रहणेऽस्याप्रवृत्ति: कथं न स्वीक्रियते?

उत्तरयता उच्यते-आने मुक् इत्यत्र भाष्ये वर्णग्रहणेऽस्या: परिभाषाया: समर्थनात्। तत्रोक्तं पचमान इत्यत्राङ्गावयवस्याकारस्य मुगागमे “तस्यानुदात्तेत्” इति सूत्रेणादन्तोपदिश्यमानात्पर ल सार्वधातुकमनुदातं विधन्ते। अकारस्य मुमागमेऽदन्तत्वनाशात्स्वरो न स्यादित्याशंक्योक्तम्-अदुपदेशभक्तस्तङ्ग्रहणेन गृह्यते। अर्थात् औपदेशिक शपोऽकार: अवयवत्वेन (भक्तत्वेन)मकारे स्वीकृते स्वरसिद्धिर्जायते। अदन्तोपदिश्यमानवर्णमात्रवृत्तिधर्मेऽस्य प्रवृत्याभाष्योक्ति: संगच्छते।

वर्णग्रहणेऽस्या: परिभाषाया अन्यदुदाहरणं प्रस्तूयते-“ङमो ह्रस्वादचि ङ्मुण्णित्यम्”

इत्यनेन ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो ङमुडागमः क्रियते। कुर्वन् आस्ते इत्यत्र ङमः टित्वान्नकारस्यादौ नुडागमे कुर्वन् न् आस्ते अत्र अन्त्यनकारस्य णत्वं "पदान्तस्य" इति निषिध्यते। पुनः पूर्वनकारस्य णत्वे प्राप्ते "यदागमपरिभाषया:" अन्त्यनकारस्य पदान्तत्वं पूर्व नकारे विधाय पूर्वनकारस्यापि णत्वं "पदान्तस्य" इत्यनेन सूत्रेण वार्यते।

अन्त्यनकारे विद्यमानपदान्तत्वधर्मस्य पूर्ववर्तिनकारे वर्णमात्रवृत्ति पदान्तत्वधर्मातिदेशाण्णत्वाभावात्प्रतीयते वर्णग्रहणेऽस्याः परिभाषया प्रवृतिरिति।

पूर्वमुक्तमागमीग्रहणेनागमविशिष्टस्य ग्रहणम्। वर्तमान णत्वादिसन्दर्भेणैतत्सिध्यति यदागमीग्रहणेनागममात्रमपि गृह्यते। आगमी बोधकशब्देनागमविशिष्टस्यपि ग्रहणम्।

यत्र गुणवृद्धौ रपरत्वादिकमुच्यते तत्र रेफविशिष्टे अरारौ गुणबृद्धयोरपेक्षा। यदि रेफविशिष्टे एतादृग्गुणबृद्धी न स्वीक्रियते तर्हि गुणबृद्धी अराराविति न सिध्यति।

वर्णग्रहणेऽस्याः प्रवृत्तिस्वीकारेणाकारे विद्यमानं गुणत्वमाकारे निहितञ्च बृद्धित्वधर्मः अरार्योः समायाति। अत एव "रदाभ्याम्" इति सूत्रे यत्र ऋकारस्थाने गुणबृद्धी भवतस्तत्र रेफशिरा-रेफः परावयवो यस्यैतादृगरारौ गुणबृद्धी संज्ञकौ भवत इत्युक्तम्।

शब्दनित्यत्वरक्षार्थं ग्रन्थकारेणोक्तम्-भाष्यकारेण शब्दस्य नित्यत्वं स्वीकृतम्, परमार्धधातुकादौ इडाद्यागमादेशेन च शब्दनित्यत्वं नश्यति, तस्य रक्षार्थम् 'आगमकानां सागमका आदेशाः' इत्यदिवाक्यं कल्पयते। इड्रहित सि चः[11] स्थाने सेड्बुद्धि कर्तव्य न त्विड्रहितस्थाने इट्सहितबुद्धिरिति। आदेशस्थले यथा बुद्धिविपरिणामस्तथैवागमेऽपि बुद्धेर्विपरिणामाच्छब्दनित्यत्वं सिद्धयति।

फलञ्चात्र स्थान्यादेशाभावादिड्विशिष्टे सिच्त्वधर्मस्य स्थानिवत्वाभावानेटि "इति सूत्रप्रवृत्यभावात्तद्व्यर्थत्वाच्च परिभाषां ज्ञापयति।"

ननु स्थानिवत्सूत्रे अर्थापत्तिमूलकत्वेन बोधिते वाक्ये स्थान्यादेशयोः ग्रहणं कथन्न जायते?

उत्तरे उच्यते-अष्टाध्यायाः सूत्रेण साक्षाद्बोधितस्थान्यादेशे रामाय इत्यादौ स्थानिवत्सूत्रस्य चारिताार्थ्यात्।

परिभाषां खण्डयता उच्यते-शब्दानित्यत्ववारणार्थं "आगमकानां सागमकाः आदेशाः" इति नियमानुसारं स्थानिवत्सूत्रेण कार्यं विधाय यदागमपरिभाषा न कर्तव्येति तात्पर्यम्।

यदागमपरिभाषया येन विधिस्तदन्तस्येति सूत्रेण वा यस्योपस्थितिस्तत्र निर्दिश्यमानत्वाभाव इति भाष्यकारेणोक्तम्-अदिबत् इत्यादे। पाधातोर्लङ्लकारे लावस्थायामडागमेत यदागम, परिभाषया पाग्रहणेनापाग्रहणे सत्यपि यदागमोपस्थाप्ये निर्दिश्यमानत्वाभावात् पा स्थाने पिबादेशेनापिवदिति सिध्यत्यत्र पाग्रह्णेनापाग्रह्णाभावात्।

स्थानिवत्सूत्रोपस्थाप्ये निर्दिश्यमानत्वस्वीकारेण अडागमसहितापेत्यस्य पिबादेशापत्त्या लावस्थायामडागम इति सिद्धान्तो व्याकुप्येदतः स्थानिवत्सूत्रे अर्थापत्तिमूलकवाक्ये कल्पित

स्थान्यादेशभावो न स्वीक्रियते इत्येवपक्षः स्वीकर्तव्यः।

स्थानिवद्भावेनोपस्थाप्ये निर्दिश्यमानपरिभाषाप्रवृत्तिस्वीकारे तिसृणामित्यत्रत्यः भाष्यसङ्गतिः स्यात्। तिसृणामित्यत्र तिसृ त्रयादेशयोर्युगपत्प्राप्तौ विप्रतिषेधनियमात् परत्वात्तिस्रादेशे स्थानिवद्भावेन-पुनः त्रिशब्दमाश्रित्य त्रयादेशप्राप्तौ सकृद्गतिन्यायेन त्रयादेशोः बाध्यते। तिस्रादेशेन वाधितः त्रयादेशः सकृद्गतौ न्यायात् बाधितमेव।

स्थानिवत्सूत्रेणोपस्थाप्ये निर्दिश्यमानत्वाभावात् तिसृस्थाने त्रयादेशाप्राप्त्या पुनः सकृद्गतिन्यायेन भाष्यकारस्य तद्वारणमसङ्गतम्। अतः स्थानिवत्सूत्रोपस्थाप्ये स्थानिवद्भावे निर्दिश्यमानत्वे स्वीकृते तिसृस्थाने पुनः त्रयादेशवारणं क्रियते।

अन्यमेकं स्थानिवद्भावप्रसङ्गं स्थापयता उच्यते-भवत्वित्यादिप्रयोगसाधके "एरुः सूत्रे स्थानषष्ठया निर्देशात्स्थान्यादेशभावोऽत्र दृश्यते।[15] परं भवतीत्यत्र तिपः इकारे तिङन्तत्वाभवादेरुः" इति सूत्रेण जायमाने उकारेऽपि तिङन्तत्वाभावात् भवत्विति प्रयोगे तिङन्तत्वाभावापत्तेः।

आनुमानिकस्थान्यादेशे तिस्थाने तु आदेशे स्वीकृते तिङन्तत्वं सिद्ध्यति, परं स्थानिवत्सूत्रे आनुमानिकस्थान्यादेशभावग्रहणाभावात् भवत्वित्यत्र पदत्वं न सिद्ध्यति।

अस्योत्तरे उच्यते "आर्धधातुके"ति सूत्रस्य षष्ठी अवयवार्थिकाः 'एरुः' इत्यत्रत्यः षष्ठी स्थान्यर्थबोधिका। अत्रेकारोकारयोस्तदन्तत्वेन लक्षणया कार्यं सिद्ध्यति। इकारान्तस्थाने उकारान्तादेशेन स्थान्यादेशभावः सुस्पष्टः। एतादृग्स्थान्यादेशभावयोः स्थानिवत्सूत्रे ग्रहणात्पदत्वं सिद्ध्यति।

स्थानिवत्सूत्रेण यदागमपरिभाषा गतार्थेति कथनमयुक्तम्। स्थानिवत्सूत्रस्य यदागमपरिभाष-योश्च क्षेत्रं भिन्नमिति "दाधा घ्वदाप्" इति सूत्रे भाष्ये स्पष्टम्।

**सन्दर्भाः**


1. पा. महाभाष्य
2. तुलसी रामायण-बालकाण्ड
3. तुलसी रामायण-बालकाण्ड
4. तुलसी रामायण-बालकाण्ड
5. तुलसी रामायण-बालकाण्ड
6. परिभाषेन्दु शेखर शास्त्र सम्पादक प्र., परिभाषा
7. पा. सूत्र अर्तिहीरी
8. पा. अ. सू. सं. 1-4-46
9. पाणिनि अष्टाध्यायी सूत्र-लटः शतृशानचौ
10. पा. अ. सू. आने मुक्
11. पा. सू. अस्ति सिचोऽपृक्ते।

12. पा. सू. स्थानिवदादेशोऽनल्विधौ।
13. त्रेस्त्रयः
14. विप्रतिषेधे परं कार्यम्।
15. पाणिनिसूत्र 'एरुः'।

सहायकाचार्य-व्याकरण

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# लक्ष्यानुवेधनमन्त्रः

-डॉ. सतीशकुमारकपूरः

विघ्नावरोधशतमप्यवलोक्य तीक्ष्णं,
लक्ष्यैकलग्ननयनं वयनं गुणानाम्।
नैराश्यलेशलवतोऽप्यनधीतचित्तं
विद्यार्थिनं सफलता स्वयमभ्युपैति॥1॥

अर्थं विभाव्य कणशः क्षणश्च विद्यां,
सत्कर्मणां च चरणाचरणं निरीक्ष्य।
उत्साहमात्रविभवाद्भुतधामवन्तं,
विद्यार्थिनं सफलता स्वयमभ्युपैति॥2॥

दुर्द्वन्द्वलम्बसरणीमपहाय दूराद्
एकान्तनिश्चितचितेन हि मानसेन।
केन्द्रीयाखिलमनोबलमुद्यमाढ्यं
विद्यार्थिनं सफलता स्वयमभ्युमैति॥3॥

लक्ष्यं विना तु मम जीवनमेव शून्यं
धन्यं भविष्यति तदध्ययनामृतेन।
इत्येव चिन्तनवदान्यमनन्यवृत्तिं
विद्यार्थिनं सफलता स्वयमभ्युपैति॥4॥

विन्ध्याटवी कटकिनी च महासमुद्रो
दुष्पार एव किमु तेन व लङ्घ्यानि?
इत्येवमप्रतिहतं विहितप्रयत्नं
विद्यार्थिनं सफलता स्वयमभ्युपैति॥5॥

औत्सुक्यमस्ति यदि तेऽध्ययनेषु वत्स!
विद्या स्वयं नियमिता समुपैष्यति त्वाम्।
बालं स्वकीयमवलोक्य बुभुक्षितं किं
दुग्धं स्वयं स्रवति नो जननीस्तनाभ्याम्?॥6॥

आशानिराशा-रमणीयवेला-खेलामयं जीवनमस्ति बन्धो!
अस्मिन् मनोरञ्जनपुञ्जकुञ्जे खेदावकाशोऽपि कुतोऽस्मदीयः?॥7॥

साहित्यविभागाध्यक्षः, श्री रणवीरपरिसरः, जम्मू

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# रप्रत्याहारस्य सिद्धिः तत्खण्डनञ्च

–डॉ. चिरञ्जीवीअधिकारी

प्रत्याह्रियन्ते=संक्षिप्यन्ते वर्णाः यत्रेति व्युत्पत्त्या 'प्रति+आ'उपसर्गपूर्वकहृञ्धातोः बाहुलकादधिकरणे घञि कृते सति प्रत्याहारशब्दो निष्पद्यते। शब्दशास्त्रे '**आदिरन्त्येन सहेता**'[1] इति सूत्रेण कृताः संज्ञाः प्रत्याहारशब्देन व्यवह्रियन्त इति। प्रक्रियायाम् अण्, अक् इत्यादयः प्रत्याहाराः प्रसिद्धाः। तदतिरिच्य 'र'प्रत्याहारोऽपि वैयाकरणसम्प्रदाये प्रसिद्ध एव। शब्दशास्त्रे रप्रत्याहारविषये मतद्वयं वर्तते। एकः सम्प्रदायः रप्रत्याहारवादी अपरो तत्खण्डनवादी। यथा– रप्रत्याहारवादिन आचार्याः भट्टोजिदीक्षितादयः, तत्खण्डनकर्ता च नागेशभट्टः प्रमुखः।

प्रस्तुते शोधपत्रे रप्रत्याहारस्य सिद्धिप्रकारं प्रदर्श्य तस्य खण्डनप्रकारश्च प्रस्तूयते। यथा–

### रप्रत्याहारस्य सिद्धिः –

भट्टोजिदीक्षितः '**लण्सूत्रेऽकारश्च**'[2] इति सिद्धान्तकौमुद्यामुक्त्वा रप्रत्याहारः '**हयवरट्**'[3] इति माहेश्वरसूत्रस्य रकाराद् आरभ्य '**लण्**'[4] सूत्रस्याकारपर्यन्तं स्वीकरोति। रप्रत्याहारे

रकारलकारयोर्बोधो जायते। रप्रत्याहारस्य बीजन्तु '**तुल्यास्यप्रयत्नं सवर्णम्**'[5] इति सूत्रभाष्ये '**लपरत्वं वक्ष्यामि**'[6] इत्युक्तिः। '**उरण् रपरः**'[7] इत्यत्र रपरत्वं विलोक्य 'तवल्कारः' इत्यादिसिद्धये भाष्यकारो ब्रूते यत् '**लपरत्वं वक्ष्यामि**' इति। आचार्येण कैयटेनास्य भाष्यवाक्यस्य व्याख्या एतादृशी कृता– '**लपरत्वमिति वक्ष्यामि-व्याख्यास्यामि, रपरः इत्यत्र लकाराकारेण प्रत्याहार आश्रीयते**'[8] इति। आचार्येण भट्टोजिदीक्षितेनापि कैयटमतमवलम्ब्य 'लण्सूत्रेऽकारश्च' इत्युक्तं सिद्धान्तकौमुद्याम्। अस्य वाक्यस्य व्याख्या एवंप्रकारेण दीक्षितेन कृता– '**लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफोरलयोः संज्ञा**'[9] इति। दीक्षितेन लण्सूत्रस्थाकारस्येत्संज्ञां '**उपदेशेऽजनुनासिक इत्**'[10] इति सूत्रेण कृत्वा रप्रत्याहारस्य सिद्धिः कृता।

**रप्रत्याहारस्य खण्डनम्** –

रप्रत्याहारस्य खण्डनं कुर्वन् आचार्यः नागेशः '**लण्सूत्रेखकारश्च**' इति वाक्यं नैव स्वीकरोति। तन्मते लण्सूत्रघटकाकारस्यानुनासिकत्वन्न। अतः 'र' प्रत्याहारोऽपि नैवास्ति। नागेशेन 'लपरत्वं वक्ष्यामि' इति वाक्यस्य व्याख्या 'उरण् रपरः' इत्यस्मिन् सूत्रे लकारस्य पाठः स्यादिति कृता। रप्रत्याहारस्य खण्डनविषये नागेशेन लण्सूत्रस्थाकारस्येत्संज्ञत्वे निम्नदोषा उपस्थापिताः–

तत्र प्रथमो दोषः – यदि लण्सूत्रस्थाकारस्यानुनासिकत्वाद् इत्संज्ञां कृत्वा रप्रत्याहारस्य सिद्धिर्स्यात्तर्हि 'अतो लान्तस्य'[11] इति सूत्रे पाणिनेर्लकारोच्चारणं व्यर्थं स्यात्। तस्मात् पाणिनेर्लकारोच्चारणसामर्थ्यात् ज्ञायते यत् लण्सूत्रघटकाकारो नानुनासिक इति। अतः 'उपदेशेऽजनुनासिक इत्' इति सूत्रेणास्याकारस्येत्संज्ञा न भविष्यति, तस्मात् रप्रत्याहारोऽपि न सेत्स्यतीति।

द्वितीयो दोषः – लण्सूत्रस्थाकारस्येत्संज्ञत्वे सति रप्रत्याहारवत् 'य' प्रत्याहारस्यापि सिद्धिर्स्यात्। यप्रत्याहारसिद्धत्वे सति पाणिनिः यण्पदघटकसूत्रेषु 'य' इत्यस्यैव व्यवहारः कुर्यात्। परन्तु तेन एतादृशो व्यवहारो न कृतः। अतः पाणिनेर्यण्घटकसूत्रेषु 'य' प्रत्याहारस्याभावत्वान्न रप्रत्याहारः।

तृतीयो दोषः – '**प्रत्याहारेष्वितां न ग्रहणम्**'[12] इति भट्टोजिदीक्षितेनोक्तं सिद्धान्तकौमुद्याम्। अत्र भाष्यकारेण त्रयो हेतवः प्रदर्शिताः। नागेशेनाऽपि लघुशब्देन्दुशेखरे उक्तं यथा–

> **प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न।**
> **आचारादप्रधानत्वाल्लोपश्च बलवत्तरः॥**[13]

अत्र तृतीयहेतोः '**लोपश्च बलवत्तरः**' इत्यस्यानुमानिकप्रक्रियायां पक्षतावच्छेका-व्यापकत्वापत्तिर्भवति, लण्सूत्रस्थाकारस्यानुनासिकत्वात्। अत्र नागेशेन शेखरे लिखितं यत् सर्वप्रथमं हल्प्रत्याहारस्य सिद्धिर्भवति। हल्प्रत्याहारसिद्धिसमये अच्प्रत्याहारस्याभावात् लण्सूत्रघटकाकारस्येत्संज्ञा 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण न स्यात्। तस्मात् 'अनुबन्धाः प्रत्याहारजन्यबोधविषयत्वाभाववन्तः लोपशास्त्रीयोद्देश्यतावच्छेकाक्रान्तत्वात्' इत्यनुमानेन प्राप्तो

हेतुः लण्सूत्रघटकाकारे नागच्छति। अत्र कारणन्तु यथा– इत्संज्ञाया अभावत्वात् लण्सूत्रघटकाकारः **'तस्य लोपः'**[14] इत्यस्योद्देश्यतावच्छेदकेत्वेनाक्रान्तो न भवति। अतः अत्र पक्षतावच्छेदक-व्यापकत्वन्न।

चतुर्थो दोषः – लण्सूत्रघटकाकारस्य हल्प्रत्याहारे समावेशत्वात् 'सोऽस्ति' इत्यत्र तच्छब्दात्परस्य सुविभक्तेर्लोपः **'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि'**[15] इति सूत्रेण स्यात्, अस्तिपदघटकाकारस्य हल्त्वात्।

रप्रत्याहारवादिनः नागेशस्य रप्रत्याहारखण्डनविज़ये उपर्युक्तानां दोषाणां समाधानं दत्वा रप्रत्याहारस्य सार्थक्यं प्रस्तुवन्ति। यथा–

नागेशस्य 'अतो लान्तस्य' इत्यत्र लकारोच्चारणविषये उक्तस्य मतस्य खण्डनं कृतं यथा–'अतो लान्तस्य' इत्यत्र लकारोच्चारणत्वात् रप्रत्याहारस्यानित्यत्वं ज्ञापयति। एवमेव **'कमलानाम्'** इत्यादौ **'रषाभ्यां नो णः समानपदे'**[16] इति सूत्रेण नस्य णत्वं न भवति, रप्रत्याहारे लकारस्याभावात्।

द्वितीयदोषविषये उक्तं यथा– लण्सूत्रघटकाकारस्येत्संज्ञकत्वेऽपि रप्रत्याहारस्यैव सिद्धिः, न तु 'य'प्रत्याहारस्य। यप्रत्याहारस्य सिद्धत्वादर्धमात्रायाः लाघवत्वेऽपि गौरवं प्राप्यते। यथा– **'योऽचि'**[17] इत्यत्र यप्रत्याहारत्वात् यकारादिचतुर्वणानामादेशः प्राप्स्यति, अस्य निवारणमावश्यकम्। **'महाशूद्री'** इत्यत्र रकारस्य यप्रत्याहारस्योपधत्वाद् **'अयोपधात्'** इत्यस्य प्रवृत्तिर्भवति। तेन **'महाशूद्री'** इत्यत्र **'जातेरस्त्रीविषयादयोपधात्'**[18] इति सूत्रेण ङीष् नैव भविष्यति। **'यस्येति च'**[19], **'यस्य विभाषा'**[20] इत्यादिसूत्रेषु यकारेण किं ग्रहणीयमिति जिज्ञासाऽपि भविष्यति।

तृतीयहेतो अव्यापकत्त्वापत्तिरूपो दोषोऽपि रप्रत्याहारवादीनां मते नास्ति। अत्र कारणं यत् – इत्संज्ञकत्वमनुबन्धकत्वम्। परन्तु अत्र हल्प्रत्याहारस्य सिद्धेः पूर्वम् अच्प्रत्याहारस्य निष्पत्तेरभावात् लण्सूत्रस्थाकारस्य 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्संज्ञा न भवति। तस्माद् अत्र अनुबन्धत्वन्न। अत्र पक्षताया अभावात् पक्षतावच्छेदकाव्यापकत्वापत्तिदोषस्य प्रयोजनन्न। **'इत्संज्ञायोग्यत्वम् अनुबन्धकत्वम्'** इत्यनुसारेणानुबन्धत्वे सिद्धत्वेऽपि न कोऽपि दोषः।

नागेशस्य चतुर्थदोषविषये यथोक्तं रप्रत्याहारवादिभिः – लण्सूत्रघटकाकारस्य हल्प्रत्याहारे अन्तर्भूतत्वात् **'सोऽस्ति'** इत्यत्र सुलोपापत्ति असंगति एव। अत्र कारणं यथा– पाणिनिना **'अदेङ् गुणः'**[21], **'कुमारश्रमणादिभिः'**[22] इत्यादौ सुलोपः न कृतः।

इत्थं प्रकारेण वैयाकरणसम्प्रदाये रप्रत्याहारविषये मतद्वयं प्रचलितमस्ति। रप्रत्याहारवादिनः भट्टोजिदीक्षितादय आचार्याः नागेशमतस्य खण्डनं कुर्वन्ति। रप्रत्याहारखण्डनवादिनः नागेशादय आचार्याः रप्रत्याहारवादिनां मतं निराकुर्वन्ति।

इति शम्।

**सन्दर्भसूची**


1. पाणिनिसूत्रम् 1.1.71.
2. सिद्धान्तकौमुदी, संज्ञाप्रकरणम्।
3. माहेश्वरसूत्रम्–5.
4. माहेश्वरसूत्रम्–6.
5. पाणिनिसूत्रम् 1.1.9.
6. महाभाष्यम्, चतुर्थमाह्निकम्।
7. पाणिनिसूत्रम् 1.1.51.
8. महाभाष्यम्, चतुर्थमाह्निकम्।
9. सिद्धान्तकौमुदी, संज्ञाप्रकरणम्।
10. पाणिनिसूत्रम् 1.3.2.
11. पाणिनिसूत्रम् 7.2.2.
12. सिद्धान्तकौमुदी, संज्ञाप्रकरणम्।
13. लघुशब्देन्दुशेखरः, संज्ञाप्रकरणम्।
14. पाणिनिसूत्रम् 1.3.9.
15. पाणिनिसूत्रम् 6.1.132.
16. पाणिनिसूत्रम् 8.4.1.
17. पाणिनिसूत्रम् 7.2.89.
18. पाणिनिसूत्रम् 4.1.63.
19. पाणिनिसूत्रम् 6.4.148.
20. पाणिनिसूत्रम् 7.2. 15.
21. पाणिनिसूत्रम् 1.1.2.
22. पाणिनिसूत्रम् 2.1.70.


आचार्यः, श्रीमातावैष्णोदेवीगुरुकुलम्, चरणपादुका, कटडा (जम्मूकश्मीरम्)

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# जन्मकुण्डल्यानुसारेण चन्द्रस्य महादशाऽन्तरदशाफलम्

–डॉ. रामदास शर्मा

विश्ववाङ्मयस्यारम्भः वेदात् असन्दिग्धो वर्तते। एवञ्च तस्य वेदरूपी पुरुषस्यअद्भूत षड्शास्त्राणि–शिक्षा, कल्प, व्याकरण, निरुक्त, छन्द, ज्योतिषादिषु चक्षुरूप ज्यौतिषशास्त्रस्य स्थानं निर्धारयते। उक्तञ्च **ज्यौतिषं नेत्रमुच्यते** स्पष्टमदि यत् सभ्य–समाजे कर्तव्याकर्तव्यस्य निर्धारणे शास्त्राणां महत्वपूर्णं स्थानं वर्तते। अतएव समाजस्य चक्षुरूपे शास्त्राणां स्थानं प्रथमतः आयाति एवञ्च तेषा शास्त्रा चतुः वेदस्य वेदाः वर्तन्ते तथा वेदानामपि–चक्षुः ज्यौतिषविज्ञान–शास्त्रं मन्यते। एवञ्च यथा नेत्रहीनः पुरूषः स्वकार्यसम्पादने सर्वथाऽसमर्थो भवति तथैव ज्यौतिषविज्ञानविहीन पुरूषोऽपि स्वकीय कर्तव्याणां निर्धारणे पूर्णतः वाक्यो भवति।

इत्थं स्पष्टमस्ति यत् व्यक्तिं स्वकीय कर्तव्याणां निर्धारणायज्यौतिषविज्ञानशास्त्रस्य ज्ञानमवश्यकं भवेत्। तत्र जिज्ञासा स्वभाविकी यत् ज्यौतिषशास्त्र कीदृशः शास्त्रः अस्ति? ज्यौतिषशास्त्रेण किं किं ज्ञातुं शक्यते? तस्य प्रमाणिकताऽस्ति न वा? इत्यादीना जिज्ञासाशान्तये ज्यौतिषशब्दस्योत्पत्ति–**ज्यौतिषां सूर्यादिग्रहाणां बोधकशास्त्रम्** अनेन क्रियते। तथा ज्यौतिषशास्त्रं प्रत्यक्षशास्त्रस्य संज्ञाऽपि दीयते। यथोक्तमपि–

**विफलान्यन्यशास्त्राणि विवादस्तेषु केवलम्।**
**प्रत्यक्षं ज्यौतिषं शास्त्रं, चन्द्रार्कौ अत्र साक्षिणौ॥**

आशय अस्ति यत् ज्यौतिषतिरिक्तान्यानि शास्त्राणि **ननु न च** इत्यदिनैः प्रश्नैः सर्वेषु विषयेषु विवादमेव जनयन्ति केवलमेकमात्र ज्यौतिषशास्त्रमेव स्पष्ट–एवं प्रत्यक्षशास्त्रो वर्तते यस्य साक्षीस्वरसे सूर्यचन्दश्च स्तः। इतोऽपि ज्योतिषशास्त्रेण किं किं शक्यते? अस्य विषये सर्वविदितम् अस्ति यत् ज्यौतिषं कालविधायकं शास्त्रमस्ति अर्थात् अनेन शास्त्रेण भूत–भविष्य वर्तमानादीनां कालविषये ज्ञातुं शक्यते। स्पष्टबोधनाय निम्नस्थानं द्रष्टव्यम्–

**यदुपचितमन्यजन्मनि शुभाशुभ तस्य कर्मणः।**
**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीपिव॥** (लघुजातकम्)

अनेन प्रकारेण स्पष्टमस्ति यत् ज्यौतिषशास्त्रं कालविषायकं शास्त्रं वर्तते अनेन शास्त्रेण पुरूषस्य पूर्वजन्मनि कृतशुभाशुभ कर्मणा वर्तमान भूयमान्। वर्तमान जन्मनि प्राप्ते फलप्राप्तेः समयस्य ज्ञानं क्रियते तत्र ज्यौतिज्ञैः फलप्राद विंशोतरीदृशा, अष्टोत्तरीदशाः, षोडशोत्तरी, द्वादशोत्तरी, पञ्चोत्तरी शताब्दिका चतुरशीति समामहादशा द्विसप्तति समादशा

षष्टि..... दशा, कालदशा, चक्रदशा, योगिनीदशा, मण्डूकदशा, तारादशा, सन्ध्यादशा इत्यादीनां बहूदशानां वर्णनं कृतम्। तत्रापि महर्षि पराशरोक्त विंशोत्तरीदशा इदानीं सर्वमान्या अस्ति। उक्तञ्च-

**दशाबहुविधास्तासु मुख्या विंशोत्तरी मता।**

तत्र विंशोत्तरी दशायामपि प्रथमं महादशा-अनन्तरं अन्तर्दशा, प्रत्यन्तरदशा विभागाः वर्तन्ते तत्र महर्षिणा प्रत्येकस्य ग्रहस्य क्रम-समयसीमाश्च निर्धारितं कृतं यथा दशाक्रम-

**कृत्तिकातः समारभ्य त्रिरावृत्य दशाधिपाः।**
**आ.चं.कु.स.यु.श.जु.के.शुपूर्वा विहगाः क्रमात्।।** वृ.पा.हो.

स्पष्टमस्ति यत् सूर्य-चन्द्र-मंगल-राहु-गुरू-शनि-बुध-केतु-शुक्रादीनां क्रमेण त्रिरावृत्ति भविष्यति तत्र प्रत्येकस्य ग्रहस्य समयसीमा-अपि परिकल्पितं तद्यथा-सूर्यस्य सूर्यस्य-षड्वर्ष, चन्द्रस्य-दशवर्ष, मंगल-सप्तवर्ष, राहोः-अष्टादश, गुरोः-षोडश, शनेः-एकोनविंशतिः, बुधस्य-सप्तदश, केतोः-सप्तदशा, शुक्रस्य-विंशतिवर्षाश्च।

अनेन प्रकारेण ग्रहाणां दशाक्रमः समयसीमादि च निर्धारितं वर्तते तत्र प्रत्येक ग्रहः स्वजनित फलमंसप्तदशाया मवश्यमेव प्रददाति तेषामपि विस्तृतं वर्णनं दैवज्ञैः शास्त्रे कृतं परमिदानीं सन्दर्भानुगुणं मया संक्षिप्तैव वलं चन्द्रजनित शुभाशुभ फलानक्षत्र प्रस्तूयते-तद्यथा।

## विंशोत्तरी महादशायां चन्द्रफलम्

..... चक्रे यदि चन्द्रः स्वोच्चराशै उक्त्वा स्वक्षेत्रे (कर्कराशौ) स्थित चेत् को केन्द्र त्रिकोणे वा स्यात्, पूर्णवलीचन्द्रः शुभग्रेहैः सयुंतः स्यात्, चतुर्थ जन्मदशस्यनामधिपतिभिः युक्तश्चेतदा चन्द्रस्य महादशायांगारम्भत अन्तपर्यन्तं धन-धान्य माव्यादेः वृद्धिः गृहे मांगलिकं कार्यं, वाहन सुखः-राजदर्शनं आनेन कार्यसिद्धिः धनागम मित्रैः भाग्योदय: राष्ट्रालाभ सुख-शान्ति वस्त्रादीनां च लाभो भवति। अपि जातकः पुत्रलाभ मानसिक शान्तेः गृहे भवामि। .....

एव चन्द्रः यदा नीचस्थः क्षीणश्च स्यात्तदा स्वस्य महादशायां धनस्यहानिं करोति। बलयुत चन्द्रः तृतीये भावे चेत्तदा सुखः प्राप्तिः धनप्राप्तिश्च भवति। निबद्धचन्द्रः पापग्रहयुत-तृतीये भावे चेत्तदा-जडता मानसिक रोग, सेवकैः पीडा, धनहानिः मात्रा (माता के द्वार) उत वा मातुलेन कष्टो भवति। दुर्बल चन्द्रः पापग्रह संयुतो भूत्वा षष्ठ-अष्ठ-द्वादश स्थानेषु च स्थितो चेतदा जातकं तस्य दशायां राजद्वेष, मानसिक दुःख, धनधान्यादेः विनाशः मातृकष्टः पश्चाताय शारीरिक जड़ता मनोव्ययाश्च भवति।

एवञ्च यदा बलीचन्द्रः दुःस्थानेषु स्थितो भवति, तदा जातकं सुखदुःखयोः प्राप्तिर्भवति तथा अशुभकारक चन्द्रस्य महादशायां ग्रहाणां शान्तिं कारयित्वा शुभ फलानां प्राप्तिः भवितुं शक्यते।

## चन्द्रान्तर्दशाफलम्

**स्वोच्चे स्वक्षेत्रगे चन्द्रे त्रिकोणे लाभगेऽपि वा।**
**भाग्यकर्माधियैर्युक्ते गजाश्वाम्बरसङ्गुलम्॥**

**देवतागुरूभक्तिश्च पुण्यश्लोकादिकीर्तनम्।**
**राज्यलाभो महत्सौख्यं यशोवृद्धिः सुखावहा॥**
**पुर्णे चन्द्रे बलं पूर्णं सेनापत्यं महत्सुखम्॥**

अर्थात् चन्द्रः स्वोच्चे, स्वक्षेत्रे, त्रिकोणे, एकादशेश-भाग्येशः वा कर्मेशेन सह स्थितो चेत्तदा चन्द्रः स्वस्यान्तरदर्शायां गज-अश्व-वस्त्रादीनां च लाभं कारयति। इतोऽपि-गुरूजनेषु च भक्तिः, पुण्यश्लोकादीनां पाठः भमवद् भजन, राज्यलाभ, पूर्ण सुख तथा यशस्य वृद्धिः भवति। यदि चन्द्र पूर्ण बली भवति तदा जातकं सेनानायकस्याधिकारप्राप्तिः भवति।

### ( 1 ) चन्द्रमहादशायां चन्द्रान्तर्दशाफलम्

इतोऽपि चन्द्रः पापयुतः, नीचस्थः, षड्-द्वादशेस्थाने वा चेत्तदा तस्य नन्तरर्दशायां धननाशः, स्थाननाश, आलस्यः, मानसिक तापः, नृपमन्त्रिभिश्चभावः, मातृकष्टः, मनसिकदुःख, बन्धनमेवं बन्धूनां नाशश्च भवति। यथा चन्द्रः यदा द्वितीयशः सप्तमेशो वा स्यात् उत् वा अष्टमेश-द्वादशेशेन युतो भवति तदा देहे जड़ता स्थानभङ्ग एवं अपगृत्योः भयश्च भवति। आरिष्टशमनार्थ श्वेता गावः एवं महिष्याः दानं कर्तव्यम्।

### ( 2 ) चन्द्रमहादशायां भौमान्तर्दशाफलम्

**चन्द्रस्यान्तर्गते भौमे लग्नात्केन्द्रत्रिकोणगे।**
**सौभाग्यं राजसम्मानं वस्त्राभरणभूषणम्॥**

**यत्नात् कार्यार्थसिद्धिरतु भविष्यति न संशयः।**
**गृहक्षेत्रभि वृद्धिश्च व्यवहारे जायो भवेत्॥**
**कार्यलाभो .......................................**

अर्थात् चन्द्रमहादशायां भौमान्तरदशायां यदा भौमः लग्नात् केन्द्र त्रिकोणेः स्थितो चेत्तदा जातकं शोभाग्यं, राज्ञा सम्मानं-वस्त्र-आभूषणादीनां प्राप्तिः यत्नेन कार्यसिद्धिः, ग्रह क्षेत्रस्य वृद्धिः, व्यवहारे विजयप्राप्ति एवञ्च यदा भौमः स्वोच्चे स्वगृहे वा स्थितो भवति तदा कार्यलाभ पूर्णसुखस्य च प्राप्तिर्भवति।

इतोऽपि भौमः अष्टम-द्वादशस्थाने पापसंयुतो च दशाधिपतिन अशुभ [अर्थात् षष्ठ-अष्ट-द्वादश स्थानेषु च] स्थानेषु शत्रुणा दृष्टो चेतदा जातकं शारीरिकं कष्टं, गृह क्षेत्रेषु च हानिः, व्यवहारे क्ष्ज्ञति, सेवकेः कलहः नृपद्रोहः, स्वबन्धुबान्धवेन सह विद्रोहः, सर्वदा कटुभाषणं एवञ्च प्रतिक्षणे क्रोधस्यागमनं भवति।

द्वितीयेश-सप्तमेशो वा भूत्वा अष्टमेस्थाने चेत् उत वा स्वत: अष्टयेश स्यात्तदा चन्द्रः अशुभफलदायके भवति। तद्दोष परिहारार्थ ब्राह्मणानाम् अर्चनं आदरणं, सत्कारादीनां कार्येण अशुभ: फलानि शुभफलेषु परिवर्तिते भवन्ति।

### ( 3 ) चन्द्रमहादशायां राह्वन्तरदशाफलम्

चन्द्र महादशायो राह्वन्तरदशायां यदा राहु: कुण्ड्ल्यां केन्द्र-त्रिकोणस्थाने स्थितो भवति तदा प्रारम्भे सामान्यशुभफलं पश्चात् शत्रुपीडा, महानभय, सर्व, राजादिभयश्च, पशूनां कष्ट: बन्धुनाश:, मित्रहानि:, मानहानि, मानसिक सन्तापश्च भवति। उक्तमपि बृहत्पाराशरग्रन्थे-

**चन्द्रस्यान्तर्गते राहौ लग्नात् केन्द्रत्रिकोणमे।**
**आदौ स्वल्पफलं ज्ञेयं शत्रुपीडो महद्वयम्॥**

**चौरादिराजभीतिश्च चतुष्याज्जीवपीडनम्।**
**बन्धुनाशो मित्रहानिर्मानहानिर्मनोव्यथा॥**

इतोऽपि-चन्द्र: यदा शुभग्रह युत-दृष्टो वा स्यात् उतवा लग्नात् उपचयस्थानेषु तृतीय-षड्-दश-एकादशभावेषु] स्थितो चेता योगकारकग्रहै युतश्चेतदा तस्य अन्तर्दशायां सर्वेषु कार्येषु साफल्यता, नैर्ऋत्य-पश्चिमदिशि वा नृपादिभि: समागम, वाहन वस्त्रादिकं लाभं, अभिष्टकार्यस्य सिद्धिश्च भवति।

### ( 4 ) चन्द्रमहादशायां जीवान्तर्दशाफलम्

**चन्द्रस्यान्तर्गते जीवे लग्नात्केन्द्रत्रिकोणगे।**
**स्वगृहे लाभगे स्वोच्चे राज्यलाभो महोत्सवः॥**

**वस्त्राऽलङ्कारभूषाणी राज्यप्रीतिधनागमः।**
**इष्टदेवप्रसादेन गर्भधानादिकं फलम्॥**

उपर्युक्तश्लोकस्याशयो वर्तते यत्-चन्द्र महादशायां गुरो: चन्द्रर्दशायां यदा गुरू लग्नकुण्ड्ल्यां लग्नात्केन्द्रे-त्रिकोणे वा चेतथा गुरू स्वगृहे-एवोञ्चे लाभस्य वा स्थितो चेतदा तस्यान्तर्दशायां राज्यलाभ: महोत्सवः, वस्त्र, अलंकार-आभूषण आदीनां प्राप्ति:, राजकृपा, इष्टदेवस्य प्रसन्नता, गर्भाधानादिनी प्रदिश गृहे मंगलकार्याणि, लक्ष्येर्दृष्टि:, राजाभय:, धन, भूमि:, गज, अश्वादीनां लाभ नृपस्य प्रसन्नताभि: सुख एवं अभीष्ट कार्यस्य सिद्धिर्भवति।

### ( 5 ) चन्द्रमहादशायां शन्यन्तरदशाफलम्

चन्द्रमहादशायां शन्यन्तरदशायां जातकस्य कुण्ड्ल्यां यदा शनि: लग्नात् केन्द्रे-त्रिकोणे स्वराशौ-स्वनवमांशे स्वोच्चे न च दियतो भूत्वा शुभाग्रहयुतदृष्टश्चे चेत्तथा लाभयुत भूत्वा लाभस्थाने स्थितश्चेतदा जातकं तस्य अन्तरदशायां पुत्र मित्र-धनसम्पत्तीनां प्राप्ति:, शुद्रजनसम्पर्कै: व्यावसाये लाभ:, गृहे कृषिकार्यस्य वृद्धि:, पुत्रलाभ, कल्याण एवं राजकृपया धन-धान्यादि

सम्पत्तीनां वृद्धिर्भवति। यथोक्तमपि ग्रन्थे-

**चन्द्रस्यान्तर्गते मन्दे लग्नात्केन्द्रत्रिकोणगे।**
**स्वक्षेत्रे स्वांशगे चैव मन्दे तुङ्गनंशसंयुते॥**

**शुभदृष्टयुते वाऽपि लाभे वा बलसंयुते।**
**पुत्रमित्रापिसम्पत्तिः शुद्रप्रभुसमागमात्॥**

**व्यवसायात्फलाधिक्यं गृहे क्षेत्रादिवृद्धिदम्।**
**पुत्रलाभश्च कल्याणं राजानुग्रहवैभवम्॥**

इतोऽपि - कुण्ड्ल्यां शनि यदि लग्नात् षष्ठ-अष्ट-द्वादश स्थानेषु इत वा नीचस्थाने, धनभावे वा चेत्तदा तस्यान्तरदशायां प्रारम्भे पुण्यतीर्थेषु स्वानं दर्शनञ्च अवसरः प्राप्नोति जातकः, परन्तु अनेक जनानां भयः एवं शत्रुपीडाश्च भवति। तस्य दोषस्य निवारणाय मृत्युञ्जय जप तथा कृष्णा गावः महिष्याः दानं कर्तव्यम्॥

## (6) चन्द्रमहादशायां बुधान्तर्दशाफलम्

**चन्द्रस्यान्तर्गते सौम्ये केन्द्रलाभत्रिकोणगे।**
**स्वर्क्षे निजांशके सौम्ये तुङ्के वा बलसंयुते॥**

**धनागमो राजमानप्रियवस्त्रादिलाभकृत।**
**विपाविनोदसङ्गोष्ठी ज्ञानवृद्धिः सुखावहा॥**

**सन्तानप्राप्तिः सन्तोषो वाणिज्याद् धनलाभकृत।**
**वाहनच्छत्र संयुक्त नानालङ्कार लभकृत्॥**

अर्थात् - कुण्ड्ल्यां बुधयादि लग्नात् केन्द्रे-त्रिकोणे गृहस्थाने चेत्तदा......... युत भूत्वा। चेत्तदा जातकं - धनागम, नृपेथ क्षामान्, अभीष्टवस्त्रादि लाभः, विद्याचर्चा, ....., गोष्ठी, ज्ञानवृद्धि, सुख, पुत्रप्राप्तिः, सन्तोष। लाभः, वहान इत्यादिकं प्राप्तिः अनेकाभूषाणां लाभो च भवति।

इतोऽपि बुधः चन्द्रात् यदा षष्ठः अष्ठ, द्वादशी, स्थानेषु .......... चेत्तदा तस्यान्तरदशायां शारीरिक कष्टः कृषिकार्य-गौ-भूमि-आदीनां नाशः बन्धनं एवं स्त्री-पुत्रान् च कष्ट भवति।

यदि बुध द्वितीयेशः सप्तमेव्यो वास्यातदा जातकं तस्यान्तरदशायां ज्वरपीडा एवं महान् भयश्च भवति। तस्य शान्त्यर्थं क्षमादानं विष्णूसहस्रनाम् स्तोत्रस्य च पाठ कर्तव्यम्।

## (7) चन्द्रमहादशायाम् केल्वन्तर्दशाफलम्

कुण्ड्ल्या यदा केतुः लग्नात् केन्द्र-लाभस्थाने त्रिकोणे वा बलयुत भूत्वा स्थितो चेत्तदा तस्य अन्तरदशायां जातकं धन लाभः, पूर्णसुखप्राप्ति स्त्री-पुत्रान् च सुख प्राप्तिः, धार्मिक कार्येषु-अभिरूचिः श्च भवति। केतोः अनन्तरदशायां प्रारम्भे धनहानि तत्पश्चात् सुखस्य

प्राप्तिर्भवति। यथोक्तमपि ग्रन्थे-

**चन्द्रस्यान्तर्गते केतौ केन्द्रलाभत्रिकोणो।**
**दुधिक्ये बलसंयुक्ते धनलाभं महत्सुखम्॥**

**पुत्रदारादिसौख्यं च विधिकर्म करोति च।**
**भुवत्यादौ धनहानिः स्यान्मध्यगे सुखमाप्नुयात्॥**

विशेष-केत्वन्तरदशायांभशुभफलशमनार्थं-सुखसम्पतिप्रदात श्रीमहामृत्युञ्जयमन्त्रस्य जपं एवं शिवारधनां च कर्तव्यम्-उक्तं च-

**मृत्युञ्जयजपं कुर्यात् सर्वसम्पत्यप्रदायकम्।**
**ततः शान्तिमवाप्नोति शङ्करस्य प्रसादतः॥**

## (8) चन्द्रमहादशायां शुक्रान्तरर्दशाफलम्

जन्मकुण्ड्ल्यां शुक्रः यदा चन्द्रेण संयुतः चेत्तदा-तस्यान्तरदशायां जातकं शारीरिक सुख-पूर्णसन्तोषः-सुयशः सम्पत्तिः तथा गृहभूमि-आदीनां प्राप्तिः भवति। एवञ्च शुक्र यदा स्वनीचस्थाने, अस्तः वा, पापग्रहभिः संयुतः दृष्टः चेत्तदा भूमि-पुत्र-मित्र-स्त्री-पुत्र-आदीनां हानिः नृपस्य विरोधः च भवति। तथा यदि शुक्रः धनभावे स्वोच्चे वा स्थितो चेत्तदा तस्यानन्तरदशायां जातकं निधिलाभः पूर्णसूखः, भूलाभः, पुत्रप्राप्तिश्च भवति। शुक्रः लाभेशेन भाग्येशेन वा युत चेत्तदा जातकस्य भाग्यवृद्धिः, ....कृपात् सुखप्राप्तिः, अभीष्टविद्धि देवब्राह्मणेन भक्ति .......... रत्नादीनां प्राप्तिर्भवति। एवञ्च शुक्रः द्वितीयेश सप्तयेश वा चेत्तदा तस्यानन्तरदशायां अपमृत्योर्भयो भवति। तद्दोषशाक्ये रूचिपाठ-जप-श्वेताधेनोः रजतस्य च दानकार्येण भगवत् शङ्कर कृपात् शान्ति तथा सुखस्य प्राप्ति र्भवति। यथोक्तमपि पराशरग्रन्थे-

**द्वितीयधूनमाघे तु अपमृत्युभयं भवेत्।**
**तद्दोषविनिवृत्यर्थं रूद्रजाप्यं च कारयेत्॥**

**श्वेतां गां रजतं दशाच्छन्तिमाजोत्यसंशयः।**
**शङ्करस्य प्रसादेन नात्र कार्या विचारणा॥**

## (9) चन्द्रमहादशायां सूर्यान्तरदशाफलम्

यदा कुण्ड्ल्यां सूर्यः स्वोच्चे, स्वक्षेत्रे, केन्द्रे, त्रिकोणे, लाभस्थाने, धनभावे तृतीयेभावे वा चेत्तदा तस्यानन्तरदशायां पूर्वनाटराज्यस्य प्राप्तिः, गृहेकल्याणामदकसुन्दरकार्यः, मित्र एवं भ्रूपति प्रसन्नात् ग्राम-भूमि आदीनां लाभः, पुत्रप्राप्तिः गृहे लक्ष्म्याः आगमनं च भवति किन्तु तदैयानन्तरदशायाः अन्ते शरीरे आलस्यज्वरपीडाश्च भवति। यथोक्तं ग्रन्थे-

**चन्द्रस्यान्तर्गते भानौ स्वोच्चे स्वक्षेत्रसंयुते।**
**केन्द्रे त्रिकोणे लाभे वा धने वा सोदरालये॥**

**नष्टराज्यधनप्राप्तिर्गृहे कल्याणयोभनम्।**
**मित्रराजप्रसादेन ग्रामभूम्यादिलाभकृत्॥**

**गर्भाधानफलप्राप्तिर्गृहे लक्ष्मीः कटाक्षकृत।**
**भुक्त्यन्ते देह आलस्य ज्वरपीडा भविष्यति॥**

अनेन प्रकारेण स्पष्टमस्ति यत् चन्द्रः स्वस्य दशाऽन्तरर्दशायां शुभाशुभौफलं च ददति, यदा कुण्ड्ल्यां चन्द्रः शुभाशुभस्थितितौ भवति तदा शुभफलप्रदाता एवञ्च अशुभस्थितितौ चेत्तदा न शुभफलप्रदायको च भवति। अतः वयं कथितुं शक्यते यत् कोऽपि ग्रहः केवलं शुभः उत वा अशुभो न भवति अपितु कुण्ड्ल्यां तस्य स्थितिः एव निर्धारयति यत् स ग्रहः स्वस्यदशायां कीदृशं फलं दास्यति। इतोऽपि विपरीतफलशमनार्थं महर्षिभिः निर्देशित-उपायानां प्रयोगं कर्तुं शक्यते।

सहायकाचार्य, ज्योतिषविभागः

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# ध्वनिसम्प्रदायस्योद्भवः प्राचीनता च

**–डॉ. नीतू शर्मा**

काव्यशास्त्रस्य विकासक्रमे उद्भूतेषु सम्प्रदायेषु ध्वनेरुद्भावना तस्य च काव्यात्मरूपेण प्रतिपादनमपि महत्त्वपूर्णं गण्यते काव्यशास्त्रविशारदैः। आनन्दवर्धनाचार्येण ध्वनिः काव्यात्मत्वेन प्रतिष्ठाप्य काव्यशास्त्रस्यविचारसरण्याः कश्चन नूतनैव मार्गः आविष्कृतः। काव्यशास्त्रपरम्परायां ध्वनिसम्प्रदायः कदा प्रादुर्भूतः? के चास्योद्भावकाः? इत्यस्मिन् विषये प्रामाणिकरूपेण यद्यपि किमपि वक्तुं न शक्यते। तथापि सन्दर्भेऽस्मिन् ध्वन्यालोके विरुद्धप्रतिभासमाने द्वे महत्त्वपूर्णे तथ्ये उपलभ्येते-

**प्रथमं तु**-ध्वन्यालोकस्यारम्भे एव – '**काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः**[1]'- इत्युक्त्वा ध्वनिकारेण बुधैः (काव्यतत्त्वविद्भिः) प्रवर्तिता ध्वनेः काऽपि पूर्वपरम्परा निर्दिष्टा। तद्यथा-

**बुधैः काव्यतत्त्वविद्भिः काव्यस्यात्मा ध्वनिरिति संज्ञितः परम्परया यः समाम्नातपूर्वः सम्यक् आ समन्ताद् म्नातः प्रकटितः........[2] इति।**

**अपरत्र च**–एतद्विपरीतं ध्वनिः प्राचां काव्यशास्त्रकर्तृणां बुद्धिभिरनुन्मीलितपूर्वमासीदित्यपि प्रोक्तम्। तद्यथा–

1. **तस्य हि ध्वनेस्तत्त्वं..........अणीयसीभिरपि चिरन्तनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मीलितपूर्वम्......।**[3]
2. **....लक्षणकृतामेव स केवलं न प्रसिद्धः, लक्ष्ये तु परीक्ष्यमाणे स एव सहृदयहृदयाह्लादकारिकाव्यतत्त्वम्।**[4]
3. **विमतिविषयो य आसीन्मनीषिणां सततमविदितसतत्त्वः।**
   **ध्वनिसंज्ञितः प्रकारः काव्यस्य व्यञ्जितः सोऽयम्**[5]**॥**
4. **सत्काव्यनयवर्त्मचिरप्रसुप्तकल्पं मनस्तु परिपक्वधियां यदासीत्।**
   **तव्द्याकरोत् सहृदयोदयलाभहेतोरानन्दवर्धन इति प्रथिताभिधानः**[6]**॥**

अत्र जिज्ञासात्रयमुत्पद्यते यत्–

1. पूर्वकाव्यशास्त्रकाराः ध्वनितत्त्वविषये अज्ञाताश्चेत् ध्वन्यालोककारेण ध्वनिपरम्परा-संवाहकत्वेन निर्दिष्टाः एते बुधाः (काव्यतत्त्ववेत्तारः) के?
2. ध्वन्यालोकात् पूर्वं ध्वनिसम्बद्धो न कश्चिदपि ग्रन्थः उपलभ्यते, न हि पूर्ववर्ति-भामहादिभिराचार्यैः विरचितेषु ग्रन्थेषु कुत्रचिदपि ध्वनेः ध्वनिपरम्परायाः वा निर्देशो प्राप्यते। अतः बुधैः प्रवर्तितायाः अस्याः परम्परायाः स्वरूपं किमासीत्? तस्याश्च प्रामाणिकता का?
3. बुधैः प्रवर्तितपरम्परायाः सद्भावेऽपि ध्वनिप्रवर्तनस्य श्रेयः आनन्दवर्धनाय कस्माद्दीयते? इति। ध्वन्यालोके ध्वनिः सहृदयहृदयसंवेद्यमेवित्युक्त्वा[7] तेषां (सहृदयानां) हृदये एव ध्वनेः प्रकाशमानता भूयो भूयः निर्दिष्टा। अतः ध्वनिप्रवर्तकत्वेन निर्दिष्टाः एते बुधाः वस्तुतः सहृदया एव (न त्वन्यः) इति प्रतीयते।

डॉ. काणे महोदयः सहृदयेतिशब्दं व्यक्तिवाचकं मत्वा ध्वनिप्रवर्तकरूपेण सहृदयेति नाम कञ्चिदाचार्यं निर्दिशति। किन्तु तस्येदं मतमसमीचीनं प्रतिभाति यतोहि ध्वन्यालोके ग्रन्थान्तरेष्वपि सहृदयशब्दः 'रसज्ञः' इत्यर्थे एव व्यवहृतः। यथोक्तं हि ध्वन्यालोके–

* **'रसज्ञतैव सहृदयत्वमिति**[8]**।'**
* **वैकटिका एव हि रत्नतत्त्वविदः सहृदया एव हि काव्यानां रसज्ञा**[9] **इति।**

सहृदयशिरोमणि अभिनवगुप्ताचार्योऽपि सहृदयशब्दमस्मिन्नेवार्थे व्याख्याति–

> **येषां काव्यानुशीलनाभ्यासवशाद्विशदीभूते मनोमुकुरे**
> **वर्णनीयतन्मयीभव-योग्यता चे स्वहृदयसंवादभाजाः सहृदयाः**[10] इति।

ध्वन्यालोके सहृदयाः महताऽऽदरेणानेकत्रोल्लिखिताः। अत्रेदमप्यवधेयं यद् ध्वन्यालोके सहृदयानां मनसि ध्वनेः प्रकाशमानता एवोक्ता, न तु तैः प्रतिपादनमिति। अतः किंरूपेणेयं परम्परा प्रवर्तमानाऽऽसीदिति प्रश्नः।

ध्वनिपरम्पराविषये ध्वन्यालोकलोचनटीकाकर्तुः अभिनवगुप्तस्य वक्तव्यमत्र दृष्टव्यम्-

**अविच्छिन्नेन प्रवाहेण तैरेतदुक्तं विनापि विशिष्टपुस्तक-विनिवेशनादिति**[11]।

ध्वन्यालोकस्य लोचनटीकायाश्चेतैः वचनैरिदं प्रतीयते यत् काश्मीरे सम्भवतः सहृदय-काव्यसमीक्षकानां तादृशोऽपि कश्चन वर्गः आसीत्, यः खलु पूर्ववर्तिषु काव्यकर्तृषु भामहादिभिः प्रतिपादितात् वाच्यवाचकसम्बन्धेन व्यवस्थितात् गुणालङ्कारप्रधान-प्रसिद्धप्रस्थानात् सर्वथा भिन्नम् अन्तस्तले निगूहितस्य कवेरभिप्रायभूतस्यार्थस्य (व्यङ्ग्यस्य) सद्भावेनैव काव्यस्य काव्यत्व-मङ्गीकृत्य ध्वनिः काव्यस्यात्मेति मतं सिद्धान्तयति स्म। कवेः प्रतिभया सह अविनाभूतसम्बन्धात् प्राचां काव्यशास्त्रकर्तृणां दृष्टिरपि तस्मिन् ध्वनितत्त्वे नूनमेव गता स्यात्, किन्तु गुणालङ्कार-प्रधानचिन्तनैव मोहिताः ते तस्य (ध्वनेः) यथार्थस्वरूपावबोधने असमर्थाः तं गुणालङ्कारादि-नाम्नैव व्यपदिशन्ति स्म। अतएव तेषु केचित् ध्वनेरभावं, अपरे तस्य भाक्तत्वं, अन्ये च तस्या-निर्वचनीयत्वमुक्त्वा तं प्रत्याख्यापितवन्तः। ध्वन्यालोकस्य प्रथमकारिकायां ध्वनिविरोधिनां अभाव-वादादिपक्षत्रयस्य परिकल्पना[12] इदमेव तथ्यं प्रमाणयति।

इत्थम्, आनन्दवर्धनात् प्राग् सहृदयकाव्यसमीक्षकैरनुभूयमानमिदं ध्वनितत्त्वं काश्मीरे काव्यसमीक्षाजगति शास्त्रीयगोष्ठीषु विद्वत्सु प्रायः चर्चायाः विषयस्तु आसीत्। किन्तु नूतन-सिद्धान्तप्रतिष्ठापनापूर्वकं ध्वनेः व्यवस्थितं शास्त्रीयनिरूपणं तैर्न कृतमासीत्। आनन्दवर्धनेनैव सहृदयैः काव्यात्मत्वेनाविच्छिन्नधारया प्रतिपादितस्य तस्य ध्वनेः प्रथमव्याकृतिः तेषामेव सहृदयानां मनस्तोषाय कृता। यथोक्तमेव ध्वन्यालोके-**तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम्**[13]॥

एवञ्च-

**सत्काव्यनयवर्त्मचिरप्रसुप्तकल्पं मनस्तु परिपक्वधियां यदासीत्।**
**तद्व्याकरोत् सहृदयोदयलाभहेतोरानन्दवर्धन इति प्रथिताभिधानः**[14]॥

अतः ध्वनिसम्प्रदायस्य प्रतिष्ठायाः श्रेयः आनन्दवर्धनायैव दीयते।

**सन्दर्भाः**

1. ध्व. 1/1
2. तत्रैव 1/1 वृ.पृ.-2
3. तत्रैव 1/1 वृ.पृ.-9
4. तत्रैव 1/13 वृ.पृ.-28
5. तत्रैव 3, वृ.पृ.-274
6. तत्रैव 4, उपसंहारात्मककारिका
7. (क) तस्य सहृदयजनमनः प्रकाशमानस्याप्यभावमन्ये जगदुः। ध्व. 1/1 वृ.पृ.-2
   (ख) ध्वनेस्तत्त्वं गिरामगोचरं सहृदयहृदयसंवेद्यमेव.....। तत्रैव 1/1 वृ.पृ.-9
   (ग) सहृदया एव हि काव्यानां रसज्ञाः। तत्रैव 3/47 वृ.पृ.-318

8. तत्रैव 3/16 वृ.पृ.–203
9. तत्रैव 3/47 वृ.पृ.–318
10. तत्रैव 1/1 वृ.लो.टी. (Vol-I) पृ.–57
11. ध्व. 1/1, वृ.लो.टी. (Vol-I) पृ.–19
12. काव्यस्यात्मा ध्वनिरिति बुद्धैर्यः समाम्नातपूर्व–
    स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
    केचिद् वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
    तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्।। तत्रैव 1/1
13. ध्व. 1/1
14. तत्रैव 4, उपसंहारकारिका

सहायक–प्रोफेसर, साहित्यविभागः

✦✦✦

**Shri Vaishnavi 2017** **ISSN : 7552277-906X**

# काव्यवाङ्मयम्

**–डॉ. तेजनाथपौडेलः**

"पश्य देवस्य काव्यं न ममार न जीर्यति" इति वेदवचनेन साहित्य(काव्य)शास्त्रस्य जन्मदात्री श्रुतिमातैव सिद्धयति। काव्यसौन्दर्यस्याधायकानि यानि गुणरीतिध्वनि–अलङ्कारादि तत्त्वानि साहित्यशास्त्रं विविनक्ति तानि सर्वाण्येव तत्त्वानि मूलतो वेदेषु प्राप्तानि भवन्ति तस्मात् साहित्यशास्त्रमपि वेदेभ्य एव प्रादुर्भूतमस्ति। काव्यमीमांसाकारो राजशेखरः कथयति यत् श्रीकण्ठः परमेष्ठिवैकुण्ठादिभ्यश्चर्चा तुष्टये शिष्येभ्य उपादिदेश। शास्त्रमिदं स्वजन्मसमयादेव नितरां लोकप्रियतां गतं तस्मादेतत् काव्यालङ्कार–काव्यशास्त्रक्रियाकल्प–साहित्यविद्यालङ्कारशास्त्र–साहित्यशास्त्रादिकतिपयनामभिः ससम्मानं सानुरागञ्च समाहूतमभूत्। साहित्यशास्त्रमेव मानवस्य श्रेयः प्रेयश्च सम्पादयति। तदेव मानवस्य क्षमतां तदीयां मनोवृत्तिं सम्यक् वेत्ति। तत्तथा यतते येन सर्वेऽपि मानवाः सत्पथगामिनो भूत्वा स्वीयं परमार्थं लब्धुं शक्नुयुः। मानवो मनोऽधिवसति न धियम्। साहित्यं काव्यञ्च तदेव मनो विमलीकरोति रसास्वादनमाध्मेन।

वस्तुतः संस्कृतकाव्यशास्त्रस्येष्ट एव रसः अतस्तत्साधनायै अन्येषामपि तत्त्वानां तत्र समावेशो विधीयते। रससाधनासरण्यां यः कोऽपि प्रत्यवायस्तेनेक्ष्यते तन्निरासायानारतमिष्यते।

पात्रचित्रण-संविधानकादि योजनायां यदैव तेन कश्चिदेवंविधभावोऽवलोक्यते यो रसानुभूतौ अन्तरायं क्षिपति तदैव तस्य सद्य तथापनयनमनुतिष्ठति यथा भावुका: रसास्वादनं रसास्वादनं निष्प्रत्यूहं विदधिरन्। संस्कृतकाव्यकाराणान्तु सर्वदायं विचारो भवति यद् वस्तु रसादति विच्छिन्नतां प्रापयेन्न च वस्त्वलंकारलक्षणै: रसं तिरोधाययेत्। काव्यकारेण तु सर्वदा मध्यममार्गा-वलम्नैव भवितव्यम्। उक्तञ्च-

**न चाति रसतो वस्तु दूरं विच्छिन्नतां नयेत्।**
**रसं न वा नतिशेदध्याद् वस्त्वलङ्कारलक्षणै:॥** (दशरूपके)

काव्यस्य **"लोकवृत्तानुकरणम्"** इति स्वरूपं स्वीकुर्वन्त्याचार्या: लोकवृत्तस्य नानाभाव-समन्वितत्वात् नानावस्थान्तरात्मकत्वाच्च भारतीयं काव्यशास्त्रीयमितिवृत्तं कस्यचन सीमितस्य कुड्यस्य पृष्ठतो बन्दीकृत्य न निधातुमीहन्ते। प्राचीना: भारतीयकाव्यकारा: अर्थगृहन्वो नासन्, न ते स्वानि काव्यानि द्रव्यार्जनाय लिलिखु:। न च तै: व्यवसायसाधनत्वेन तानि लिखितानि महनीयचरितानां महापुरुषाणां महनीयानि चरित्राण्ये वर्णनं तेषां ध्येयम्। वस्तुत: मानसगतस्य कालुष्यस्यापनयजं हि सतां कीर्तनेनैव सञ्जायते। काव्यञ्च लोकहृदयमनुवर्तते। हृदयन्तु लोक: एकरसं सदैव न समालोक्यते। तत् कदाचित् कुत्रापि रुचिं निदधाति कदापि कुत्रचित्। कदाचित् तद् औदार्ये कदाचित् कार्पण्ये, कदाचित् सौजन्ये कदाचित् दौर्जजन्ये रममाणमाप्यते। संस्कृतकाव्यं स्वभावत: विशुद्धस्य हृदयस्योपरि कर्मसंस्कारजन्यां मलिनतामपहर्तुं तादृशीमेव सामग्रीमुपयुनक्ति यादृश्या: लोकस्य समीहितं सिद्ध्येत् (पश्येच्च सततं मङ्गलं च)।

यथा मनुष्याणां वृत्तिस्वाभावेषु पर्याप्तभेद: संलक्ष्यते तथैव मानवस्य भावप्रधानक्रिया-भिव्यक्तरूपे काव्येऽपि भेदप्रभेद: स्वभाविक एव निगादितुं शक्यते। काव्यभेदस्यास्य विभिन्न-धारा: सन्ति तत्र श्रव्यं काव्यञ्चेति दौ भेदौ रचनास्वरूपविचारेण विद्येते। विभाजनस्यायमाधारो विभिन्नेन्द्रियाणां प्रभावकोऽस्ति। येषां काव्यानामानन्दस्योपयोग: कर्णेन्द्रियद्वारा श्रवणानन्तरं क्रियते तानि श्रव्यकाव्यानि कथ्यन्ते एवं यस्यानन्दस्योपयोग: अभिनयं दृष्ट्वा क्रियते तद्दृश्य-काव्यं कथ्यते। श्रव्यकाव्यं तु विशेषत: शिक्षितसमाजाय एवोपयोगि आसीत् किन्तु दृश्यकाव्यं जनसाधारणस्य कृतेऽपि सम्यगानन्दविधायकमासीत्।

तत्र श्रव्यकाव्यस्य द्वौ विभागौ स्त:। रूपात्मकविभाग:, वस्त्वात्मकविभागश्च। तत्र रूपात्मकविभागे भावशैलीदृष्ट्या श्रव्यकाव्यस्य त्रयो भेदा कृता: सन्ति। पद्यकाव्यम्, गद्यकाव्यम्, चम्पूकाव्यञ्च छन्दोवद्धा कवितारचना पद्यमिति निगछते। भावप्रधानेऽस्मिन् काव्यविधौ कवये किञ्चित् स्वातन्त्र्यं भवति किञ्चित् पारतन्त्र्यञ्च। गद्यकाव्यं हि सर्वसाधारणवार्तालाप भाषावत् भवति। यद्यपि गद्यकाव्यं छन्दोबन्धनेन मुक्तमस्ति तथापि गद्यरचना कवीनां कृते महत्काठिन्ययुता भवति। गद्यपद्यमिश्रितं काव्यं "चम्पूकाव्यम्" भवति।

यद्यपि नाटकेऽपीदं गद्यपद्यात्मकं मिश्रणं भवति किन्तु नाटकस्य शैली संवादप्रधाना भवति, न तु वर्णनप्रधाना इदमेवोभयोरन्तरं विद्यते।

वस्तुविचारेण पुन: काव्यस्य त्रय: भेदा: सन्ति (1) महाकाव्यम् (2) खण्डकाव्यं

मुक्तककाव्यञ्च। महाकाव्ये आकारस्य विशालत्वेन सह भावस्यौदात्तं विशालात्वञ्च तिष्ठतः। तस्य नायकः व्यक्त्यपेक्षया जातिविशेषस्याधिकं प्रतिनिधित्वं करोति। कस्यचिद्देवस्य सद्वंशोत्पन्नस्य नृपतेर्वा प्रभावशालिव्यक्तेर्वा वृत्तान्तं गृहीत्वानेकसर्गात्मकं महाकाव्यं विरच्यते। तद्वृत्तान्तरस्याधारः पुराणैतिहासादिर्भवति।

स्वभावत एव मानव सौन्दर्योपासकः प्राणी विद्यते। इयञ्च सौन्दर्योपासना कवौ कलाकारे वा सर्वाधिकव्यापकरूपेणावलोक्यते। तस्य सौन्दर्यस्य यथार्थस्वरूपं काव्यमाध्यमेनैवानुभूयते। विद्वांस आमनन्ति यत् जीवने सज्जनानां संगतिः काव्यानन्दप्राप्तिश्च महता सौभाग्यनैव भवतः। तेन हि सौन्दर्यभरितस्य मानवजीवनस्यप्राप्तिर्जायते। संसारविषवृक्षस्य इमे एव द्वे मधुरे फले कथिते।

**संसारविषवृक्षस्य द्वे एव मधुरे फले।**
**काव्यामृतरसास्वादः संगमः सज्जनैः सह॥**

अत्र शब्दार्थयोरेव काव्यमिति शब्दस्योद्देश्यता न तु शब्दमात्रे। अतः एव "शब्दार्थौ काव्यम्" इति काव्यशास्त्राचार्याः स्वीकुर्वन्ति। न केवलं काव्यशास्त्राचार्या अपितु बहव महाकवयः अपि तथैवाङ्गीकुर्वन्ति। यथा–

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥** –रघुवंशमहाकाव्यम् 1.1

**नालम्बते दैष्टिकतां न निषीदति पौरुषे।**
**शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते॥** –शिशुपालवधम् 2.88

**द्विषां विधाताय विधातुमिच्छतो**
**रहस्यनुज्ञामधिगम्य भूभृतः।**
**स सौष्ठवौदार्यविशेषशालिनीं**
**विनिश्चितार्थामिति वाचमाददे॥** –किरातार्जुनीयम् 1.3

एतमेव शब्दार्थौ मिलित्वा कवेर्हृदि मधुस्यन्दिनी काव्यामृतधारामाविष्कुरुतः। कविश्च तन्माध्यमेन लोकानुरञ्जनं काव्यं सृजति। कवेस्तदा काव्ये लोकानुरञ्जनमेवाभिप्रायोः न भवति। अपितु तन्माध्यमेन धर्मोपदेशं, सन्मार्गप्रदर्शनमपि भवति समाजस्य यथार्थस्थितिमादाय स्वप्रतिभावैभवबलेन कविः तथा वर्णयति येन सर्वेमानवाः सन्मागासन्मार्गयोः भेदविभेदने समर्थाः भवन्ति, रामायण–महाभारतादिनि आर्ष–काव्यानि निखिलानि पुराणानि चैतस्योदाहरणानि संस्कृते काव्यकारः संसारस्यासीमवैचित्र्यानुभूतिमालम्ब्य स्वीयानि पात्राणि घटयति, स तानि पात्राणि व्यक्तित्ववैशिष्ट्याद् यथार्थ जीवनाच्च संस्नयति। तदीयं परम्परागतमपि पात्रं कदापि वैरं न जनयति न च तदीयं पात्रं कल्पनालोकस्यापि पात्रं भवति। तद् भूतलस्यैव प्राणवान् मानवः। मानवजीवनस्य प्रवृतेर्जुगुप्सनमथवा निन्दा न भवति कवेरुद्देश्यं भवति। तस्य तु मानवजीवनधर्मविश्लेषणमेव लक्ष्यं भवति तत्सर्वं गुणालंकारीतिवृत्तिवनिरित्यादिभिरभिरञ्जयन् लोकानाह्लादयति। अतः काव्यस्य स्थानं सर्वत्र सर्वोत्कृष्टत्वेन वर्तते।

**सन्दर्भग्रन्थाः**


1. रघुवंशमहाकाव्यम्
2. शिशुपालवधमहाकाव्यम्
3. कितातार्जुनीयमहाकाव्यम्
4. नैषधीयचरितम्
5. अमरकोशः
6. ध्वन्यालोकः
7. काव्यप्रकाशः
8. सिद्धान्तकौमुदी


सहायक-प्रोफेसर, साहित्यविभागः

✦✦✦

**Shri Vaishnavi 2017** **ISSN : 7552277-906X**

# यजुर्वेदीय शिक्षाग्रन्थेषु सन्धि-विमर्शः

**–दीपककुमारशर्मा**

वैदिकशिक्षाग्रन्थेषु प्रामुख्येण षट्विषयाः समागच्छन्ति यथा–तैत्तिरीयोपनिषदि शिक्षावल्ल्यां –वर्णः स्वरः मात्रा बलं साम सन्तान इत्युक्तः शीक्षाध्यायः।[1] एतेषु विषयेषु सन्तानस्य तात्पर्यं सन्धिः। सन्धेः प्रयोगः प्रायशः सर्वासु भाषासु समानरूपेण सम्भवति। सन्धिशब्दस्य प्रयोगः सर्वप्रथमं ऋग्वेदे प्राप्यते। तत्र "मेलनम्" अर्थे अस्य प्रयोगो दृश्यते–

**संधाता संधि मघवा पुरुवसुरिष्कर्त्ता विह्रुतं पुनः।**[2]

वैदिकवाङ्मये अनेकेष्वस्थलेषु सन्धेः परिभाषारूपेण वचनानि उद्धृतानि। यथा–ऋक् भाष्यभूमिकायां "सन्तानः संहिता"[3] वाजसनेयिप्रातिशाख्ये "पदान्तपदाद्योः सन्धिः"[4] इति। ऐ. आ. तथा ऋक्प्रातिशाख्येऽपि "मेलनम्" इत्येव अर्थे सन्धिशब्दस्य प्रयोगः जायते।

"वर्णानामेकप्राणयोगः संहिता"[5] इति सूत्रस्य व्याख्याने उवट भाष्ये–एवं तावत् पादसंहिता ऋक्षु कर्तव्या, यजुष्षु त्वयं विधिः। वर्णानामेकप्राणयोगः=वर्णानामेकोछ्वासोच्चारणयोगः, पदे वा वाक्ये विश्रामः सा च प्राणसंहिता। यत्र भूयांसि पदानि अतिक्रम्यावसानं भवति न त्वेकेन प्राणेन तान्याप्तुं शक्यन्ते तत्रायं विधिः। यथा–"त्वामद्य ऋष आर्षेय ऋषीणान्नपादवृणीतायं

यजमान:"[6] यत्र त्ववसानं शक्यते व्याप्तुं तत्रावसान एव विरति: कर्तव्या। यथा "इन्द्रो विश्वस्य राजति"[7]

तैत्तिरीयप्रातिशाख्ये "अथ स ँ हितायामेकप्राणभावे"।[8] इति सूत्रस्य व्याख्यानावसरे सोमयार्यविरचितत्रिभाष्यरत्नाख्यव्याख्यायाम् – संहतेति कोऽर्थ:? नानापदसन्धानसंयोग:[9] इति। "परस्सन्निकर्ष: संहिता"[10] इति वैयाकरणा: पठन्ति। एकसमुत्थ: प्राण: एकप्राण:, तस्य भावस्तद्भाव:, तस्मिन् इत्यात्रेयमतम्। अन्यथापि समास: सङ्गच्छते, एकप्राणेन भाव्यते जन्यते उच्चार्यते इत्येकप्राणभाव:। एकेनोच्छ्वासेन यावानुच्चार्यते वेदभाग: तावान् "एकप्राणभाव:" इत्यर्थ:।

कतिपय शिक्षाग्रन्थेषु "सन्धि:" अर्थे "संस्कार:" इति पदस्य प्रयोग: दृश्यते। यथा– वा.प्रा. भाष्यकारेण आचार्य उवटेण प्रतिपादितम्–"संस्कारो लोपागमवर्णविकारप्रकृतिभावलक्षण:"[11] तत्रैव स्वरसंस्कारयोश्छन्दसि नियम: इत्यादय:। वर्णरत्नप्रदीपिका शिक्षायां सन्धे: चातुर्विध्यं प्रतिपादितम्।

**लोपागमौ विकारश्च प्रकृत्या भवनं तथा।**
**ज्ञातव्यो निपुणैरेवं संस्कारोऽसौ चतुर्विध:॥**[12]

**(1) लोप:-**

अत्र लोपसन्धिषु नियमोऽस्ति – "लोप: वर्णस्यादर्शनम्"[13] यत्र वर्णानामनुपलब्धि: स्यात् तत्र लोप सन्धि: भवति। सूत्रे–"निशब्दो बहुलम्" अर्थात् बहुलार्थीय: पदान्तीय: नि:शब्द: लुप्तो भवति। यथा–(1) श्रृङ्गाणि इति प्राप्ते–

**चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासोऽअस्य।**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश॥**[14]

**(2) पदानि इति प्राप्ते-**

त्रीणि पदा विचक्रमे........इत्यादे:।

द्वितीयसूत्रे – "नपुंसकादिकारस्य" नपुंसकादुत्तरो यो नकारस्तस्य सम्बन्धिन इकारस्य लोप: भवति। यथा–"एमन् सादयामि, भस्मन् सादयामि।" एमनि, भस्मनि इति प्राप्ते इकार–लोपश्छान्दस:। जायास्पत्यमिति प्राप्ते जास्पत्यमिति रूपं भवति यथा–"सञ्जास्पत्यं सुयममा–कृष्णुष्व।" उत् उपसर्गात् परस्तभाने प्रत्यये सकारोलोपमापद्यते।

यथा–उत् स्तम्भनम्=उत्तम्भनम्।

तृतीय सूत्रे–"यवयो: पदान्तयो: स्वरमध्ये लोप:।" इति सूत्रात् यवाद्वकारयो: पदान्तभूतयो: स्वरमध्ये वर्त्तमानयोर्लोपो भवति। यथा महाँय्–इन्द्र: इति पदस्य "महाँ इन्द्र:" इति रूपेणोच्चारणं भवति।

**( 2 ) आगमसन्धिः-**

"आगमः वर्णोपजनः" इति परिभाषासूत्रात् अतिरिक्त वर्णस्य समायोगः अत्र सम जायते। प्रातिशाख्ये विस्तृततरूपेण चर्चा विहिता उदाहरणार्थम् प्रस्तूयन्ते-

* **ककारागमः-**

पदान्तीयङ्रात् सकारे परे च ककारागमो भवति।[15] यथा-

आङ्+सोमः=प्राङ् क् सोमः। (मा.सं. 19.3)

सदृङ्+समानैः=सदृङ् क् समानैः। (तै.सं. 2.2.8)

तैत्तिरीयसंहितायां खिपरे ककारागमो भवति, इतर-संहितासु न भवति। यथा-

आ+खिदते=आक्खिदते। (तै.सं. 4.5.9)

प्र+खिदते=प्रक्खिदते। (तै.सं. 4.5.9)

* **चकारागमः-**

शुक्लयजुर्वेदप्रातिशाख्याभिमते छकारे परे स्वरः चकारेण व्यवधीयते।[16] यथा-

गिरिशाच्छावदामसि। (मा.सं. 16.4)

आच्छच्छन्दः। (मा.सं. 15.5)

यच्छा नः। (मा.सं. 15.5)

काण्वकाठकतैत्तिरीयसंहिताष्वपि स्वरः छकारे परे चकारेण व्यवधीयते, मैत्रायणी संहितायां न भवति। यथा-

यच्छा नः (काण्व सं. 35.54)

यच्छा नः (काठक सं. 38.13)

पाथ एषच्छागः (तै.सं. 4.6.8)

गिरिशाछा वदामसि (मै.सं. 3.9.2)

वाजसनेयिप्रातिशाख्यानुसारेण यस्य, अहाय, सह इत्येतैः पदैरूपहितः स्वरः छकारे परे न चकारेण व्यवधीयते।[17] यथा-

यस्य छाया - (मा.सं. 25.15)

सह छन्दसः - (मा.सं. 34.49)

* **तकारागमः-**

पदान्तीय नकारात् सकारे परे तकारागमो भवति।[18] यथा-

मनुष्यान्त्सह (मा.सं. 5.39)

त्रीन्त्समुद्रान् (मा.सं. 11.3)

तैत्तिरीयसंहितायां पदान्तीयटकारात् सकारे परेऽपि तकारागमो भवति, परन्तु माध्यन्दिन-संहितायां पदान्तीयटकारात् सकारे परे तकारागमो न भवति। यथा-

वट् त् स्वयमभिगूर्ताय (तै.सं. 3.2.8)

वष् ट् त् स्वाहा (तै.सं. 7.3.12)

*** शकारागमः-**

सुशब्दः चन्द्रशब्दे परे शकारेण व्यवधीयते[19] यथा -

सु+चन्द्र=सुश्चन्द्रसर्पिष (मा.सं. 21.42)

*** षकारागमः-**

परिशब्दः कृतशब्दे परे षकारेण व्यवधीयते।[20] यथा-

परि+कृताः=परिष्कृताः (मा.सं. 21.42)

*** सकारागमः-**

वनशब्दः पतिशब्दे परे सकारेण व्यवधीयते।[21] यथा-

वनानां पतिः=वनस्पतिः (मा.सं. 29.35)

वनस्पते (काठक सं. 3.2)

वनस्पतीनाम् (मै.सं. 4.9.10)

ऋतावरशब्दौ सकारेण व्यवधीयते यथासंख्यं पतिपरशब्दयोः परयोः।[22] यथा-

ऋतपते=ऋतस्पते (मा.सं. 27.34)

अवरपराय=अवरस्पराय (मा.सं. 30.19)

**( 3 ) विकारः-**

द्वयोर्पदयोर्मध्ये कुत्रचिदेकस्य वर्णस्य विकारः भवति कुचचिच्च उभयोर्भवति यथा-

आ+इदम्=एदम् (मा.सं. 4.1)

सु+सावसोमम्=सुषावसोमम् (मा.सं. 19.2)

तत्+चक्षुः=तच्चक्षुः (मा.सं. 36.24)

**स्वराणां विकार:-**

**( 1 ) एकीभाव:**

(क) सवर्णदीर्घ:-समानाक्षारे सर्वर्णपरे सति पूर्वापरीभूते एते उभे दीर्घमेकमाप्नुत:।[23] यथा-

प्र+अर्पयतु=प्रार्पयतु (मा.सं. 1.1) इत्यादय:।

रास्नासि+इन्द्राण्यै=रास्नासीन्द्राण्यै (मा.सं. 38.3)

अनु+उज्जेषम्=अनूज्जेषम् (मा.सं. 2.15)

(ख) अवर्णपूर्वे इवर्णपरे च सति ते उभे अक्षरे एकारमाप्नुत:।[24] यथा-

आ+इदम्=एदम् (मा.सं. 4.1)

(ग) अवर्णपूर्वे उवर्णपरे च सति ते उभे अक्षरे ओकारमाप्नुत:।[25] यथा-

वेद+उभयम्=वेदोभयम् (मा.सं. 40.14)

(घ) अवर्णपूर्वे एकारपरे ऐकारपरे च सति ते उभे अक्षरे ऐकारमाप्नुत:, अवर्णपूर्वे ओकारपरे औकारपरे च सति ते उभे अक्षरे औकारमाप्नुत:। यथा-

स्वाहा+एकशताय=स्वाहैकशताय (मा.सं. 22/34)

इन्द्राय+ऐन्द्रम्=इन्द्रायैन्द्रम् (मा.सं. 19.18)

इन्द्र+ओजिष्ठ=इन्द्रौजिष्ठ (मा.सं. 8.39)

प्र+औक्षन्=प्रौक्षन् (मा.सं. 31.9)

तैत्तिरीयप्रातिशाख्यानुसारेण अवर्णपूर्वे ऋकारपरे च सति ते उभे अक्षरे "अर्" विकारमाप्नुत:। यथा-

यत्र+ऋषय:=यत्रर्षय: (तै.सं. 4.7.13)

माध्यन्दिनसंहितायां कण्ठ्यस्वर: ऋकारे परे ह्रस्वमाप्नोति, मैत्रायणीसंहितायां च कण्ठ्यस्वर: ऋकारे परे दीर्घमाप्नोति। यथा-

विश्वकर्मा+ऋषि:=विश्वकर्मऋषि: (मा.सं. 13.58)

**( 2 ) अन्तस्थीभाव:-**

अकण्ठ्यस्वर: (इ, उ) स्वरे परे अन्त:स्थाम् (य् व्) आप्नोति।[26] यथा-

भवतु+अर्यमा=भवत्वर्यमा (मा.सं. 36.9)

त्रि+अम्बकम्=त्र्यम्बकम् (मै.सं. 1.10.04)

**( 3 ) अयादिभावः-**

स्वरे परे सन्ध्यक्षराणि (ए, ओ, ऐ, औ,) यथाक्रमम् अय्, अव्, आय्, आव् विकारं प्राप्नुवन्ति।[27] यथा–

म्+अय्+आबध्नामि=म अबध्नामि (मा.सं. 34.52)

कृशान्+अव्+एते=कृशानवेते (मा.सं. 4.27)

आहुवध्यै+उभराधसः=आहुवध्या उभाराधसः (का.सं. 6.9)

असौ+एहि=असावेहि (काण्व सं. 38.2)

**पूर्वरूपता-**

एकारौकाराभ्याम् अकारे परे अकारस्य लोपः एव भवति अयं सन्धिः पूर्वोक्तस्य अयादिसन्धेरपवादः एतत्सन्धिविषयीभूतलक्ष्ये पूर्वस्यैव वर्णस्य अवस्थानात् अयं पूर्वरूपसन्धिः कथ्यते।[28] यथा–तेऽप्सरसाम्, कोऽसि, कतमोऽसि।

एतावदेव हि व्यञ्जनानां उष्मादीनाञ्च विकारः जायते।

**( 4 ) स्वराणां प्रकृतिभावः-**

(क) **आकारस्य प्रकृतिभावः**–केचनशब्दाः प्रग्रहत्वेन प्रगृह्यत्वेन वा प्रदर्शिताः सन्ति उभयोरपि शुक्लकृष्णयजुर्वेदप्रातिशाख्ययोः। येषां पदानां पदान्तीय आकारः विकारं नाप्नोति।[29]

यथा–काऽईमरे (मा.सं. 23.55) स्वधाऽअसि। (तै.सं. 1.1.9)

(ख) **प्लुतस्य प्रकृतिभावः**–प्लुतः प्रकृत्या भवति इति शब्दे परे यथा विवेशा इति। संहितासु प्त्युतस्वरप्रकटनार्थं तस्याग्रे त्र्यङ्कः लिख्यते।

(ग) **ईकारस्य प्रकृतिभावः**–कानिचन पदानि प्रगृह्यत्वेन प्रदर्शितानि सन्ति। येषां पदानां पदान्तीय ईकारः विकारं न प्राप्नोति। यथा–

ऊती ऽ अरयामरयिम्। (मा.सं. 18.74)

पृथिवी ऽ उतद्यौः। (मा.सं. 33.42)

(घ) **अपृक्तोकारस्य प्रकृतिभावः**–शु. यजुर्वेद प्रातिशाख्यानुसारेण स्वरात् परे अपृक्त उकारः प्रकृत्या तिष्ठति परन्तु उकार स्वरयोः मध्ये वकारागमो न भवति। यथा–

न वा ऽ उ एतत्। (काण्व सं. 25.18)

(ङ) **ऊकारस्य प्रकृतिभावः**–पदान्तीयः दीर्घोकारः विकारं न प्राप्नोति। यथा–

बाहू ऽ उपस्तुत्यम्। (मा.सं. 29.12)

(च) **एकारस्य प्रकृतिभावः**–शु. यजुर्वेदप्रातिशाख्यकृता कानिचित् पदानि कण्ठोक्त्या

दर्शितानि येषां पदानां पदान्तीय एकारः प्रकृत्या तिष्ठति। यथा-

इमा मे ऽ अग्नऽइष्टका धेनवः। (मा.सं. 17.2)

(छ) **ओकारस्य प्रकृतिभावः**—पदान्तीय ओकारः स्वरे परे विकारं न प्राप्नोति। यथा-

प्राणो अङ्गे। (मा.सं. 6.20)

(ज) **व्यञ्जनानां प्रकृतिभावः**—नकारः प्रकृत्या तिष्ठति, पितृन् हविषे, त्वेषनृम्णः। (काव्य सं. 32.80)

एतादृशेषु पदेषु नकारः ऋषरेभ्यो नकारो णकारं समानपदे इति णत्वं प्राप्नोति तच्च निषिध्यते।[30]

(झ) **सकारस्य प्रकृतिभावः**—सकारः प्रकृत्याभवति यथा-सुसमिद्धाय। (मा.सं. 3.2)

(ञ) **विसर्जनीयस्य प्रकृतिभावः**—शु.यजु.मा. संहितायां शषसेषु परे विसर्जनीयः विकारं न प्राप्नोति। यथा-आशुः शिशानः, अदितिः षोडशाक्षरेण। शाखान्तरेषु विसर्जनीयः शषसेषु प्रकृत्या न भवति यथा-

अद्भ्यस्सम्भृतः (काण्व सं.)

भगस्सरस्वती (काण्व सं.)

सदावृधस्सरवा (काठक सं.)

शु.यजुर्वेद मा.संहितायां विसर्जनीयः कखपफेषु परेष्वपि प्रकृत्या तिष्ठति।[31] यथा-

विष्णोः क्रमः (मा.सं. 12.3), ततः खनेम् (मा.सं.11.22)। इत्यादयः।

चतुर्णां वेदानां शिक्षाग्रन्थेषु सन्धिविषयिणी चर्चा विद्यते, लोके वेदे च सर्वत्र भाषायां सन्धिः अत्यन्तानिवार्यत्वे राजते। सामान्यतः वेदाङ्गव्याकरणे तथा शिक्षाग्रन्थे परस्परं ऐकमत्यं प्रतिभाति। तथाऽपि च प्रातिशाख्यादि-शिक्षाग्रन्थेषु संहितायां प्रयुक्तपदानां सन्धि-विषयकं ज्ञानं वैशिष्ट्येण विराजते। विस्तरभयात् अत्र केवलं यजुर्वेदस्य चर्चा विहिता तत्राऽपि दिग्दर्शनं शोधकर्त्रा कृतम्।

**सन्दर्भाः-**


1. तैत्तिरीयोपनिषद्, शिक्षावल्ली
2. ऋग्वेद 8.01.12
3. ऋ.भा.भूमिका पृ.118 द्वारा डॉ. वीरेन्द्र कु.वर्मा
4. वाजसनेयि प्रातिशाख्य 3/3
5. वाजसनेयि प्रातिशाख्य 1/158
6. माध्यन्दिन संहिता 21/61
7. माध्यन्दिन संहिता 36/08

8. तैत्तिरीय प्रातिशाख्य 05/01
9. तैत्तिरीय प्रातिशाख्य 24/03
10. पा.सू. 1/4/109
11. वा.प्रा. 1/1 पर उवट
12. वर्णरत्नप्रदीपिका शिक्षा।
13. तैत्तिरीय प्राति. 1/57
14. ऋ.सं.
15. वा.प्रा. 4.15 ङ् नौ क्ताभ्यां सकारे।
16. वा.प्रा. 2.25 स्वरश्छकारे चकारेण सर्वत्र।
    अत्र उ.भा.-पदाधिकारात् पदेष्वेव चकारेण व्यवधानं माभूदिति सर्वत्र ग्रहणात् संहितापाद-क्रमेष्वपि भवति।
17. वा.प्रा. 4.26 यस्यातिहाय सहेति न।
18. वा.प्रा. 4.15
19. वा.प्रा. 3.54 चन्द्रे सु शकारेण।
20. वा.प्रा. 3.53 परिकृते षकारेण।
21. वा.प्रा. 3.50 पत्यौ च सकारेण।
22. वा.प्रा. 3.51 ऋता वरौ न पतिपरयोः।
23. तैत्तिरीय प्राति. दीर्घं समानाक्षरे सवर्णपरे।
24. वा.प्रा. 4.54 कण्ठ्यादिवर्ण एकारम्।
25. तै.प्रा. 10.5 उवर्णपर ओकारम्।
26. वा.प्रा. 4.47 स्वरे भाव्यन्तस्याम्।
27. वा.प्रा. 4.48 सन्ध्यक्षरमयपायावम्।
28. वा.प्रा. 4.62 एदोद्भ्यां पूर्वमकारः।
29. प्रगृह्यं प्रग्रह इत्यनर्थान्तरम्। शु. यजुर्वेद प्रातिशाख्ये प्रगृह्यशब्दः प्रयुज्यते, कृष्णयजुर्वेदतैत्तिरीय-प्रातिशाख्ये च प्रगृहः। वा.प्रा. 4.87
30. वा.प्रा. 3.89, 90, 92, 92, 94 प्रकृत्या पदान्तीयः।
31. वा.प्रा. 3.11 प्रकृत्या करवयोः पफयोश्च।

सहायक-प्रोफेसर, वेद-विभागः, श्रीरणवीरपरिसरः

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# षट्प्रश्नोपनिषदि मुख्यप्राणतत्त्वम्

–डॉ. के.एल.पवनकुमारः

## प्रस्तावना

**हरिः ओम्।। वेदैश्च सर्वैरहमेव वेद्यः[1], अखिलाम्नायैकवेद्यो हरिः[2]**

**न वेदेषु पदं किञ्चिद्वर्णो वा व्यर्थ इष्यते।**
**यथायोगं चार्थभेद ऊह्यः सर्वत्र वेदिभिः।।[3]**

**वेदादिवर्णपर्यन्तैः मूर्तयः केशवस्य तु।**
**समासव्यासयोगेन वाच्यास्तात्पर्यतः पृथक्।।[4]**

**सर्वशब्दगताश्चैव वचनान्यखिलान्यपि।**
**स्वतन्त्रत्वात्प्रवर्तन्ते व्यावृत्तेऽप्यखिलाद् रवात्।।**

**तत्सम्बधात्तु जीवेषु तत्सम्बन्धादचित्स्वपि।**
**वर्तन्त उपचारेण तिङ्पदान्यखिलान्यपि।।**

**तस्मात्सर्वगतो विष्णुरेकोऽभिच्च ततो बहुः।। इति च[5] नारायणश्रुतिः।।**

इत्यादिप्रमाणवचनैः ज्ञायते यत् समस्तवेदमारभ्य ऋगादिशाखाष्टकाध्यायसूक्तवर्गऋगर्धर्च-पादर्चद्वारा वर्णपर्यन्तः सर्वोऽपि वर्णसमुदायः परममुख्यवृत्त्या स्वातन्त्र्येण परब्रह्मण एक वाचक इति। एतादृशब्रह्मतत्त्वं हि सत्सम्प्रदायाभिज्ञशिक्षितबुद्धेरेव वेदेषु पदसमन्वयेन वा वाक्यसमन्वयेन वा भासते इति [6]तात्पर्यनिर्णयपञ्चमाध्याये श्रीमन्मध्वाचार्याः।

**इमा उ त्वा पस्पृधानासो अत्र मन्द्रा गिरो देवयन्तीरुपस्थुः**[7]। हे [8]इन्द्रनामक भगवन्। मन्द्राः – मन्द्रस्वरोपेताः, देवयन्तीः – मुख्यतः इन्द्रादिदेवताप्रतिपादकाश्चेदपि, इमा गिरः – एताः वेदवाचः, पस्पृधानासः – स्तोत्रकरणविषये अहमहमिकया स्पर्धमानाः, त्वा उ – त्वामेव, उपस्थुः – परममुख्यवृत्त्या महातत्पर्येण च प्रतिपादयन्ति। **परोक्षप्रिया इव हि देवाः**[9]। अतः वेदोऽपि परोक्षतयैव भगवन्तं प्रतिपादयति। एतादृशशब्दब्रह्मणोऽभिव्यक्तिः कथमित्युक्ते **भूतेषु घोषरूपेण**[10] इति कृष्णस्य उत्तरम्। अध्यापकानां पाठेन शब्दब्रह्म-वेदः शिष्यपरम्परां वध र्यति। मुख्यप्राणदेवः एकाशीतिभाषावैचित्र्ययुक्तवेदराशिमेनं रुद्रादिभ्य उपदिश्य, तस्य रहस्यार्थान् प्रकटयति, इति भागवतं वक्ति[11]।

वसिष्ठऋषयः विश्वनामकवायुदेवः भगवान् वेदमुख्यप्रतिपाद्यः इति, मामुपदिदेशेति स्वानुभवं शिष्यपरम्परां प्रति कथमुपदिदिशुः, तद्रीतिं **धेनुं नत्वा** इति मन्त्रे ऋग्वेद [12]उल्लिखति।

एवं [13]श्रीमुख्यप्राणदेव एव कलौ युगे वेदार्थचिन्तनमार्गावबोधनार्थं श्रीमन्मध्वाचार्यो भूत्वा ऋग्भाष्यम् अरचयत्। परमपुरुषस्य परविद्याप्राप्त्यर्थं कृता सम्प्रदायानुसारिणी प्रार्थनेयम् – **शिक्षा शचीनां पते पूर्वीणां पुरूवसो** इति मन्त्रस्य व्याख्यानसन्दर्भे मध्वाचार्याणां कर्मनिर्णये[14] दृश्यते। यास्कोऽपि [15]निरुक्ते **अयं मन्त्रार्थचिन्ताध्यूहोऽपि श्रुतितः** इति परम्पराद् आगतोऽर्थः गुरुद्वारा श्रुत्वा ज्ञातव्यः इत्यवदत्। अतः ज्ञानिभिः, यतिवरेण्यैः कृतेषु वेदव्याख्यानेषु सज्जन-ग्राहित्वम्, बुद्धिकौशलमात्रेण कोशबलेन च कृतेषु वेदव्याख्यानेषु तदग्राहित्वं च दरीदृश्यते।

अतः ज्ञानिवरेण्यैः श्रीमन्मध्वाचार्यैः कृतेषु संहिता-ब्राह्मण-आरण्यक-उपनिषद्भाष्येषु अन्यतमं षट्प्रश्नोपनिषद्भाष्यमाधारीकृत्य षट्प्रश्नोपनिषत् कथं मुख्यप्राणस्य जीवोत्तमत्वम्, तदन्तर्गतविष्णोश्च सर्वोत्तमत्वं चोद्घोषयतीति यथाशक्ति पत्रेऽस्मिन् निबध्यते। उपनिषदि मुख्यप्राणभारतीदेव्योः सृष्टिक्रमः, ततः जगत्सृष्ट्यर्थं मुख्यप्राणभारत्योः उदयः, मुख्यप्राणभारत्योः कालनियामकत्वम्, मुख्यप्राणस्य जीवोत्तमत्वम्, सर्वाधारो मुख्यप्राणः, मुख्यप्राणस्य प्रभुत्वम् इत्याद्यंशाः यथाक्रमं प्रतिपाद्यन्ते।

**मुख्यप्राणभारतीदेव्योः सृष्टिक्रमः-**

**स मिथुनमुत्पादयते। रयिं च प्राणं चेति। एतौ मे बहुधा प्रजाः करिष्यथ इति। आदित्यो ह वै प्राणो रयिरेव चन्द्रमाः[16]॥**

प्रजानां परिपालकः प्रजापतिर्विष्णुः विविधाः प्रजाः सिसृक्षुः आदौ मुख्यप्राणभारतीदेव्योः सृष्टिं चकार। यतो हि तौ विविधाः प्रजाः सृजतः। अहं तु तत्र सन्निविष्टः ताभ्यां सृष्टिं कारयामि इति। सूर्यचन्द्रादीनां सृष्टौ आदित्यनाम्ना मुख्यप्राणः सूर्यान्तर्गतो भूत्वा, चन्द्रमा नाम्ना भारती अपि चन्द्रान्तर्गता भूत्वा सृष्टिकार्यं चक्रतुः। तदुक्तं भाष्ये"

**स वायुं सूर्यनामानं चन्द्रनाम्नीं सरस्वतीम्।**
**सूर्याचन्द्रगतौ देवः ससर्ज पुरुषोत्तमः।**
**तावाविश्य स्वयं विष्णुः सर्वसृष्टीः करोत्यजः[17]॥**

सकलदिक्पालकान्तर्यामी मुख्यप्राणः **रयिर्वा एतत्सर्वं यन्मूर्तं चामूर्तं च। तस्मान्मूर्तिरेव रयिः। अथाऽदित्य उदयन् यत्प्राचीं दिशं प्रविशति तेन प्राच्यान् प्राणान् रश्मिषु सन्निधत्ते। यद्दक्षिणां यत्प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदन्तरा दिशो तत्सर्वं प्रकाशयति तेन सर्वान् प्राणान् रश्मिषु सन्निधत्ते[18]।**

भारतीयदेवी सर्वत्र वर्तते। तथाहि – पृथिवी जलं तेज इति मूर्तपदार्थाः, तथा अवशिष्टाः प्रकृत्यादय अमूर्तपदार्थाः। एते एव जगतः उपादानकारणानि। परमात्मनः इच्छानुरूपं मूर्तपदार्थेषु भारतीदेवी, अमूर्तपदार्थेषु मुख्यप्राणः च तिष्ठति। एतौ मूर्तामूर्तपदार्थानां कृते जगत्परिणामशक्तिप्रदानेन परमात्मनः ब्रह्माण्डसृष्टौ निमित्तौ भवतः। सूर्यस्थितो मुख्यप्राणः उदयन् सर्वासु पूर्वपश्चिमोत्तरदक्षिणोर्ध्वाधोदिगभिमानिदेवतासु स्वमरीचिपूर्वकान्तर्यमित्वेन स्थित्वा ताभ्यः तत्तदिगस्थपदार्थानां सृष्टिं कारयति। तत्र निमित्तकारणेऽपि भवतः।

तदुक्तं भाष्ये-

**अमूर्तस्थः स वायुस्तु मूर्तसंस्था सरस्वती।**
**आदित्यस्थः स वायुस्तु प्राणानात्मनि सन्नयेत्॥**

**प्राच्याः प्राणस्तथेन्द्राद्या दक्षिणाश्च यमादयः।**
**प्रतीच्या वरुणाद्यास्तु सोमाद्या उत्तमाः स्मृताः॥**

**शेषमित्राववाचीनौ वीन्द्रकामावुदक्तनौ।**
**सभार्याः कोणपैः सार्धं चत्वारो दिश्यपि[19]॥**

### जगत्सृष्ट्यर्थं मुख्यप्राणभारत्योः उदयः-

**स एव वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते। तदेतदृयाऽभ्युक्तम्। विश्वरूपं करिणं जातवेदसं पारायणं ज्योतिरेकं तपन्तम्। सहस्त्ररश्मिः शतधा वर्तमान प्राणः प्रजानामुदयत्येष सूर्यः[20]॥**

आदित्यान्तर्गतोऽयं मुख्यप्राणः पूर्णरूपः, सर्वमत्तीति, नाम संहरतीति अग्निनामको वर्तते। तादृशः प्राणः शाकदान, जीर्णकरण, शुष्करणादिक्रियाभिः सकलजीवसृष्टौ कारणीभवन् उदयते इति अभिप्रायः पूर्वोक्तमन्त्रे विराजते।

### मुख्यप्राणभारत्योः कालनियामकत्वम्-

परब्रह्म परमात्मा संवत्सरेऽन्तर्भूत्वा जीवानां सृष्ट्यां कारणं भवतीति शास्त्रप्रसिद्धम्। तत्संवत्सरस्य सूर्यगत्या ज्ञातुं योग्यं देवयानपितृयानमार्गद्वयं तदभिमानिदेवताभिमन्यमानं भवति। तदेव दक्षिणायनमुत्तरायणमिति। अयनद्वयेऽपि भारतीमुख्यप्राणौ अन्तर्गतौ भूत्वा नियामकौ भवतः। साधकेषु ये सन्तत्यादिलौकिकफलापेक्षिणो भूत्वा यागम्, अन्नदानादिकं तथा इतरकर्माणि कुर्वन्ति ते पितृयानमार्गं प्राप्य केवलं चन्द्रलोकं प्राप्नुवन्ति। ततः वैश्वानरादिलोकमगत्वा क्षीणे सति पुण्ये चन्द्रलोकात् पुनरागच्छन्ति। एवं पितृयानमार्गगामिनः पुनरावृत्तियुक्तचन्द्रलोकप्राप्तेः श्रुतत्वात् चन्द्रस्था भारती एव दक्षिणायननियामिका इति ज्ञातव्यम्।

### एतदुक्तं षट्प्रश्नोपनिषदि सप्तमे मन्त्रे

**संवत्सरो वै प्रजापतिः। तस्यायने दक्षिणं चोत्तरं च। तद्ये ह वै तदिष्टापूर्ते। कृतमित्युपासते ते चान्द्रमसमेव लोकमभिजयन्ते। त एव पुनरावर्तन्ते। तस्मादेते ऋषयः प्रजाकामा दक्षिणं प्रतिपाद्यन्ते। एष वै रयिर्यः पितृयाणः** इति।

केचन मुमुक्षवः कृच्छ्रचान्द्रायणादिरूपतपसा ब्रह्मचर्येण आस्तिक्यबुद्ध्या, वेदान्तशास्त्र-सम्पादितज्ञानादिना परमात्मानं सम्यग्विचिन्त्य ज्ञात्वा, देवयानमार्गेण गत्वा आदित्यं प्राप्य परब्रह्म प्राप्नुवन्ति। एतद्देवयानप्राप्यं परब्रह्मैव इन्द्रादिदेवतानाम् आश्रयः। अयमेव मुक्तिप्रदो भयरहितश्च। अयमेव मुक्तैः मुख्यप्राप्यः।

अत एव देवयानमार्गगामिणो न पुनरावर्तन्ते। अपुनरावृत्त्ययोग्यानां काम्यकर्मिणां कृते मार्गमेनं निरोधयति। अतः आदित्यान्तर्गतस्य प्राणस्य "**निरोधः**" इति छन्दोग्योपनिषदि नाम वर्तते। गम्यदेवतैव मार्गस्य, तदभिमानिदेवतानां च नियामकत्वेन, देवयानमार्गस्य अभिमानिष्वन्यतमायाः नियामकत्वेन, देवयानमार्गस्य अभिमानिष्वन्यतमायाः उत्तरायणाभिमातिदेवतायाः मुख्यप्राणः नियाम-कश्चेत् उत्तरायणस्यापि स एव नियामको भवति। तदुक्तमुपनिषदि षट्प्रश्ने अष्टमे मन्त्रे "**अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया आत्मानमन्विष्याऽदित्यमभिजयन्ते। एतद्वै प्राणा-नामायतनमेतदमृतभयमेतत्परायणमेतस्मान्न पुनरावर्तन्त इत्येषः निरोधः।**" इति।

**मुख्यप्राणस्य जीवोत्तमत्वम्-**

षट्प्रश्नोपनिषदि भृगुपुत्रो वैदर्भिः पिप्पलादमपृच्छत्[21] यत् - पूज्याः! कति देवताः जीवराशिं पालयन्ति। तथा कति देवताः जन्यजीविभ्यो विषयपदार्थानां ज्ञानं प्रददति। अर्थात् भगवान् कान् निमित्तीकृत्य सकलजीवराशीनां स्थितिकारणं, ज्ञानदोऽपि भवति? एतासां देवतानां मध्ये कः श्रेष्ठः? पूर्वोक्तरीत्या मुख्यप्राण एव श्रेष्ठः स्यात्। किमर्थं च स श्रेष्ठः? इति। पिप्पलादः वैदर्भिमवदत्[22]। आकाशः भूतवायुः अग्निः आपः पृथिवी, वाक्, मनः, एतेषामभि-मानिदेवताः तथा मुख्यप्राणादयः सकलतत्त्वाभिमानिदेवताः सकलजीवानां स्थितिकारणानि, ज्ञानदायिकाश्च। एतासु चक्षुश्रोत्रादिज्ञानेन्द्रियाभिमानिदेवताः ज्ञानदायिकाः। अवशिष्टाः स्थिति-कारणीभूताः। धारकाः प्रकाशकाश्च ताः देवताः एकदा "वयमेव शरीरं मुख्यतया धरामः, वयमेव मुख्यत्वेन ज्ञानदाः" इति परस्परं स्पर्धया विवदमानाः समभवन्।

एवम् अहङ्कारेण परस्परकोलाहलमग्नान् देवान् उद्दिश्य मुख्यप्राणोऽकथयत् यत् "अहं प्राणापानादिपञ्चरूपेण जीवानां शरीरेऽस्मिन् स्थित्वा तान् धरामि, ज्ञानमपि प्रददामि। अतः वयमेव मुख्यतया धारकाः ज्ञानदाश्चेति मा भ्रमन्तु" इति। मुख्यप्राणस्य वचनेऽस्मिन् देवताः विश्वासं न प्रादर्शयन्। तदा मुख्यप्राणः तासां देवतानां विश्वासोत्पादनार्थं शरीरं त्यक्त्वा उपरि प्रस्थितवान्। तदा आकाशाभिमान्यादिदेवताः सर्वाः शरीरं धर्तुम् असमर्थाः तथा शरीरे स्थातुमपि असमर्थाः भूत्वा शरीरात् बहिः निसृताः। यदा तु मुख्यप्राणः शरीरं प्राविशत् तदा सर्वाः देवताः शरीरं प्रविश्य शरीरधारणे, शरीरे स्थातुमपि शशाकुः।

[23]लोके मधुमक्षिकाः प्रधानमक्षिकामनुसृत्य व्यवहरन्ति। यदि मध्वागारं त्यक्त्वा प्रधान-मक्षिका गच्छति तदा सर्वाः मक्षिकाः तामनुसरन्ति। मध्वागारं यदि सा प्रविशति तदा सर्वा अपि मक्षिकाः तत्स्थानं प्रविशन्ति। एवमेव वागाद्यभिमानिदेवताः यथामुख्यप्राणं शरीरमनुप्रविशन्ति निर्गच्छन्त्यपि। एवं (मुख्यप्राणस्य सत्वे शरीरे सर्वासां देवतानां स्थितिः, तस्य निर्गमने सकलानां निर्गमनम्) रूपेण अन्वयव्यतिरेकव्याप्त्या मुख्यप्राणस्य श्रेष्ठत्वं निर्धारितम्। अनेन सुप्रीताः सकलदेवताः मुख्यप्राणमेवमस्तुवन् यत् एष मुख्यप्राण एव सूर्याग्निनाम्ना सूर्याग्निस्थः सूर्याग्न्योः तपनक्रियां करोति। अयमेव पर्जन्यः, इन्द्रः, भूतवायुः, पृथिवी, वित्तं, मूर्तः, अमूर्तः, मुक्ताः, इत्यादिषु अधिकरणेषु एतदेतन्नाम्ना विद्यमानः सन् तेषां तेषां कार्यं निर्वहति।

## सर्वाधारो मुख्यप्राणः-

[24]रथचक्रस्य मध्यभागमाश्रित्य अराः यथा तिष्ठन्ति तद्वत् सकलमपि वस्तुजातं मुख्यप्राण-माश्रित्य तिष्ठति। उदाहरणार्थम् ऋग्वेदयजुर्वेदसामवेदानामभिमानिदेवताः, यागः ब्राह्मणजातिः, क्षत्रियजातिः, इत्यादि वस्तुजातं मुख्यप्राणाश्रितं दृश्यते। अतः हे मुख्यप्राण भवानेव दक्षप्रजा-पत्यादिषु स्थित्वा गर्भस्थजीवं प्रेरयितुं गर्भे सञ्चरति। शिशोः जननक्रियां भवानेव कारयति। सकलशरीरेषु इन्द्रियाभिमानिदेवताभिः साकं शरीरं धृत्वा भवानेव भवतीत्यतो सकलजीवाः भवदधीना एव। त्वमेव अग्निस्थः सन् देवतानां हविर्भागं नयसि। पितॄन् प्रति तिलोदकपिण्डादि-कमपि त्वमेव नयसि। अथर्वाङ्गिरसादिमहर्षीणां सदाचारः, सत्यवचनं सर्वं त्वच्छक्त्यैव सफलं भवति।

एवं देवाः मुख्यप्राणं स्तुवन्तः, [25]हे प्राण, भवान् पर्जन्ये स्थित्वा यदा वर्षयति तदा सकलजीवाः "अस्माकं यथेष्टं मिलति आहारः" इति तुष्यन्ति। व्रतनिष्ठोऽथर्ववेदद्रष्टा एकर्षिः त्वमेव। सर्वेषां संहारकर्तारः यमादयोऽपि त्वमेव। त्वमेव सज्जनानामधिपतिः। वयं सर्वे देवाः त्वत्पूजाकाः। हे प्राण, त्वमेव अस्माकं पिता। वागिन्द्रिये श्रोत्रेन्द्रिये चक्षुरिन्द्रिये मनस्सु, तथा इतरतत्त्वेषु यानि तव रूपाणि कार्यं कारयन्ति तानि सर्वाणि रूपाणि प्रशान्तय। तानि तत्त्वानि विहाय मा गच्छ। यतो हि तानि सर्वाणि तत्त्वानि त्वदधीनानि। न केवलं भवान् अध्यात्मधारकः, अपि तु अधिदैव-अधिभूताधारकोऽपि। सकलेन्द्रियेषु अपि स्थित्वा तत्तदिन्द्रियप्रेरको भूत्वा, माता पुत्रान् यथा रक्षति तथा अस्मान् सर्वान् रक्षतु। अस्मभ्यं जीवरक्षणाशक्तिं जीवानां कृते ज्ञानदानशक्तिमपि प्रददातु।

## मुख्यप्राणस्य प्रभुत्वम्-

[26]आश्वलायनपुत्रः कौसल्यः पिप्पलादं प्रति एवमपृच्छत् यत् पूज्याः, मुख्यप्राणोऽयं कस्मात् प्रभवति? अर्थात् महामहिमशालिनः मुख्यप्राणस्य उत्पत्तिः भगवतोऽपि कथं साध्या? शरीरेऽस्मिन् प्राणोऽयं कस्मात् कार्यं निर्वहति? आत्मानं पञ्चधा विभज्य कथं व्यवहरति? नाम कानि तानि रूपाणि? कुत्र कुत्र केन केन रूपेण कार्यं निर्वहति? केन रूपेण जीव-परमात्मानौ भृत्वा शरीराद्बहिः निःसरति? केन रूपेण शरीराद्बहिः अधिभूतम् अधिदैवम् च धरयति? इति।

पिप्पलादः आश्वलायनं प्रति एवं वदति- [27]मुख्यप्राणः महामहिमश्चेदपि सः परमात्मनः जायते। यतो हि शरीरस्य छाया यथा शरीराधीना तथैव सर्वमपि परमात्माधीनमेव। परमात्मा मुख्य-प्राणापेक्षया अधिकमहिमशाली। अतः मुख्यप्राणो भगवतो जायत इत्यत्र नास्ति संशयलेशः।

[29]परमात्मनः प्रेरणया शरीरेऽस्मिन् मुख्यप्राणः शरीरकार्यान् सर्वान् निर्वर्तयति। यथा कश्चन चक्रवर्ती स्वसामन्तराजन् "भवान् पाटलीपुत्रस्य अधिपतिर्भवतु। भवान् कौशाम्ब्याः अधिपतिर्भवतु" इत्यादिरीत्या दत्तादेशस्तान् तत्तत्स्थाने नियुङ्क्ते, तथा मुख्यप्राणः इतरप्राणापानादीन् स्वेच्छानुगं भिन्नभिन्नस्थाने भिन्नभिन्नकार्येषु (नियमयति) योजयति।

[30]विष्णोः सकाशात् मुख्यप्राणः समजनि। मुख्यप्राणात् प्राणापानादिदेवताः समुत्पन्नाः। मुख्यप्राणः स्वस्मात् भिन्नान् स्वोत्पन्नान् प्राणादीन् राजा इव, तत्तत्कार्येषु नियोजयति। समर्थः स मुख्यप्राणः स्वस्वाद्भिन्नेषु प्राणापानादिषु, स्वयं प्राणादिपञ्चरूपेण स्थित्वा, मोक्षादिपुण्यलोकं भगवतोऽनुज्ञया प्रददाति इति "प्रभञ्जन" नामकग्रन्थे उक्तमस्ति।

[31]अयं मुख्यप्राणः मलादिपदार्थान् बहिःप्रेषणेन प्राप्तापाननामकमपानवायुं स्वस्य अपान-नामकरूपेण युक्तं कृत्वा (संयुज्य) पायूपस्थयोः संस्थापयति। नेत्रकर्णमुखनासिकास्वपि मुख्यप्राणः स्वयं प्राणरूपेण प्राणवायौ स्थित्वा कार्यं निर्वहति। समानः समानवायौ स्थित्वा प्राणापानादीनां मध्ये, अर्थात् नाभिप्रदेशे तिष्ठति। समानवायुरयं भुक्तमन्नं शरीरस्य सकलाङ्गानां कृते समानतया नयति। अत एव वायोरस्य नाम "समानवायुः" इति।

समानवायुना अन्नं सर्वेन्द्रियं प्रति समानतया प्रापणादेव चक्षुः, श्रोत्रं, नासिका, रसना, चर्म, मनो-बुद्धिरिति सप्तज्ञानेन्द्रियाणि स्वकार्यनिर्वहणे समर्थानि भवन्ति। यतो हि आत्मा अणुरूपेण हृदयप्रदेशे वर्तते। तस्य विषयपदार्थैः सम्पर्कः इन्द्रियमूलकः, अतः इन्द्रियाणां साहाय्योऽत्यावश्यकः।

[32]शरीरे तावत् आहत्य द्विसप्ततिसहस्राणि नाड्यो भवन्ति। अन्नरसं नानाविधनाडीषु नयनात् व्याननामकः मुख्यप्राणः व्यानवायौ स्थित्वा नाडीषु एषु सञ्चरति। उदान इति मुख्यप्राणः उदानवायौ स्थित्वा, एतासु नाडीषु मुख्यायां सुषुम्नानाड्याम् उन्मुखस्सञ्चरति। जीवं तत्पुण्यं निमित्तीकृत्य मोक्षं नयति। एवम् ऊर्ध्वलोकनयनात् वायुरयम् उदाननामकोऽस्ति। अयं हि जीवस्य पापं निमित्तीकृत्य जीवं नरकं प्रति, यदि पुण्यपापे समाने तर्हि तदनुगुणं मनुष्य-लोकं प्रति च नयति।

[33]प्राणनामको मुख्यप्राण एव शरीराद्बहिः सूर्ये स्थित्वा सूर्यनामकः सन् उदयति। सूर्यस्थप्राण एव तेन सूर्येण साकम् अस्माकं नेत्रयोः स्थित्वा अत्रस्थं प्राणवायुम् अनुगृह्णाति। शरीराद्बहिः पृथिवीधारकोऽपाननामको मुख्यप्राण एव तया पृथिव्या सह देहस्थेऽपानवायौ स्थित्वा अपानवायुं धृत्वा देहे तिष्ठति। द्यावापृथिव्योः मध्यस्थस्य आकाशस्य धारकः समान इति नामकः मुख्यप्राण एव। तेनाकाशेन साकं शरीरे स्थित्वा शरीरस्थं समानं धरति। शरीरात् बहिर्वायोर्धारको व्याननामको मुख्यप्राण एव वायुना सह देहे स्थित्वा देहस्थं व्यानवायु धरति।

शरीराद्बहिः तेजोधारक उदाननामको मुख्यप्राण एव तेन तेजसा सार्धं शरीरे स्थित्वा तत्रस्थम् उदानवायुं धरति इति प्रथितविषयः। तेजस्स्थः उदान एव तेन तेजसा शरीरे स्थित्वा जीवानां जीवनकारणमभवत्। अत एव कस्यचन मनुष्यस्य शरीरस्थे तेजसि नष्टे तदा "उदान-वायुर्निर्गतः", इति ऊहयित्वा "मनसा सह लीनभूतैरिन्द्रियैः सार्धं मनुष्योऽयं जन्मान्तरं प्राप्नोतीति, नाम मरणमाप्नोत्" इति लोके जनास्तर्कयन्ति।

[34]जीवः मरणकाले यं शरीरं मनसा चिन्तयति, तद्विषयकमनसा युक्तः सन् मुख्यप्राणस्य समीपमागच्छति। मुख्यप्राणः स्वस्योदानरूपेण युक्तः सन् परमात्मना साकं जीवं तं धृत्वा, तेन जीवेन चिन्तितं शरीरं नयति। ये तु एतादृशमहिमोपेतं मुख्यप्राणं विजानन्ति तेऽत्राविच्छिन्नसन्ततिं,

मरणानन्तरं मोक्षं च लभन्ते।

भिन्नभिन्न श्रुतिसम्मतिरपिविषयेऽस्मिन् वर्तते। "परमात्मनो मुख्यप्राणस्योत्पत्तिम्, शरीरे तस्य प्रवृत्तिम्, तथा तस्यास्तित्वं, प्राणापानादिपञ्चविधरूपं स्वीकारं, अध्यात्मधारकत्वं, बाह्य-धारकत्वं, शरीरादुत्क्रमणं च ये सम्यक् जानन्ति ते मोक्षमाप्नुवन्ति।" अनया उपनिषदा सदृष्टान्तं मुख्यप्राणस्य जीवोत्तमत्वम्, विष्णोश्च सर्वोत्तमत्वं च प्रत्यपादि।

**पादटिप्पण्यः**

1. श्रीमद्भगवद्गीता 15 अध्यायः, 15 श्लोकः, तृतीयपादः।
2. व्यासराजकृतनवरत्नमालिकास्तोत्रम्।
3. ऐतरेयोपनिषद्भाष्यम् (4-2) उदाहृतशब्दनिर्णयवचनम्।
4. माध्वम्-ऋग्भाष्यम्। 98 पु.सं.।
5. माध्वे.ऋ.भा. उदाहृता। (द्रष्टव्या)
6. महाभारततात्पर्यनिर्णयः पञ्चमाध्यायः। (द्रष्टव्यम्)
7. ऋ.सं.7 मण्डल.18 सूक्तं.3 मन्त्रः।
8. इदि परमैश्वर्ये-इति धातुनोत्पन्न इन्द्रशब्दः परमैश्वर्यवन्तं नारायणमेव परममुख्यवृत्त्या वक्ति।
9. तै.ब्रा. 2 अष्टक, 3 प्रश्नः, 50 पनसः।
10. द्रष्टव्यम्।
11. भागवतम्। (द्रष्टव्यम्)
12. ऋ.सं.7 मण्डल.18 सूक्तं.4 मन्त्रः।
13. नाथः कलौ त्रियुगहूतिरनुद्बभूषुर्ब्रह्माणमप्यनवतारमनादिदिक्षुः।
    सर्वज्ञमन्यमनवेक्ष्यस्वकार्यवीर्यं स्मेराननो भुवनजीवनमाबभाषे।। सुमध्वविजयः 2 सर्गः-1 श्लोकः
14. कर्मनिणर्य-विदामघवन् मन्त्रव्याख्यानसन्दर्भे।
15. 13-12
16. षट्प्रश्न उप. 4म.
17. षट् प्रश.उप.भाष्य 4.म.
18. षट्.प्रश्न.उप. 5
19. षट्.प्रश्न.उप.भाष्य. 5
20. षट्.प्रश्न.उप-6
21. अथ हैनं भार्गवो वैदर्भिः पप्रच्छ। भगवन् कत्येव देवाः प्रजा विधारयन्ते। कतर एतत् प्रकाशयन्ते। कं पुनरेषां वरिष्ठ इति। (षट्.प्र.उ. 2-1)

22. तस्मै स होवाच। आकाशो ह वा एष देवो वायुरग्निराप: पृथिविवाङ्मनश्चक्षु:श्रोत्रं च। ते प्रकाश्या अभिवदन्ति। वयमेतद्बाणमवष्टभ्य विधारयाम इति। षट् प्र.उ. 2-2

23. तान् वरिष्ठ: प्राण उवाच। मा मोहमापद्यथाहमेवैतत्पञ्चधाऽत्मानं विभज्य एतद्बाणमवष्टभ्य विधारयामीति। तेऽश्रद्धधाना बभूवु:। सोऽभिमानादूर्ध्वमुत्क्रमत इव। तस्मन्नुत्क्रामति अथेतरे सर्व एवोत्क्रमन्ते। तस्मिंश्च प्रतिष्यमाने सर्व एव प्रतिष्ठेते।। षट्.प्र.उ. 2-3

24. तद्यथा मधुमक्षिका मधुकरराजानमुत्क्रामन्तं सर्वा एवोत्क्रमन्ते। तस्मिंश्च प्रतिष्ठमाने सर्वा एव प्रतिष्ठन्ते। एवं वाङ्मनश्चक्षुश्श्रोत्रं चेति। ते प्रीता: प्राणं स्तुवन्त्येषोऽग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायुरेष पृथिवी रयिर्देव: सदसच्चामृतं च यत्।। षट्.प्र.उ. 2-4

25. अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम्। ऋचो यजूंषि सामानि यज्ञ: क्षत्रं च ब्रह्म च। प्रजा-पतिश्चरसि गर्भे त्वमेव प्रतिजायसे। तुभ्यं प्राणप्रजास्त्विमा यत्प्राणौ: प्रतितिष्ठसि। देवानामपि वह्नितम: पितृणां प्रथमा स्वधा। ऋषीणां चरितं सत्यम् अथर्वाङ्गिरसामपि। षट्.प्र.उ. 2-4

26. इन्द्रस्त्वं प्राण तेजसा रुद्रोऽसि परिरक्षिता। त्वमन्तरिक्षे चरसि सूर्यस्त्वं ज्योतिषां पति:। यदा त्वमभिवर्षस्य थेमा: प्राण ते प्रजा:। आनन्दरूपास्तिष्ठन्ति। कामायान्नं भविष्यतीति। व्रात्यस्त्वं प्राणैकर्षिरत्ता विश्वस्य सत्पति:। वयमद्यस्य दातार: पिता त्वां मातरिश्वा न:।। षट्.प्र.उ. 2-5

27. अथ हैनं कौसल्यश्चाश्वलायन: पप्रच्छ। भगवन् कुत एष प्राणो जायते? कथमायात्यस्मच्छरीरे। आत्मानं वा प्रविभज्य कथं प्रतिष्ठते। केनोत्क्रमते? कथं बाब्यमभिधत्ते, कथमाध्यात्ममिति। षट्.प्र.उ. 3-1

28. तस्मै स होवाच अतिप्रश्नान् पृच्छति ब्रह्मिष्ठोऽसीति। तस्मात्तेऽहं ब्रवीमि। आत्मत एष प्राणो जायते। यथैषा पुरुषे छाया एतस्मिन्नेतदाततम्। षट्.प्र.उ. 3-2

29. मनोकृतेनायात्मस्मिंश्छरीरे। यथा सम्राडेवाधिकृतान् विनियुङ्क्ते एतान् ग्रामानधितिष्ठस्वैतान् ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान् प्राणान् पृथक् पृथगेव सन्निधत्ते। षट्.प्र.उ. 3-3

30. विष्णोर्वायु: समुत्पन्नो वायो: सर्वाश्च देवता:। प्राणाद्यास्तान्नयन् प्राण आज्ञापयति राजवत् स्वयं च पञ्चरूपस्सन् दद्यान्मोक्षादिकं प्रभु:।। इति प्रभञ्जने।। षट्.प्र.उ.भाष्यम् 3-3

31. पायूपस्थेऽपानं चक्षु: श्रोत्रे मुखनासिकाभ्यां प्राण: स्वयं प्रतिष्ठते। मध्ये तु समान:। एष ह्येतद्धुतमन्नं समं नयति तस्मादेता: सप्तार्चिषो भवन्ति। हृदि ह्येष आत्मा। षट्.प्र.उ. 3-4

32. अत्रैतदेकशतं नाडानाम्। तासां शतमेकैकस्यां द्वासप्तति प्रतिशाखा नाडीसहस्राणि भवन्त्यासु व्यानश्चरति अथैकयोर्ध्वं उदान: पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलेकम्। षट्.प्र.उ. 3-5

33. आदित्यो ह वै बाह्य: प्राण उदयत्येष ह्येनं चाक्षुषं प्राणमनुगृह्णान: पृथिव्यां या देवता। सैषा पुरुषस्यापानमवष्टभ्यान्तरा यदाकाश: स समानो वायुर्व्यान: तेजो ह वा उदान:। तस्मादुप-शान्ततेजा: पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानै:। षट्.प्र.उ. 3-6

34. यच्चित्तस्तेनैष प्राणमायाति। प्राणस्तेजसा युक्त:, सहात्मना यथासङ्कल्पितं लोकं नयति। य एवं विद्वान् प्राणं वेद, न हास्य प्रजा हीयतेऽमृतो भवति तदेष श्लोक:। उत्पत्तिमायतं स्थानं

विभुत्वं चैव पञ्चधा। अध्यात्मं चैव प्राणस्य विज्ञायामृतमश्नुते। विज्ञायामृतमश्नुते। षट्.प्र.उप. 3-7

**परिशीलितग्रन्थसूची**


1. 12श्रीमन्युसूक्तं श्रीधर्मसूक्तम्-चतुर्वेदी प्रदीपसिंहाचार्यः। पूर्णप्रज्ञसंशोधनमन्दिरम्। बेङ्गलूरु, 2008
2. ऋग्वेदसंहिता-आर्.एल्.कश्यप्। श्रीअरोबिन्दोकपालिशास्त्रि इन्स्टिटूट् आफ वेदिक् कल्चर। बेङ्गलूरु।
3. महाभारततात्पर्यनिर्णयः। बन्नञ्जे गोविन्दाचार्यः। पलिमारुमठ। उडुपि।
4. श्रीमद्भागवद्गीता।
5. ऋग्भाष्यम्। आचार्य. के.टि. पाण्डुरङ्गि। द्वैतवेदान्तप्रतिष्ठानम्। बेङ्गलूरु।
6. सर्वमूलग्रन्थाः। दशोपनिषद्भाष्यगळु। डॉ. व्यासनकेरे प्रभञ्जनाचार्य। ऐतरेयप्रकाशन। व्यासनकेरे।
7. स्तोत्रमञ्जरी। डॉ. व्यासनकेरे प्रभञ्जनाचार्य। ऐतरेयप्रकाशन। व्यासनकेरे।
8. तैत्तिरीयब्राह्मणम्।


अतिथि-अध्यापकः, संस्कृतविभागः
(श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपति)

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# महाभारतयोगदर्शनयोः सम्बन्धः

-डॉ. शुभश्रीदाशः

महाभारतं नाम साहित्यसुधाम्बुधिर्यस्य विमर्थनेन सहस्त्रशः प्राप्तानि ज्ञानविज्ञानरत्नानि। बहुभिर्बहुधा रत्नाहरणे विहितेऽपि तस्य परिक्षीणता दृष्टा, यतोऽयं रत्नाकरः खलु। अत्र निमज्जनपावितान्मयिः समुद्धृतानि रत्नानि भारतीयसंस्कृतेरलङ्कारभूतानि स्वयमजस्रं प्रकाशन्ते, तमोविद्धलोक हृदयति चाचन्द्रार्कं प्रकाशयति।

विभिन्नरुचीनां जनानां हृदयावर्जने सर्वथा प्रभवतीदं काव्यम्। उपनिषत्सारभूतां गीतां मनोज्ञां मनसि सम्भाव्य केचिदेतदतिशयेताद्रियन्ते। अन्ये परमरमणीयैर्बलसावित्रीचरितादि विविधे रुपाख्यातैस्सम्भृतमिदं हृदि निधाय समर्चयन्ति। विदुर-भीष्मादि सदुक्तिसारं स्मारं स्मारं मोदन्ते चैके। इतरे श्रीकृष्णलीलाविलसितमिति भक्तिविमीलितलोचनाः शिरसि धारयन्ति। भारतीय धर्म कोश इति केचिद्बहुमन्वते। प्राचीनजनजीवनक्रमप्रदर्शने नूनं दर्पणायत इति परया श्रद्धया केचिदेतदनुधावन्ति। एकतः सहस्रशः क्षत्रवीराणां कर्तव्यपराणां विक्रमपरं कर्म, अपरत्र प्रशान्तचित्तानां ब्रह्मानन्दनिर्भराणां योगितां ज्ञानवैभवं, अन्यत्र यगवति परमपुरुषे भविते चेतसां पराभक्तिरिति कर्मज्ञानभक्तियोगानां समन्वये। भारताध्येतृणां जीवनं पवित्रीकरोति।

मानवसम्बन्धि न तत्क्षेत्रमस्ति यत्रेदं काव्यं ज्ञानप्रकाशं मवितरति। तदस्य विषय नूनमावलवृद्धातामापामर पण्डितानां महती श्रद्धा जागति। धर्मार्थकाममोक्षरुपैर्थैः पुरुषार्थे मानुषं जन्म साफल्यमियादिति वेदशास्त्रादीनामुद्घोषः तत्सर्गे काव्यमिदमाचष्टे। अपि च यदत्र वर्ण्यते तदेवान्यत्र ग्रन्थेषु लभ्यते। यदत्र नोपलभ्यते तदन्यत्र कुत्रापि नोपलभ्यत इति व्यासमहर्षेर्वाणी-

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न क्वचित्॥** (म.भा. 18.5.38)

इदं न केवलं भारतीयैः सहृदयैः कल्पलताकुसुममिव शिरसि श्रद्धया धार्यते। विश्वस्मिन्नैव सहृदयैर्विद्वद्भिर्विमर्शकैवच विशङ्कं बहुमन्यते। प्राचीनसंस्कृतसाहित्यविषये विशिष्य रामायण-महाभारतादि काव्यविषये यदुक्तमरविन्दमहोदयैस्तदत्रोलेखनयोग्यम्। तैश्च "प्राचीनसंस्कृत-साहित्यस्य प्राचीनश्रेण्यकृतयो गुणवत्तया संख्यया सोपज्ञतया च वर्ण्यवस्तुचयने, तदर्थव्यञ्जन-कलायां सौन्दर्यातिशयतया, मानवीयसत्वे स्योदारप्रकृतिनिरुपणे गुणगणताप्रसङ्गे कनिष्ठिकाधिष्ठिताः सन्ति। महाभारते मोक्षमार्गस्य तथा लोकयात्राया अपि तुल्यमवधानं प्रदत्तमित्यवगम्यते। महर्षिणा व्यासेन उक्तम्-

**ऊर्ध्वं बाहुर्विरोम्येष न च केश्चिच्छृणोति माम्।**
**धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते॥** मा.भा. 18.5.49

अत्र धर्मानुष्ठानं न केवलं मोक्षसाधनत्वेन किन्त्वर्थकामप्राप्त्युपायत्वेनापि विहितमित्यव-गम्यते। मानुजस्येहिकं पारलौकिकञ्च सौख्यसाधनमुपदिशहाद्रं काव्यम्। श्रीमद्भगवद्गीतायां, सतत्सुजातीये, भीष्मादिमहापुरुषाभिहिते सदुपदेशे च यथा निवृत्तिमार्गं, प्रोक्तः तथैव बहुधा राजनीतिरर्थनीतिर्वाणिज्यं कृषिः शिल्पं पशुपालनमित्येवमादि-प्रवृत्तिमार्गा अपि बहुत्र प्रतिपादितः।

"यतोऽभ्युदयनिः श्रेयससिद्धिः स धर्मः" इति यदुक्तं शास्त्रतये[1]। तदत्र महाभारते सोदाहरणं प्रस्तूयते। इन्द्रियाणि मनश्च संयम्यात्मदर्शनाविरोधेन लोकयात्रानिर्वाहणार्थं क्रमः सन्दिष्टः।

महाभारतं समुद्र इव यथागम्भीरो तथेवाकाश इव विशालश्च भवति। अस्य महाकाय त्वञ्च प्रतिपाद्यविषयबाहुल्यात् काव्यभाषाश्रयणाच्च सम्भूतयिति ज्ञायते। प्रतिपाद्यविषयव्याप्टि-

रनुक्रमणिका पर्वाणि भूतस्थानानि सर्वाणि रहस्यं विविधञ्चयत्। "वेदयोगं सविज्ञानं धर्मोऽर्थः काम एव च। धर्मकामार्थशास्त्राणि शास्त्राणि विविधानि च। म.भा. 1.1.46

## योगदर्शनस्य स्वरूपं महत्वं प्रयोजनञ्च

भारतीयास्तिकदर्शनेषु षट्सु सांख्ययोगावन्यतमौ। तत्र कपिलोपक्षं सांख्यदर्शनं पतञ्जलयुपक्षञ्च योगदर्शनम्। उभयोस्सिद्धान्तयोरल्पमात्रवैलक्षण्यवशादुभे च सह स्मर्येते। सांख्यदर्शने पञ्चविंशतितत्त्वान्यभ्युपगतानि। योगदर्शने षड्विंश ईश्वरोऽभ्युपगते इत्यनयोरन्तरम्। उभयोरपि दर्शनयोः प्रत्यक्षानुमानशब्दरूपप्रमाणत्रयमङ्गीक्रियते। कालतः सांख्यदर्शनं पूर्वं योगदर्शनं परमिति केचन मन्वते। उभेऽपि दर्शने उपनिषदुपवृह्वित इति श्रीमच्छङ्कराचार्यः प्राहुः। (3) ब्रह्मसूत्रभाष्यम्-(2) Outlines of Indian Philosophy M. Hini yanna.

योगदर्शनं प्राधान्येन साधननिरूपणपरम्। पञ्चभूतात्मके देहे, ब्रह्माण्डे यानि तत्त्वानि सन्ति तानि सर्वाणि भवन्ति। मानवेदेहे तत्त्वसाक्षात्करणाय सोलभ्यमस्ति। त्रिगुणात्मकस्य मनसः नियमनाय विधानं योगोविधत्ते। रजोगुणप्राधान्ये मनश्चञ्चलं भवति। तमसोद्रेके निद्धालस्यादिवशाज्जहं भवति। सत्वोद्धेके मनसएकग्रता सम्भवति। मनसः संयमनञ्चेन्द्रिय संयमद्वारा साध्यम्। अत इन्द्रियसंयमनार्थं यमनियमदिसाधनानि विधीयन्ते।

लोके सर्वोऽपि जनो देहस्थेन्द्रियाणां मनसे। बुद्धेश्च सौख्यमसौख्यञ्च नित्यमनुभवति। देहादीनां सौख्यमिच्छन्नपि तत्प्राप्तिहेतूपायज्ञाना भावात् सौख्यं न प्राप्नोति लोकः। इन्द्रिय विषयेषु समासक्तः तत्रैव सौख्यं लब्धुमीहते। अलब्ध्वोऽपि न विरमति। तत्रैव रमते। एवं विषय सम्बद्धस्य मनसो नियमन विधानं योगदर्शनमुपदिर्शाता सर्व सुखदुखानां मनोमूलत्वेन तत्र प्रभुत्वे सम्पादनार्थं योगदर्शनं सर्वेरयोपि महदुपकारकं भवति। अद्य योग दर्शनं देशविदेशेषु जनैरुपास्यमानं प्रसिद्धञ्चास्ति। तत्र प्रधानं कारणं चेन्द्रियविषयेषु रममाणास्तत्र सौख्यं शान्तिञ्चालभमाना आधुनिकविज्ञान साधन सम्पन्नेष्वपि वेद्यालयेषु रोगपरिहार मलब्ध्वा मार्गान्तर मन्विषय जनायोगमासेवितुमीहन्ते। देहादीनामसौख्ये सम्पदि विद्यमानायामपि न किञ्चित्सुखं लभ्यते। देहादीनां सौख्ये सम्पदभावेऽपि महती तुष्टिर्भवति। योगदर्शनं देहादारभ्य सर्वक्षेत्रेषु चिकित्साविधानमनुशास्ति। भगवद्गीतायां भगवान् श्रीकृष्णः प्रयोगो भवति दुःखहा इत्याह। महर्षिर्याज्ञवल्कयः "अयन्तु परमो धर्मो यद्योगेनात्मदर्शनम्"।[2] इति योगमात्मदर्शनसाधनत्वेन प्राह। कृत्स्नं हि शास्त्रमिन्द्रियजयः[3] इति कौटिल्येनप्रोक्तः शास्त्रसारभूते इन्द्रियजयो योगोपासनया साध्यः। अमृतबिन्दूपनिषदि मन एक मनुष्याणां कारणं बन्धमोक्षयोः। इति मनसो बन्धमोक्षकारणत्ममुक्त्वा मोक्षार्थं निरोधविधिरुपदिश्यते। "योगश्चितवृत्ति निरोधः" यो.सू. 1-2 इति पतञ्जलिमहर्षिणापि चित्तस्य वृत्तिनिरोधोमिहितः। चित्तवृत्तिनिरोध एक योगः। गीतायां महाभारतेन्यत्र च योगदर्शन मिदमुपदेशसारत्वेन वरीवति।

## महाभारतयोगदर्शनयोः सम्बन्धः

महाभारतस्य योगदर्शनस्य च बहुप्रकारैः सम्बन्धोऽवगम्यते। यतोहि महाभारतं सहस्त्रशः

पात्रैः लोके सम्भाव्यमानघटनाभिभाषया समुचितया च विभूषितं महाकाव्यम्, उपाख्यानातिशतशः सन्ति यानि साक्षात्परम्परया च सदुपदिशन्ति। पात्रमुखादुपदेशः रूपेण वाच्यवृत्त्या प्रसङ्गैर्व्यञ्जनया च वर्णाश्रमधर्मस्य श्रेष्ठतानुष्ठेयता च प्रतिपादिता भवति। तत्र सर्वत्र देहेन्द्रियमनसां संस्करण-विधिर्भवत्येका धर्मानुष्ठानात् श्रेयः प्रेयोवा देहेन्द्रियमनोरुपाधिष्ठानानि परित्यज्य न प्रवर्तेत। सुखं वा दुःखं वा देहमिन्द्रियणि मनस्नाधिष्ठायाभिव्यञ्जतो। योगदर्शनं देहस्थेन्द्रियाणां मनसश्च स्वस्थतासम्पादकसाधनानि प्राधान्येन प्रदर्शयति। एवञ्च धर्मानुष्ठानस्य योगसाधनानुष्ठानस्य च फलं देहेन्द्रियमतांस्थधिष्ठायैव प्रकटयते। योगसाधनानां धर्मानुष्ठानस्य च पुरुषार्थात्मकं फलं तुल्यमेव। एवञ्च धर्मस्य योगस्य च सम्बन्धीगावगम्यते। कविश्च काव्येऽस्मिन् पात्र विशेषे रनन्ताश्चितवृती स्वगमयति। चित्तवृत्तिसंयमाद् यानि फलानि भवन्ति तानि च प्रदर्शयति। बाह्यसम्पदामचिरस्थायित्वं क्वचिद्वाच्यवृत्या क्वचिद्व्यञ्जनया च बोधयति। भगवद्गीता च साक्षात् कर्मज्ञानभक्तियोगप्रभृति साधनसम्पदं बहुधोपदिशति। एवमादिरूपेण परिशील्यमाने महाभारतस्य योगदर्शनस्य च महान् सम्बन्धो विज्ञायते।

**सन्दर्भः-**

1. वैशेषिकदर्श सू-1-2
2. या-स्मृ- 1-8
3. अ.शा. 3-6

**सन्दर्भग्रन्थः-**

महाभारतम्-ग्रीताप्रेस

महाभारतकालीन समाज, सुखमय भट्टाचार्य

पातञ्जयोगसूत्राणि-वासुदेव शास्त्री

योगवान्तिकम्-पा.यो.सू. 2-19

उपनिषद्भाष्यं श्रीमच्छङ्कराचार्याः - आपटेकर कम्पनी (पुणे)

पातञ्जरहस्यम् - प. दामोदर शास्त्री, वाराणसी

महाभारतम् - भण्डारकर शोध संस्था, 1933, पुणे

योगकल्पद्रुमः - स्वामि ब्रह्मानन्दः, मुम्बई

योगपनिषदः - सं-पण्डितमहादेव शास्त्री

इन्दुमतीमिश्रा - महाभारत मे हिन्दु प्रतिमा विज्ञान के मूलस्रोत, 1987, इलाहाबाद

सहायक-प्रोफेसर, शिक्षाशास्त्रविभागः

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# हरबर्टीयविधेः गुणदोषविमर्शः

–डॉ. मदनसिंहः

हरबर्टीयपाठयोजना प्राचीनतमपाठयोजनासु अन्यतमा भवति । सुप्रसिद्धशिक्षाशास्त्रि-मनोवैज्ञानिकहरबार्टमहोदयस्य सिद्धान्तानामाधारेण तेषां शिष्यैः एषा पाठयोजनाप्रणाली प्रस्तुता। नैकासु प्रशिक्षणसंस्थासु एतस्याः शिक्षणे पञ्चपदानि (Five Steps in Teaching) प्रयुज्यन्ते। तद्यथा –

1. प्रस्तावना / उन्मुखीकरणम् (Preparation/Motivation)
2. प्रस्तुतीकरणम् / प्रदर्शनम् (Presentation)
3. तुलना/ अमूर्तीकरणम् (Comparision and Abstraction)
4. सामान्यीकरणम् (Generalisation)
5. प्रयोगः/अनुप्रयोगः (Application) इति।

इत्थं हरबार्टमहोदयस्य पञ्चानामपि पदानां प्रयोगः शिक्षणे सरलतां गुणवत्ताञ्च सम्पादयति।

**हरबार्टपञ्चपदीविधेः गुणाः –**

1. विधिरयं मनोवैज्ञानिकसिद्धान्तेष्वाधारितो भवति।
2. विधावस्मिन् छात्राणां ज्ञानस्य विकासः क्रमबद्ध-व्यवस्थितरूपेण च भवति । अनेन अर्जितज्ञानं स्थायि भवति।
3. अस्मिन् विधौ शिक्षणं शिक्षणसिद्धान्तानां सूत्रणाञ्च तार्किकक्रमेण अनुकरणं करोति।
4. विधावस्मिन् पूर्वार्जिततथ्यैः सह नूतनतथ्यानां परस्परसम्बन्धस्थापनेन तुलना क्रियते। येन छात्रः नवार्जितज्ञानस्य व्यवहारे प्रयोगं कुर्वन्ति।
5. शिक्षकेण सह छात्रः अपि सक्रियाः भूत्वा सिद्धान्तनिर्माणेन स्वविचारशक्तेः प्रयोगं कुर्वन्ति।
6. छात्रणां रुचेः विकासानन्तरं ते नूतनज्ञानं सरलतापूर्वकं गृह्णन्ति।
7. सर्वेषां लक्षिताधिगमविशेषणाञ्च प्रामुख्यं प्रदीयते ।
8. शिक्षणाय बोधगम्यतायै बलं दीयते।
9. छात्रः निरन्तरं परीक्षिताः भवेयुः।

**हरबार्ट पञ्चपदीविधेः न्यूनताः -**

1. सर्वेषां विषयाणां कृते उपयोगी नास्ति। यथा - विज्ञानस्य कृते।
2. संस्कृतशिक्षणस्य सर्वासां विद्यानां कृते लाभप्रदो नास्ति।
3. विधावस्मिन् समयस्य अधिका अपेक्षा वर्तते।
4. नियमीकरणं व्याकरणाधिकोपयोगी ।

**संस्कृतशिक्षकशिक्षायां शिक्षणायोजनदृष्ट्या गुणस्तरसंवर्धनाय काश्चन संस्तुतयः-**

1. संस्कृतशिक्षणे संस्कृतपाठयोजनानां समुचितप्रयोगेण संस्कृतशिक्षकेभ्यः पर्याप्तं प्रशिक्षणं देयम्। एतदर्थं साम्प्रतिकसंस्कृतशिक्षकप्रशिक्षणपाठ्यक्रमे पाठयोजनानां स्वरूप-प्रभावप्रयोगादयो विषयाः अवश्यं समायोज्याः।
2. संस्कृतविश्वविद्यालयेषु शिक्षोच्चाध्ययनसंस्थासु च संस्कृतस्य विभिन्नपक्षाणाम् अध्यापने उपयोज्यानां विभिन्नानां मनोवैज्ञानिकानां पाठयोजनानां निर्माणार्थं केन्द्रमेकमुद्घाटनीयम्। अस्मिन् विभिन्नपाठयोजनानां निर्माणे दक्षाः प्रयोगे प्रस्तुतिपटवश्च नियुक्ताः भवेयुः।
3. सेवारतानां संस्कृतशिक्षकाणां कृते संस्कृतपाठयोजनानां निर्माणप्रयोगादिविषये अभि-विन्यासकार्यक्रमाः (Orientation Courses) पुनर्नवीकरणपाठ्यक्रमाः (Refresher Courses), कार्यशालाः (Workshops), विभिन्नगोष्ठ्यः (Seminars) व्यापकरूपेण युद्धस्तरे च समायोज्याः। संस्कृतविश्वविद्यालयाः, शिक्षोच्चाध्ययनसंस्थाश्च एतद्दिशि अनवरतं प्रयासशीलाः भवेयुः।
4. संस्कृतशिक्षणे पाठयोजनानां निर्माणप्रयोगादिविषयानाधृत्य पुस्तकानि व्यापकरूपेण प्रकाश्यानि येषां पुस्तकानां मार्गदर्शनं प्राप्य संस्कृतशिक्षणे विभिन्न-मनोवैज्ञानिक-पाठयोजनानां प्रयोगः समुचितरीत्या कुर्युः।

इत्थं विभिन्नसंस्कृतपाठयोजनानां गुणस्वीकरणेन न्यूनतापरिहरणेन च स्तरानुसारं, विषयानुगुणम् आवश्यकतानुसारञ्च पाठयोजनायाः चयनं तथा प्रयोगः संस्कृतभाषायां विशिष्य संस्कृतशिक्षकशिक्षायां शिक्षणायोजनदृष्ट्या गुणस्तरसंवर्धयितुम् अवश्यमेव शिक्षकेण कक्षाशिक्षणे पाठयोजनायाः प्रयोगः करणीयः।

**सन्दर्भग्रन्थानां सूची-**

1. कानाल, नलचक्रवर्ति, संस्कृतशिक्षणे प्रायोगिकाध्यापनविद्यानम्, श्री वेंकटाम्बा पब्लिकेशन्स, तिरुपतिः - 1997.
2. चौधरी, रामखेलावन, प्राचीन शिक्षण विधियाँ और हरबार्ट की पंचपदी शिक्षण विधि, हिन्दी साहित्य भंडार, लखनऊ - 1961.
3. मित्तल सन्तोष, संस्कृशिक्षणम्, नवचेतना पब्लिकेशन, जयपुरम् - 2006.

4. मिश्र, रमाकान्त, शैक्षिक प्रविधिः, चौखम्बा सुरभारती प्रकाशन, वाराणसी - 2006.

5. शर्मा, च.ल.ना, सिंह, फतेह, संस्कृतशिक्षणम् - नवीन प्रविधयश्च, आदित्य प्रकाशनम्, जयपुरम् - 2007

सहायक-प्रोफेसर, श्रीरणवीरपरिसरः, जम्मूः

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# पातञ्जलदर्शनम्

**–डॉ प्रमोदकुमारबुटोलिया**

योगदर्शनं दर्शनेषु अन्यतमम्। अस्य योगशास्त्रस्य रचयिता महर्षिः पतञ्जलिः। अयं पतञ्जलिः जीवः ईश्वरश्चेति तत्वद्वयं स्वीकरोति। अतः एव अस्य दर्शनस्य सेश्वरसांख्य-दर्शनम् इति नाम। एतद्दर्शनं पतञ्जलिना प्रणीतत्वात् पातञ्जलदर्शनम् इति व्यवह्रियते। सांख्य-प्रवचनम् अस्यैव शास्त्रस्यापरं नाम। यद्यपि पतञ्जलेः पूर्वाचार्याः योगशास्त्रस्य प्रवक्तारः आसन्, अथापि जनसाधारणानां कृते पतञ्जलिरेव तं योगशास्त्रं सूत्ररूपेण ग्रन्थीकृत्य सम्यक् सरलरीत्या व्याजहार इति हेतोः अस्य योगदर्शनस्य "पातञ्जलदर्शनम्" इति सयुक्तिकं तिष्ठति।

## योगशास्त्रपरिचयः

अस्मिन् योगशास्त्रे चत्वारः पादाः सन्ति। तेषां नामानि क्रमाद् - समाधिपादः, साधनपादः, विभूतिपादः, कैवल्यपादश्चेति वर्तन्ते। प्रथमे पादे भगवान् पतञ्जलिः - 'अथ योगानुशासनम्[1]', इति शास्त्रारम्भस्य प्रतिज्ञां करोति। अनन्तरं योगस्य परिभाषा अस्ति - "योगश्चित्तवृत्तिनिरोधः[2]" इति। चित्तवृत्तयः - प्रमाणविपर्ययविकल्पादयः। एतेषां निर्वर्तनं योगदशब्दार्थः। समाधिशब्दस्यार्थः - सम्यक् आधानम् इति, अर्थात् चित्तस्य स्वात्मस्वरुपे अवस्थापनमिति। योगवासिष्ठे समाधिलक्षणमेवमभिहितम्-

**इमं गुणसमाहारमनात्मत्वेन पश्चतः।**
**अन्तः शीतलता यस्य समाधिरिति कथ्यते।। इति।**

द्वितीये साधनपादे – "**तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः**" (यो. सू.–1) इत्यादि सूत्रद्वारा चञ्चलचित्तपुरुषाणां तपः स्वाध्यायादि क्रियायोगः एवं यमनियमादिबहिरङ्ग–साधनभूतानां तत्त्वानामुल्लेखः वर्णितः। अत्र तपः इति शब्देन चान्द्रायणादिक्लेशकारकस्य तपसः अर्थावबोधो न भवति, यतः चान्द्रयणादयः शरीरे क्लेशजनकत्वात् तेन चित्तस्य ऐकाग्र्यं न तिष्ठति। अत्र तपः शब्दार्थः इत्यभूतः भवति–हितकारकं स्वल्पं सात्विकभोजनं तथा शीतोष्णसुखदुःखादीनां सहनं एवमिन्द्रियाणां निरोधात्मकः यद्भवति तत्तपः इत्युच्यते। योगशास्त्रे तपः प्रसन्नकरणात्मकं वर्तते न तु पीडात्मकम्। स्वाध्यायस्यार्थः–मोक्षशास्त्राध्ययनं या नियमपूर्वकं प्रणवादिजपानुष्ठानमिति। ईश्वरप्रणिधानं नाम परमात्मनः अनुचिन्तनम् अथवा परमात्मनि सर्वकर्मणां समर्पणम् इति भवति। सर्वेषु क्रियायोगेषु ईश्वरप्रणिधानं नाम क्रियायोगः उत्तमः इति स्वीक्रियते। "यद्यत् कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्" इति ईस्वरप्रणिधानयुक्तः पुरुषः सर्वकर्माणि ईश्वारा–र्पितसेवाबुध्या करोति इत्यादयः विषयाः प्रतिपादिताः। तृतीये विभूतिपादे–जन्मान्तज्ञानं, भूतभविष्यदर्थकं ज्ञानं, अन्तर्हितम् इत्यादि अनेकप्रकाराः सिद्धयः उपन्यस्ताः। चतुर्थे कैवल्यपादे–"जन्मोषधिमन्त्रतपः समाधिजाः सिद्धयः"[3] इति सूत्रेण पञ्चानां सिद्धीनां वर्णनं करोति। देवतानां सिद्धिः जन्मना एव जायते। एवं पक्षिणामाकाशे उड्डयनं पशूनां जलतरणमित्यादि जन्मतः एव प्रसिद्धः। ओषधेभ्यः सिद्धिः प्राप्यते। आयुर्वेद, रसेश्वर–दर्शनादिषु सिद्धिरियं वर्णिता। मन्त्रेण एवं तपोबलेन सिद्धीनां प्राप्तिवर्णनं तन्त्रादिशास्त्रेषु मिलिष्यति। समाधेः सिद्धिः शास्त्रस्यास्य गौणविषयभूता भविष्यति। यमनियमादि अष्टाङ्गोपासनेन यदा योगवृक्षः फलति तदा पूर्णभावनया समाधिरुपफलपरिपकानन्तरं प्रकृति–पुरुषयोः भेदात्मकः साक्षात्कारः सिध्यति। तदानीं असंगः पुरुषः स्वस्वरुपावस्थानेन तिष्ठतीति कृत्वा आत्यन्तिक–दुःखविनाशरुपः मोक्षः सिध्यति। अस्मिन् योगशास्त्रे षड्विंशतितत्त्वानि भवन्ति। यथा सांख्या–भ्युपगतानि पञ्चविंशतितत्त्वानि, एतेषामतिरिक्तत्वेन एकः ईश्वरः अस्तीति ईश्वरतत्त्वमपि पतञ्जलिरयं स्वीकरोति इत्यतः अस्य नाम सेश्वरवादी सांख्यः इति। ईश्वरस्य लक्षणमेव प्रतिपादयति पतञ्जलिः **क्लेशकर्मविपाकशयैरपरामृष्टः पुरुषविशेष ईश्वरः** (यो.सू. 1–24) इति।

वैदिकी जीवनपद्धतिः धर्मार्थकाममोक्षरूपिणि पुरुषार्थचतुष्टये आश्रिता वर्तते। अन्तिमः पुरुषार्थः एव जीवनस्य अन्तिमम् उद्देश्यम् अस्ति। तदर्थमेव दर्शनशास्त्राणां प्रवृत्तिजार्यते यद्यपि सर्वाणि दर्शनानि स्व–स्वसिद्धान्तानुसारं मोक्षस्य निरुपणमकुर्वन् तथापि योगदर्शनं मोक्षस्य कृते साक्षात्कृतयत्नो विधीयते। मोक्षस्य निरूपणमकुर्वन् तथापि योगदर्शनं मोक्षस्य कृते साक्षात्कृतयत्नो विधीयते। मोक्षस्य कृते एव योगस्य उदयः सञ्जातः। इदं तात्पर्यं 'योग' पदस्य व्युत्पत्त्याऽपि स्पष्टमस्ति। "युज् समाधौ" धातोः योगदशब्दस्य निष्पत्तिः संजाता। आत्मनः परमात्मनि विलय एव योग उच्यते। यदा त्रिविधदुःखानाम् एकान्तिकी आत्यन्तिकी च निवृत्तिर्भवति, तदा आत्मा स्वरुपे विलीनो भवति। तत्पश्चात् जननमरणादयः पुनर्न जायन्ते।

अस्य आत्मसाक्षात्कारस्य शास्त्रीयं मार्गदर्शकं योगशास्त्रमस्ति। समाधेरवस्थायाः अपरः पर्यायो योगः एवास्ति। चित्तवृत्तिः बाह्यजगतः अपवार्य आन्तरतत्त्वे स्थिरयेत् इत्याकारकोऽयं

योगमार्गोऽत्र प्रतिपादित:। योगदर्शनं वैदिकदर्शनमस्ति यतो हि वेदेषु उपनिषत्सु च योगस्य सोपायं वर्णनं प्राप्यते। प्रायाम् ऋषीणां त्रैकालिकज्ञानस्य मूलमिदं योगदर्शनमस्ति, अतोऽस्य प्राचीनता असन्दिग्धा प्रतीयते। यदा वेदानाम् अपौरुषेयत्वं परीक्ष्यते तदा योग: एव तेषां अपौरुषेयत्वस्य साधक इति सिद्ध्यति। यतो हि ऋषयोऽपि योगेन एव मन्त्राणां साक्षाद्दर्शनं कृतवन्त:। ते मन्त्रप्रणेतारो नासन्।

अस्य अलौकिकवेदज्ञानजन्ययोगदर्शनस्य क्रियान्वयनं समाधिं विना नैव सम्भवति, अत: योगो वेदादपि प्राचीनं प्रतीयते। यद्यपि योगोऽपि एकं विशिष्टं ज्ञानमस्ति तथा च वेदा: अपि ज्ञानरुपा: सन्ति। ज्ञानस्य कदापि विनाशो नैव जायते। वेदा: अनादिज्ञानरुपा: वर्तन्ते। तेषामालोके योगमार्गस्य दर्शनम् अभवत् येन पश्चात् अदृष्टज्ञानम् अन्तर्निहितं ज्ञानं वा पुन: प्रकाशितम्। वैदिकदर्शनेषु योगस्य महत्त्वपूर्णा स्थानमस्ति। अवैदिकै: जैनबौद्धादिदर्शनैरपि अस्य महत्त्वं स्वीकृतं, स्वसम्प्रदायेषु च सादरं योगस्य प्रतिष्ठापना विहिता। उदाहरणार्थं जैनदर्शनस्याचार्येण 'उमास्वामिना हेमचन्द्रेण' च योगप्रक्रियाया विषयो विस्तरेण प्रतिपादित:। हठयोगानुगामिनि नाथसम्प्रदायेऽद्यापि योगस्य व्यावहारिक: अभ्यासो विधीयते।

**योगदर्शनस्य विकास:**

योगदर्शनस्य प्रणेता महर्षि: पतञ्जलि: आसीत्। तद्रचना योगसूत्रनाम्ना प्राप्यते। "अथ योगानुशासनम्" इति सूत्रेण योगसूत्रस्य प्रारम्भो भवति। अनुशासन शब्दस्यार्थोऽस्ति उद्दिष्ट-सिद्धान्तानां प्रतिपादनम्। अतएव इदमनुमानं स्वाभाविकं जायते यत् योगस्य सिद्धान्ता पूर्वम् उपदिष्टा:। याज्ञवल्क्यस्मृतिग्रंथे उल्लेखोऽस्ति यत् महायोगी हिरण्यगर्भ एव सर्वप्रथमं योगस्य उपदेशं प्रददौ। महर्षिणा पतञ्जलिना तस्योपदेशस्यैव सुव्यवस्थितं निरुपणं कृतम्।

महाभाष्यस्य प्रणेता वैय्याकरण: पतञ्जलिरेव योगसूत्रस्य कर्त्ता आसीत् इति तथ्यम् अनेकै: प्रमाणै: सिद्ध्यति। यद्यपि सांख्ययोगौ एकीभूतौ मन्येते तथापि योगशास्त्रे सांख्य प्रतिकूलस्य स्फोटवादसिद्धान्तस्य समर्थनं विहितम्। स्फोटवाद: व्याकरणशास्त्रे सुचर्चितोऽस्ति अत: योगसूत्रकर्त्ता पतञ्जलि: स्फोटवादस्य प्रणेता महाभाष्यकार एकैवावर्तत। पतञ्जले: स्थितिकाल: ईस्वीपूर्वं द्वितीयशताब्दी स्वीक्रियते। यद्यपि कैश्चिद् विद्वद्भि: योगसूत्रस्य चतुर्थपादे विज्ञानवादस्य खण्डनमस्ति अत: योगसूत्राणां रचनाकाल: बौद्ध-आचार्यात् मैत्रेयात् परवर्ती स्वीकृत:, किन्तु तन्मतं युक्तियुक्तं नास्ति, यतोहि बौद्धविज्ञानवादस्य अवधारणाया: पूर्वमपि विज्ञानवादस्य उल्लेख: प्राप्यते यथा छान्दोग्योपनिषदि।

योगसूत्रस्य चत्वार: पादा: सन्ति-(1) समाधिपाद:, (2) साधनपाद:, (3) विभूतिपाद:, (4) कैवल्यपादश्च। प्रथमे समाधिपादे चित्तवृत्तीनां समाधिभेदानां च वर्णनं विद्यते। द्वितीये साधनपादे क्रियायोगक्लेशनाशोपायानां योगाङ्गानां च प्रतिपादनमस्ति। तृतीये विभूतिपादे धारणा-ध्यान-समाधिरुपाणां अवशिष्टानां विशिष्टयोगाङ्गनां प्रतिपादनेन सह योगाभ्यासजन्य - अदृश्य-शक्तिनाम् अर्थात् विभूतीनामपि वर्णनं प्राप्यते। चतुर्थे कैवल्यपादे समाधिसिद्धि-निर्वाणचित्त-विज्ञानवादखण्डन - कैवल्यादयो विषया: विस्तरेण निरुपिता: सन्ति।

पतञ्जलिविरचितस्य योगसूत्रस्य एको भाष्यग्रन्थः प्रसिद्धोऽस्ति। तस्य नामास्ति व्यास-भाष्यम् इति। योगसूत्राणां रहस्यं स्फुटीकर्त्तुम् अस्य भाष्यग्रन्थस्य अपयोगिता प्रामाण्यं च स्वीक्रियते। यद्यपि व्यासभाष्ये क्लिष्टताया आधिक्यमस्ति तथापि दुर्वहं नास्ति, यतो हि अस्य भाष्यस्यापि अनेके टीकाग्रन्थाः प्राप्यन्ते। वाचस्पतिमिश्रस्य तत्त्ववैशारदी "विज्ञानभिक्षोः" "योगवार्तिकम्" च श्रेष्ठौ टीकाग्रन्थौ स्तः। एतदतिरिक्तं हरिहरानन्द आरण्यक विरचिता एका अन्या टीका "भास्वती" नाम्नाऽपि प्राप्यते। तत्त्ववैशारदी" विषयीकृतय कालान्तरे राघवानन्देन "पातञ्जलयोगरहस्यम्" इति नाम्ना टीकाग्रन्थो रचितः।

योगसूत्रमधिकृत्यापि अनेकाः टीकाः प्राप्यन्ते। यथा - भोजविरचिता भोजवृत्तिः, भावगणेशविरचिता वृत्तिः, रामानन्दयतिविरचिता मणिप्रभा, अनन्तपण्डितरचिता योगचन्द्रिका, सदाशिवेन्द्रसरस्वतीकृत "योगसुधाकराख्ये", नागोजिभट्टः विरचिता ब्राह्मवृत्तिः, बृहतीवृत्तिश्च, ओमानन्दतीर्थप्रणीतः योगप्रदीपश्चेति।

उपर्युक्ताः सर्वाः टीका अनुभवविभिः योगसाधकैः रचिताः सन्ति। योगसूत्राणां परिज्ञानाय आसां सर्वासां टीकानामुपयोगिता प्रतीयते। स्वामिना ओमानन्दतीर्थेन लिखिते योगप्रदीपग्रंथे विस्तृतभूमिकायां योगस्य स्वरुपम् उपस्थाप्य ग्रन्थस्य अपादेयता संवर्धिता। इयं टीका गीताप्रेस, गोरखपुरतः प्रकाशिताऽस्ति।

### योगस्वरूपम्

योगस्वरुपम्-"योगश्चित्तवृत्तेर्निरोधः" इति योगस्य परीभाषा योगसूत्रकारेण उदाहृता। चितञ्च क्षिप्त-मूढ-विक्षिप्त-एकाग्र-निरुद्धाख्यासु पञ्चभूमिषु विद्यमानं भवति। क्षिप्तभूमिः रजोगुणबहुला वर्तते। एषाऽवस्था दैत्य-दानव-उन्मत्तजनानां च भवति। मूढभूमिः तमोगुणबहुला भवति। इयं राक्षस-पिशाच-मदोन्मत्तानां जायते। विक्षिप्तभूमिः सत्त्वप्रधाना किन्तु रजोयुक्ता अपि भवति। इयं प्रथमभूस्थितानां योगिनां देवानां च चित्तभूमिरस्ति। इयं निरुद्धसत्त्वप्रधाना मन्यते। चित्तस्य सर्वासु वृत्तीषु उपरुद्धासु तत्तद्वृत्तीनां संस्कारमात्रेण युक्तं चितं निरुद्धं भवति। एषैव अन्तिमा भूमिरस्ति। चित्तवृत्तयोऽपि पञ्चविधाः प्रतिपादिताः-(1) प्रमाणवृत्तिः, (2) विपर्ययवृत्तिः, (3) विकल्पवृत्तिः, (4) निद्रावृत्तिः, (5) स्मृतिवृत्तिश्चेति। इमा रागद्वेषादि-क्लेशानां कारणरुपाः सन्ति, तेषां विनाशिन्योऽपि भवन्ति, अतः आसां वृत्तीनां वर्गीकरणं द्विधा प्रतिपादितम्-क्लिष्टा अक्लिष्टाश्चेति।

प्रमाणानि-योगदर्शने सांख्यसम्मतानां त्रयाणां प्रमाणानामेव स्वीकृतिरस्ति। अत्रापि इतर-प्रमाणानाम् अन्तर्भावः एषु प्रत्यक्षानुमानशब्दाख्येषु त्रिष्वेव प्रमाणेषु जायते। **विपर्ययः**-वस्तुनो विपरीतम् अथवा मिथ्याज्ञानं विपर्ययोऽस्ति। **विकल्पः**-शब्दज्ञानेनोत्पन्नः किन्तु वस्तुशून्यो विकल्पः कथ्यते। यथा चैतन्यमेव पुरुषस्य स्वरूपमस्ति। **निद्रा**-वस्तुनोऽभावस्य ज्ञापयित्री वृत्तिः निद्रा इत्युच्यते। **स्मृतिः**-अनुभूतविषयाणां तस्मिन्नेव रूपे स्मरणं स्मृतिदिति कथ्यते। आसां वृत्तीनां विरोधादेव आत्मस्वरूपस्य दर्शनं भवति। अर्थात् सांसारिकदुःखानाम् आत्यन्तिकं

निवृत्तिश्च जायते। आसां वृत्तीनां निरोधो अभ्यासेन वैराग्येण च भवति। वैराग्येण विवेकस्य उदयो भवति। अभ्यासेन च चित्तं सत्त्वे प्रतिष्ठति।

सहायक-प्रोफेसर, शिक्षाशास्त्रविभाग:, श्रीरणवीरपरिसर:, जम्मू

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# संस्कृतकोशवाङ्मयविकासपरम्परा

–डा.जी.राजशेखर रेड्डि

अस्मिन् चराचरजगति विद्यमाना मानवा: सर्वेऽपि वागधीना: एव। वाचं विना भावाभिव्यक्तेरभावात् जीवनं यापयितुं असमर्था: एव। मानवस्य विवेकिता एव न सिद्ध्येत्। प्राचीनवाङ्मये एव वाक्तत्वमधिकृत्य विशदतया विवरणं प्राप्यते। तत्र यजुर्वेदे वाक्तत्त्वमधिकृत्य सुष्ठु चिन्तितमस्ति। तदनुसारं वाक्तत्त्वं समुद्रोऽस्ति अर्थात् समुद्र इव अक्षय्यभाण्डागाररूपं वाक्तत्वम् अगाधं दुर्बोधं च अस्ति।[1] तद्धि सर्वव्यापकम् अमुं वाक्तत्त्वम् आश्रित्यैव सर्वोऽपि लोक: मननं करोति इति शतपथे उक्तम्। तद्यथा–

**"वाग्वै मति: वाचा हीदं सर्वं मनुते।"**[2] इति।

एवंविधस्य सर्वशक्तिमतो वाक्तत्त्वस्यार्थात् शब्दार्थयो: ज्ञानं बोधसिद्धि: कोशैरेव भवति। कोशा एवास्य ज्ञानस्य एकमात्रमर्थज्ञानसाधनानि।[3] यथा किल कोशशब्द: बोधयति, प्रत्याययति वा धनागारं तद्वत् कोशब्द: शब्दागारं शब्दभाण्डारं च ब्रूते। सर्वाण्यपि शास्त्राणि शब्दरूपत्वात् शब्दभाण्डागाराधीनानि इत्यत्र नास्ति कोऽपि सन्देह:। यस्मिन् ग्रन्थे अर्थक्रमेण पर्यायक्रमेण च शब्दा: एकत्रीक्रियन्ते स कोश:। स च शब्दसंग्रह: एव। "वेदार्थज्ञाने अवैयाकरणस्त्वन्धो बधिर: कोशवर्जित:" इति आर्योक्ति: प्रथते।

## कोशपदविचार:, व्युत्पत्तिश्च -

कोश: इत्यस्य शब्दस्योल्लेखो द्विधा भवति। स मूर्धन्यषकारान्त: तालव्यान्तश्च। "कोषो मूर्धन्यान्त: तालव्यान्त इत्यन्ये"[4] तद्यथा - कोष: - कोशश्च। प्राचीनसंस्कृतकोशेषु 'ष' इत्यस्य मूर्धन्यस्य स्थाने 'श'कारस्यैव प्राधान्येन प्रयोगो दृश्यते। धनागारस्य कृते कोष: शब्दभण्डारस्य कृते च कोश: इति शब्द: समीचीन इति आभाति। शब्दकल्पद्रुमे शब्दस्यास्य उभयरूपयो: व्युत्पत्ति: प्रदर्शिता वर्तते

**कोशः** :- पुंसि, कुश्यते संश्लिष्यते, कुश संश्लेषणे घञ्,
कर्तरि चेति अकधकरणे घञ्।

**कोषः** :- पुंसि, क्लीबे च, कुष्यन्ते आकृश्यन्ते फलपुष्पोत्पादक-
मधुमयपरागादयो यस्मिन्।

इत्थम् अयं कोशशब्दो द्विविधोऽपि विभिन्नार्थेषु प्रयुज्यते। शास्त्रानुसारं तु उभयोः षशकारयोः प्रयोगः शुद्धः एव। 'कुष्यति निष्क्रामत्यस्मात् स्वयमेव कोषः' इति निष्कर्षार्थे पठितात् कुष्-धातोः भावार्थे घञ् प्रत्ययविधानेन कोषशब्दो निष्पाद्यते। कोषः सङ्केतग्रहसाधनेषु व्यवहाराप्तवाक्योपमानवाक्यशेषविवृति-प्रसिद्धपदसान्निध्यव्याकरणकोषेष्वन्यतमत्वेन विवक्षितोऽस्ति।

**कोशानां प्रयोजनम्** -

कोशानां प्रयोजनं हि नानार्थार्णवसंक्षेपकर्त्रा केशवस्वामिना इत्थमभाणि-

**ग्रन्थप्रणयमिच्छूनां विशेषात् काव्यकारिणाम्।**
**उपन्यसितुमिच्छूनां विदुषां परिषत्स्वपि॥**

**राजगोष्ठीषु शब्दार्थलिङ्गयोर्मोहसंशयात्।**
**विदुषां कलहे प्राप्ते जिगीषूणां मनीषिणाम्॥**

**आदरणीयमवश्यं शास्त्रमिदं सत्पथे विविप्सूनाम्।**
**डिडयिषमाणानामिव पतत्रयुगलं पतत्रिणाम्॥**

नानाग्रन्थनिर्मातृणां, काव्यप्रणेतृणां विद्वद्गोष्ठीषूपन्यासं निर्वर्तितुमिच्छूनां, शब्दानां लिङ्ग-ज्ञनविषये संशयवतां, तादृशसंशयस्य निवारणं कर्तुमिच्छूनां च कोशा अत्यन्तं प्रयोजनमुपस्थाप-यन्ति। प्रायशः कोशाः श्लोकमया इति कारणेन करबदरमिव सर्वेऽपि शब्दाः बुद्धौ प्रतिभान्ति।

संस्कृते पर्यायशब्दज्ञानाय तत्तच्छब्दानां लिङ्गज्ञानाय च कोशग्रन्थाध्ययनम् अनिवार्यम्। अत एव "बहुषु बहुवचनम्"[5] "स्त्रियाम्"[6] इत्यादिसूत्रव्यख्यावसरे नागेशोपाध्यायेन प्रतिपादितं यथा–"लिङ्गादिकं तु कोशादितो निर्णेयम्" इति। कस्यचित् शब्दस्य पदस्य वा अर्थज्ञानाय तथैव पर्यायपदानां नानार्थकपदानां वा शक्तिज्ञानाय कोशानाम् अध्ययनं भवेत्।

इमे हि कोशाः बालान् पदशक्तिग्रहणे पदानां लिङ्गज्ञाने च व्युत्पादयन्ति। कोशानां टीकास्तु तत्तत्पदानां व्युत्पत्त्यादिनिरूपणपुरस्सरं पदार्थव्याख्यानं कुर्वन्ति। तस्मात् अध्येतारः पद-पदार्थ-पदव्युत्पत्तिषु प्रवीणा भवन्ति।

**कोशवाङ्मयविकासः** -

संस्कृतकोशवाङ्मयस्य क्रमिकविकासमधिकृत्य विवेचयामश्चेत् तं विकासं पञ्चसु चरणेषु विवेचितुं शक्नुमः। तद्यथा-

*** प्रथमचरणम् -**

वेदार्थजिज्ञासायै कोशरचनारम्भोऽभूत् इति वक्तुं शक्यते। कोशनिर्माणस्य प्रथमचरणेऽस्मिन् वैदिकसंहितासु प्रयुक्तमन्त्राणां सङ्कलनं विधाय तान् मन्त्रान् विभिन्नश्रेणीषु संस्थाप्य तत्र प्रयुक्तानां शब्दानां यथाव्युत्पत्ति अर्थनिर्देशः कृतः। प्रायः मन्त्रोपदेशसमनन्तर-काले एव तत्तन्मन्त्राणाम् अर्थबोधार्थं प्रयत्नाः अकारिषत, अत एव वैदिकशब्दकोशानां "निघण्टुः, निरुक्तम्" इत्यादीनां निर्माण-सङ्कलनप्रयत्नाः प्रारब्धा इति वक्तुं शक्यते।

*** द्वितीयचरणम् -**

कोशरचनायाः द्वितीयचरणे लौकिकसंस्कृतशब्दकोशाः विनिर्मिताः। एषु कोशेषु लोके विद्यमानानां शब्दानां पर्यायपदानि अर्थाः व्युत्पत्तिश्च लभ्यन्ते। अत्र सर्वोपयोगी मुख्यतमः भवति अमरकोशः। अमरकोशात् प्रागपि भागुरिकोशः (त्रिकाण्डः), धन्वन्तरिकोशः, उत्पलिनम् (व्याडि), कात्यायनस्य नाममाला, वाचस्पतेः शब्दकोशः इत्यादिकोशग्रन्थाः बहवः आसन्।

अमरकोशस्य निर्माणानन्तरं तट्टीकाकाराणामुद्भवः सम्बभूव। ते टीकाकाराः अमरपठितानां पदानां स्पष्टार्थतायै टीकाः व्यरचयन्। अमरकोशस्य प्रसिद्धटीकाकाराः सन्ति - श्रीधरस्वामी, सर्वानन्दः, रघुनाथचक्रवर्ती, सुमतिचन्द्र इत्यादयः। एते टीकाकाराः प्रायशः वैयाकरणाः आसन्। अत एव एते समेषामपि अमरकोशस्थशब्दानां व्युत्पत्तिप्रदर्शनपूर्वकं अर्थप्रदर्शनपरां व्याख्यां चक्रुः।

*** तृतीयचरणम् -**

तृतीये चरणे पारिभाषिकशब्दकोशानां रचना प्रारब्धा। अत्र तत्तच्छास्त्रीय पारिभाषिक-शब्दानामर्थाः परिभाषाश्च निर्दिष्टाः आसन्। यथा आयुर्वेदशास्त्रस्य पारिभाषिक शब्दानाम् अर्थप्रदर्शनार्थं विरचिताः कोशाः। तेषां कोशाः - धन्वन्तरिनिघण्टुः, माधवकरविरचितपर्याय-रत्नमाला, चक्रपाणिविरचितशब्द-चन्द्रिका, मीमांसाकोशः, न्यायकोशः, व्याकरणसम्बन्धिकोशाः, साहित्यशास्त्रकोशः, दर्शनकोशः इत्यादयः।

*** चतुर्थचरणम् -**

कोशसाहित्यस्य चतुर्थे विकासक्रमे नानार्थशब्दकोशानां प्रणयनं जातम्। नानार्थकधातुभ्यः व्युत्पन्नत्वेन शब्दानां प्रदर्शनपूर्वकम् अर्थप्रदर्शनपुरस्सरं वैज्ञानिकसिद्धान्तानाधारीकृत्य नानार्थशब्द-कोशनिर्माणे प्रयत्नाः समनुष्ठिताः। एतेषु कोशषु नानाप्रसङ्गेषु एकस्य शब्दस्य तत्तत्प्रसङ्गे जायमानानां नैकानां शब्दार्थानां निर्देशः कृतो विद्यते। यद्यपि एतादृशकोशस्य प्रारम्भः अमरकोशस्य तृतीयकाण्डे दृग्गोचरः भवति किन्तु अस्याः पद्धतेः सम्पूर्णविकासस्तु मेदिनीकारकृतमेदिनीकोशे एव दरीदृश्यते। अत्र वर्णानुक्रमेणैव शब्दानां नानार्थाः निर्दिष्टाः इति एतेषां नानार्थकोशानां वैशिष्ट्यम्।

*** पञ्चमचरणम् -**

पञ्चमे चरणे अकारादिक्रमेण व्यवस्थितशब्दानाम् आधुनिककोशानां भाषासम्बन्धिकोशानां च निर्माणम् अभवत्। आधुनिककोशाः यथा तारानाथतर्कवाचस्पतिसङ्कलितं वाचस्पत्यम्, राधाकान्तदेवसङ्कलितशब्दकल्पद्रुमः, विजयराजेन्द्रसूरेः अभिधानराजेन्द्रकोशः, सुखानन्दनाथप्रणीतः शब्दार्थचिन्तामणिः इत्यादयः।

भाषासम्बन्धिकोशाः यथा-

- संकृत-हिन्दीकोशः-द्वारिकाप्रसादचतुर्वेदप्रणीतः
- संस्कृत-आङ्ग्ल-शब्दकोशः-1. रामज् सन्, 2. बनफे, 3. कम्पलर्, 4. मोनियर् विलियमस्
- प्राक्टिकल् संस्कृत-आङ्ग्लशब्दकोशः-1. वामनशिवराम आप्टे, 2. आनन्दरामबरुआ
- संस्कृत-हिन्दीकोशः, विश्वम्भरनाथः
- संस्कृत-तेलुगुकोशः
- संस्कृत-तमिल्कोशः
- संस्कृत-कन्नडकोशः
- संस्कृत-पञ्जाबीकोशः इत्यादयः।

एवं रूपेण कोशवाङ्मयस्य, संस्कृतकोशवाङ्मयस्य च विकासः निर्माणचरणेषु उल्लेखितुं शक्यः।

**कोशवाङ्मयपरम्परा -**

*** वैदिकशब्दकोशपरम्परा-**

मन्त्रब्राह्मणयोर्वेदनामधेयमिति मतानुसारं ब्राह्मणानि आरण्यकोपनिषदश्च वैदिकसाहित्यनाम्ना ख्यातानि सन्ति। ऋग्यजुस्सामाथर्वसंहिताचतुष्टय्यां प्रवचनभेदेन किञ्चित्कालानन्तरं शाखाः प्रशाखाः च वृद्धिमुपयाताः। पतञ्जलिरेकविंशशाखा ऋग्वेदस्य, एकाधिकशतं यजुर्वेदस्य, एकसहस्रमितं सामवेदस्य, अथर्ववेदस्य च नवशाखानामुल्लेखं चकार। "उपदेशाय ग्लायन्तोऽपरे बिल्वग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं वेदाङ्गानि च इति यास्कवचनमिदमनुवदन् सायणाचार्यः अतिगम्भीरस्य वेदस्य अर्थं अवबोद्धुं शिक्षादीनि षडङ्गानि प्रवृत्तानि" इति कथयति। वेदज्ञानाय अनेके निघण्टवो विरचिताः स्युः परं तेषां संकलनात्मकः ग्रन्थः यास्काचार्यव्याख्यातः निरुक्तसंज्ञः अधुना लभ्यते। अस्मिन् निघण्टौ प्रथमत्रिष्वध्यायेषु तारतम्यपूर्वकमेकार्थक-शब्दानां संग्रहो वर्तते परं चतुर्थे पञ्चमे चाध्याये संगृहीतपदसन्दोहस्य नास्ति मिथः कोऽपि सम्बन्धः। केचन शब्दाः अतिस्पष्टा अन्ये केचन सन्ति दुरूहाः। उपलब्धेनिघण्टौ सङ्कलितपदव्याख्याः सकलवैदिक-वाङ्मयस्य ज्ञानं न साधयन्ति। पूर्वस्मिन् काले विपुलकाया निघण्टवो निर्मिताः स्युरिति संभाव्यते परं कालकवलिता न तेऽद्य प्राप्यन्ते अस्माभिः।

उपलभ्यमाननिघण्टुव्याख्यायां निरुक्ताख्यायां नैरुक्ताचार्या निर्वाच्यशब्दव्युत्पत्तिसङ्ग्रहकर्तृ-रूपेण समुद्ध्रियन्ते यथा हि अक्षिकर्णेन्द्रनासत्यापदानां निर्वचनं निदधदाग्रायणः, निघण्टुदण्ड-पुरुषकुत्सयज्ञादीन् निर्वचन् औपमन्यवः, होतानासत्यादिपदनिर्वचनां विदधन् और्णवाभः, शिताम्रभृति-पादनि व्युत्पादयन् तैटिकिश्च यास्केनोद्धृताः। बृहद्देवताकारेण यास्कगार्ग्यशाकपूणिनामानः आचार्या निरुक्तिप्रसङ्गावसरे स्मृताः।

सम्प्रत्युपलब्धनिघण्टुं यास्कः नैघण्टुकनैगमदैवतनामककाण्डेषु समकलयत्। प्रथमकाण्डे पर्यायवाचिनां नामक्रियापदानां च, द्वितीयेऽनेकार्थदुरूहशब्दानां, तृतीये देववाचकनामपदानां च सङ्ग्रहो विद्यते। तदनुसारं निरुक्तकारेणापि नैरुक्तसम्प्रदायदृष्ट्या काण्डत्रयात्मकः स्वग्रन्थो व्याख्यातः। आद्येषु त्रिष्वध्यायेषु प्रायः षडुत्तरचतुश्शतं समानार्थकशब्दानां सूची वर्तते परं चतुर्थे पञ्चमे चाध्याये निवनवत्युत्तराष्टशतस्वतन्त्रशब्दानां सङ्कलनमस्ति। ईदृशी प्रक्रिया पश्चाद्वर्ति-कोशकृद्भिः अनुकृता दृश्यते।

### प्राचीनाः कोशकाराः -

पुरुषोत्तमदेवस्स्वकीये हारावलीकोशे प्राचीनकोशकारानुद्धरन् नाम्ना इत्थमाह-

**शब्दार्णव उत्पलिनी संसारावर्त इत्यपि।**
**कोषा वाचस्पति-व्याडि-विक्रमादित्यनिर्मिताः॥** इति।

अत एव वाचस्पतेः शब्दार्णवः, व्याडेः उत्पलिनी, विक्रमादित्यस्य संसारावर्त इति कोशाः विद्यन्ते। अमरकोशस्य कस्यचन हस्तलेखे प्राचीनाः कोशकाराः इत्थमुद्धृताः सन्ति-

**विश्वो विश्वप्रकाशश्च धरणिर्मेदिनी तथा।**
**रत्नकोशो रन्तिदेवः शाश्वतश्च हलायुधः॥**

**व्याडिर्वररुचिश्चैव रुद्रकात्यायनावुभौ।**
**रभसो वैजयन्ती च तथा शब्दार्णवाजयौ॥**

**वाचस्पतिर्हेमचन्द्रः कोषा अष्टादशैव तु।**[7]

### लौकिकशब्दकोशपरम्परा -

लौकिकशब्दकोशेषु लोके विद्यमानानां शब्दानाम् अर्थः लिङ्गनिर्देशः, व्युत्पत्त्युल्लेखश्च लभ्यते। उपलभ्यमानेषु लौकिकशब्दकोशेषु मुख्यतमः भवति अमरकोशः। अत्र शब्दानां विभिन्नवर्गेषु विभज्य प्रदर्शनं विद्यते, अनुष्टुप्छन्दसि पर्यायवाचिशब्दाश्चोल्लिख्यन्ते च।

### अमरकोशस्य पूर्वतनाः कोशाः -

व्याडिभागुरिधन्वन्तरिवररुचिप्रभृतयः पूर्वाचार्याः कोशप्रणेतारः आसन्। कोशटीकाकारः सर्वानन्दोऽमरसिंह तत्तद्ग्रन्थतन्त्रसाहाय्येन निर्मितां विलोकयति। पुरुषोत्तमदेव-महेश्वरहेमचन्द्राः

अमरकोशे कात्यायनवाचस्पत्योः उपयोगमन्विषन्ति। हेमचन्द्रोऽभिधान-चिन्तामणेः स्वोपज्ञटीकायां व्याडिकृतकोषात् यदुद्धरति तस्मात्तस्य विपुलकायत्वं संसूच्यते। किरणप्रकरणे व्याडिना विज्ञापितं यद् रविमयूखाः विभिन्नर्तुषु कथं हीयन्ते वर्धन्ते च, इति, कति चन्द्रमसो रथाः इति, कथमप्सरसां समुद्भवः इति च। बौद्धधर्मस्य कतिपयतत्त्वान्यपि तत्र प्रकाशितान्यासन्। एतेनानुमातुं शक्यते यदमरसिंहेन व्याडि-कृतकोषविधिरप्यनुसृतः स्यात् इति।

भागुरेः त्रिकाण्डकोशोऽमरकोशात् सर्वथा भिन्न एवासीत् इत्यनुमीयते। मालाकारः क्षीर-स्वामिहेमचन्द्राभ्यां बहुवारं स्मृतः, परं मालालेखकोऽमरदत्तोऽमरकोषकारात् अमरसिंहात् सर्वथा भिन्नो हलायुधेन प्रामाणिक इति मत्वा स्मृतः। वाचस्पतेः कृतिरेकार्थकशब्दानां सुभण्डारः सुविचारितकतिपयशब्दाक्षरविन्यासः, हेमचन्द्रेणाभिधान-चिन्तामणेष्टीकाया आमुखे प्रमाणत्वेन चिन्तितशब्दार्णवकोषस्तदा लब्धसत्ताकोऽवर्तत। धन्वन्तरिरमरसिंहस्य पूर्ववर्त्तिकोषकारो वनस्पति-वर्गेण सम्बद्धं निघण्टुं रचयामास। स्वरूपतः अमरकोशे व्याडिवररुचिभागुरिधन्वन्तरीणां संक्षेपोऽ-स्तीति मन्यते।

**अमरकोशादनन्तरं रचिताः कोशाः -**

अमरकोशादनन्तरं कोशस्य विविधपद्धतयः प्रचलिताः। तत्र नानार्थकोशपद्धतिः, समानार्थ-पद्धतिः, अंशतः पर्यायवाचिपद्धतयश्चेत्यादयः। शाश्वतस्यानेकार्थसमुच्चयः (सप्तमशताब्दः) वैजयन्तीकोशो वृद्धाकारः प्रामाणिकश्चापि सन्, अत्र पर्यायवाचिनो नानार्थका आकारादिक्रमश्च त्रयो विधयः संयुज्यन्ते। द्वादशशताब्दे मङ्खकः अमरकोशम् आश्रित्य अनेकार्थकोशं रचितवान्। अजयपालः 1007 श्लोकपरिमितं नानार्थसङ्ग्रहं व्यरचयत्। द्वादशशताब्दस्य उत्तरार्धे धनञ्जयः नाममालाम्, केशवस्वामी नानार्थार्णवसंक्षेपम्, शब्दकल्पद्रुमं च व्यरचयन्। मेदिनीकोशः (चतुर्दश-शताब्दे) नानार्थशब्दकोशसङ्ग्रहरूपेण प्रसिद्धः अमरकोशात् प्रभावितः प्रतीयते। द्वादशशताब्दे जिनप्रभसूरेः वर्गनाममाला पञ्चखण्डेषु विभाजिता, कल्याणमल्लकृतः शब्दरत्नप्रदीपः चतुदर्श-शताब्दे प्रकाशितः। एवमनेके कोशाः विनिर्मिताः।

आधुनिककोशेषु शब्दकल्पद्रुमः, वाचस्पत्यं च अत्यन्तं प्रसिद्धिं प्राप्ते। पाणिनिव्याकरणानुसारं प्रत्येकं शब्दाः निरुक्ताः, शब्दस्य प्रयोगा अपि अत्रावलोक्यन्ते।

**वेदशास्त्रशब्दकोशाः -**

अधस्तात् केचन वेदशास्त्रशब्दकोशाः उल्लिख्यन्ते।

| क्र.सं. | कोशः | कोशकर्ता |
|---|---|---|
| 1. | निरुक्तम् | यास्कः (सङ्कलयिता) |
| 2. | वेदार्थशब्दकोशः | चमूपतिः |
| 3. | वैदिककोशः | मधुसूदनशर्मा, भास्करराय: च |
| 4. | वैदिककोशः | हंसराजः |

| | | |
|---|---|---|
| 5. | ऐतरेयब्राह्मणारण्यककोशः | केवलानन्दसरस्वती |
| 6. | उपनिषद्वाक्यमहाकोशः | दयानन्दशम्भूसाधले |
| 7. | धर्मकोशः | लक्ष्मणशास्त्री |
| 8. | न्यायकोशः | भीमाचार्यझलकीकरः |
| 9. | मीमांसाकोशः | केवलानन्दसरस्वती |
| 10. | संस्कृतव्याकरणकोशः | के.वि. अभ्यंकरः |
| 11. | वैदिकपदार्थपारिजातः | |
| 12. | वैदिकपदानुक्रमकोशश्च | विश्वबन्धुशास्त्री |
| 13. | वैदिककोषः | राजवीरः शास्त्री |

**संस्कृतशब्दकोशाः -**

अधस्तात् केचन प्रसिद्धाः शब्दकोशाः सूच्यां निर्दिश्यन्ते।

| क्र.सं. | कोशः | कोशकर्ता | कालः |
|---|---|---|---|
| 1. | अमरकोशः | अमरसिंहः | चतुर्थ-पञ्चमशताब्द-मध्यकालिकः |
| 2. | हारावली | पुरुषोत्तमदेवः | सप्तमः शताब्दः |
| 3. | अभिधानरत्नमाला | हलायुधः | दशमः शताब्दः |
| 4. | वैजयन्ती | यादवप्रकाशः | एकादशः शताब्दः |
| 5. | नाममाल | धनञ्जयः | अष्टम-नवमशताब्द-मध्यकालिकः |
| 6. | आराधनाकथाकोशः (गद्यबद्धः) | प्रभाचन्द्रः | एकादशः शताब्दः |
| 7. | आराधनाकथाकोशः (पद्यबद्धः) | नेमिदत्तः | एकादशः शताब्दः |
| 8. | शब्दकल्पद्रुमः | केशवस्वामी | द्वादशः शताब्दः |
| 9. | विश्वप्रकाशः | महेश्वरः | द्वादशः शताब्दः |
| 10. | नानार्थरत्नमाला | अभयपालः | द्वादशः शताब्दः |
| 11. | अभिधानचिन्तामणिः | हेमचन्द्रः | द्वादशः शताब्दः |

| | | | |
|---|---|---|---|
| 12. | अनेकार्थकोशः | मङ्खः | द्वादशः शताब्दः |
| 13. | आख्यातचन्द्रिका | मल्लभट्टः | द्वादशः शताब्दः |
| 14. | नानार्थरत्नमाला | इरुगपददण्डनाथः | चतुर्दशः शताब्दः |
| 15. | शब्दरत्नाकरः | वामनभट्टबाणः | पञ्चदशः शताब्दः |
| 16. | अनेकार्थशब्दकोशः | मेदिनीकारः | पञ्चदशः शताब्दः |
| 17. | सुन्दरप्रकाशशब्दार्णवः | पद्मसुन्दरः | षोडशः शताब्दः |
| 18. | कल्पद्रुमः | केशवदैवज्ञः | सप्तदशः शताब्दः |
| 19. | नाममाला | भोजः | सप्तदशः शताब्दः |
| 20. | नामसंग्रहमालिका | अप्पय्यदीक्षितः | सप्तदशः शताब्दः |
| 21. | अनेकार्थतिलकः | महिपः | सप्तदशः शताब्दः |
| 22. | आख्यातचिन्तामणिः | श्रीमल्लभट्टः | सप्तदशः शताब्दः |
| 23. | अनादिकोशः | महादिदेववेदान्ती | सप्तदशः शताब्दः |
| 24. | कोशावतंसः | राघवकविः | सप्तदशः शताब्दः |
| 25. | विशेषामृतम् | त्र्यम्बकमिश्रः | सप्तदशः शताब्दः |
| 26. | शारदीयम् | हर्षकीर्तिः | सप्तदशः शताब्दः |

**आधुनिकरीत्या सङ्कलिताः कोशाः**

| क्र.सं. | कोशः | कोशकर्ता |
|---|---|---|
| 1. | वाचस्पत्यम् | तारानाथतर्कवाचस्पतिः |
| 2. | शब्दकल्पद्रुमः | राधाकान्तदेवः |
| 3. | अभिधानराजेन्द्रकोशः | विजयराजेन्द्रसूरिः |
| 4. | शब्दार्थचिन्तामणिः | सुखानन्दनाथः |
| 5. | अभिधानप्रदीपिका | ज्ञानचन्द्रस्वामी |

।। इति ।।

**पादटिप्पणी –**

1. समुद्रोऽसि विश्वव्यचा अजोऽस्त्येकपद हि रसि बुध्न्यो वागस्येन्द्रमसि सदोऽसृतस्य द्वारौ। यजुर्वेदः 5.33

2. शतपथे. 8.1.27
3. A dictionary is thought of a vocabulary builder. Actually it is a tool on indispensable tool of the persoon who needs to know an exact word and its meanings. डॉ. एस्. टेलर:, हाट्रम्पिस वकेबुलेरी भूमिका - पृ.7
4. हलायुधकोश: पृ.250
5. अष्टाध्यायी 1-4-21
6. अष्टाध्यायी 4-1-3
7. संस्कृत कोशों का इतिहास, बलदेव उपाध्याय

सहायक-प्रोफेसर, श्री रणवीर परिसर, जम्मू

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# कौण्डभट्टदिशा धात्वर्थनिरूपणम्

-अम्बरीशकुमारमिश्रः

मुनियास्काचार्येण स्वकीयनिरुक्तग्रन्थे सकलशब्दमूलत्वं धातावेव इति निगदितं साधितञ्च। तथा हि "सर्वं नाम धातुजमाह इति"। धातुजाः शब्दाः एव जगज्ज्योतीरूपेण विवर्तात्मकमिदञ्जगत् द्योतयन्ति प्रकाशयन्ति च। अत्रोक्तं काव्यादर्शे महाकविदण्डिना- "इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्, यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते" इति। अत अन्धतमः कृत्स्नमिदम्भुवनत्रयं प्रकाशाय द्योतनाय च अनादिनिधनात्मकशब्दतत्वमाश्यकम्। तथा च तज्ज्ञानाय तत्स्वरूपसम्पादनाय तदर्थज्ञानाय च धातुज्ञानं परमावश्यकमिति। अत एव वैयाकरणभूषणसारे आचार्यकौण्डभट्टेन प्रथमे धात्वर्थनिर्णयप्रकरणं समारब्धम्। सम्प्रति धात्वर्थमत्र आचार्यकौण्डभट्टदिशा पर्यालोचामः, तथा हि-फलव्यापारयोः धातुराश्रये तु तिङः स्मृताः, फले प्रधानं व्यापारः तिङर्थस्तु विशेषणम्" इति।

फलञ्च व्यापारश्च फलव्यापारौ (इतरेतरयोगद्वन्द्वः) तयोः फलव्यापारयोः अत्र सप्तमीद्विवचनं वर्तते। त्रिविधसप्तमीषु ह्यत्र वाचकत्वरूपविषयसप्तमी वर्तते। एकवृन्तगतफलद्वयन्यायेनात्र खण्डशः एकैव शक्तिः समाङ्गीक्रियते, तेन फलनिरुपिता धातुनिष्ठशक्तिः भिन्ना, तथा व्यापार- निरुपिता धातुनिष्ठशक्तिर्भिन्नेति। अत्र च विशिष्टशक्तिवादाङ्गीकारेण फलविशिष्टव्यापारे, व्यापारविशिष्टफले च धातुनिष्ठशक्तिनिर्धार्यते, चेत् "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन"

इति राद्धान्तबलेन फलविशिष्टव्यापारे व्यापारस्यैकदेशस्य फलस्य पदार्थैकदेशत्वात् धातुरित्यत्रा-न्वयाऽभावात् कर्मसञ्ज्ञानापत्तिः, तथैव व्यापारविशिष्टफले फलस्यैकदेशस्य व्यापारस्य पदार्थैक-देशत्वात् धातुपदार्थेऽन्वयाऽभावात् कर्तृसञ्ज्ञानापत्तिरिति। न्यायानङ्गीकारे "नित्यो घटः" इति प्रयोगा पत्तिः। तथा हि नित्यो घट इत्यत्र घटपदेन समुपस्थापितस्य घटघटत्वपदार्थस्य मध्ये घटत्वस्य नित्यत्वात् नित्यपदार्थेन सहाऽभेदान्वयात् नित्यो घटः इति प्रयोगापत्तिः लोकविरुद्धत्वादनु-भवविरोधाच्च प्रयोगोऽयं वार्यते, तदर्थं नियमस्य अङ्गीकारः कर्तव्य एव।

ननु फलव्यापारयोरित्यत्र "एकवृन्तगतफलद्वयन्यायेन" खण्डशः एकैव शक्तिवादाङ्गी-कारेऽपि समानपदोपस्थापितयोः पदार्थद्वयोः मिथः उद्देश्यविधेयभावेनान्वयापत्तिः यथा घटपदेनो-पस्थापितयोः घटघटत्वयोः उद्देश्यविधेयभावेनान्वयो भवतीति तथैवात्रापि भवेदिति चेदुच्यते धात्वर्थातिरिक्तत्वेन सङ्कोचं विधाय धात्वर्थातिरिक्तसमान पदोपस्थापितयोः पदार्थद्वयोः परस्परो-द्देश्यविधेयभावेनान्वयाङ्गीकारात् नोक्तदोष इति।

इदानीमन्वयक्रमो निरूप्यते, प्रकृत्यर्थयोः फलव्यापारयोः वाचकत्वरूपप्रत्ययार्थे निरूपित-त्वसम्बन्धेनान्वय, तथा च विभक्त्यर्थस्य वाचकत्वस्य आश्रयतासम्बन्धेन धातावन्वय इति, तेन फलव्यापारोभय निष्ठवाच्यतानिरूपितवाचकतावान् धातुरित्यर्थे फलति। तथैव आश्रय इत्यत्रापि वाचकत्वरूपसप्तम्यर्थो वर्तते, तस्यापि तिङि चाश्रयतासबन्धेनान्वयमङ्गीकृत्य शाब्दबोधो क्रियते, आश्रयनिष्ठवाच्यतानिरूपितवाचकता वन्तः तिङः इति। "स्मृताः इत्यस्य पदस्य वचनविपरिणामेन धातुरित्यत्रैकवचनान्तत्वेन तथा च तिङ इत्यत्र बहुवचनान्तत्वेनान्वयः कर्तव्यः। यतः विशेष्य-वाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया अविवक्षायां विशेष्यविशेषणवाचकपदयोः समानवचनकत्वेन अत्र विशेष्यवाचकधातुपदोत्तरसंख्यायाः अविवक्षया समानवचनकत्वसम्पादनाय वचनविपरिणामेन "वेदा प्रमाणम्" इतिवत् नात्र दोषावसर इति। "वेदा प्रमाणम्" शतं ब्राह्मणाः" इत्यादौ विशेष्य वाचकवेदपदोत्तरविभक्तिजस्विभक्तितात्पर्यविषयसंख्यायाः विरुद्ध विशेषणवाचकपदोत्तरैकवचनसंख्यायाः विवक्षायान्नात्र विशेष्यविशेषण वाचकपदयो समानवचनकत्व नियम इति।

वाक्यार्थज्ञाने पदार्थज्ञानस्य कारणता सवैरनुभूताङ्गीकृता च अत एव पदार्थनिरूप्य तदुत्तरं वाक्यार्थं निरूपयति-फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्" इति। फले इत्यत्र निरूपितत्वमर्थः सप्तम्याः वर्तते, अत एव फलनिरुपितप्रधानता व्यापारे भवति, तथा च प्राचीन वैयाकरणानां व्यापारमुख्यविशेष्यकशाब्दोबोधः सेत्स्यति। अत्र फले अप्रधानमिति परिकल्प्य "एङः पदान्तादति" शास्त्रेण पूर्वरूपं प्रतिपाद्य मतान्तरेणफलनिरूपिताऽप्रधानत्वं व्यापारे भवतीति पक्षमं अङ्गीकृत्य नव्यवैयाकरणानामाचार्यनागेशभट्टीदीनां मते कर्मवाच्ये फलमुख्य-विशेष्यकशाब्दबोधसिद्धान्तोऽपि संसिद्ध्यत्येवेति अस्मद् गुरुचरणाः। तिङर्थाः कर्तृकर्मसंख्याकालाः एतेऽपि व्यापारे प्रकारतया भासन्ते।

ननु फलपदेनाऽस्मिँल्लोके लाभादिरूपस्य, अन्येच्छानधीविषयस्य बोधात्तथैवात्रापि बोद्धव्यम्, न हि लोकात् भिद्यते शास्त्रम् इति न्यायादिति चेदुच्यते-अत्र फलं विक्लित्यादिः।

विक्लिती रूपान्तरप्राप्तिरिति। तथा ह्युच्यते आचार्यभर्तृहरिणा–"यस्यार्थस्य प्रसिद्ध्यर्थम् आरभन्ते पचादयः, तत्प्रधानं फलं तेषां न लाभादिः प्रयोजनम्" इति।

व्याकरणे यथा फलं पारिभाषिकं वर्तते, तथैव व्यापारोऽपि। सम्प्रति व्याकरणाभिमत-व्यापारपदार्थं बोधयति–"व्यापारस्तु भावनाऽभिधा=साध्यत्वेनाऽभिधीयमाना क्रियेति। अत्र शास्त्रे द्विविधा क्रिया प्रवर्तते सिद्धा, साध्या च। तयोरत्र साध्या क्रिया विवक्षते। अत्राप्युच्यते आचार्य-हरिणा "यावत्सिद्धमसिद्धं वा साध्यत्वेनाऽभिधीयते, आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते" इति। साध्यक्रियात्वञ्च क्रियान्तराकाङक्षानुत्थापकतावच्छेदकत्वरूपम्। सिद्धक्रियात्वञ्च क्रियान्त-राकाङ्क्षोत्थापकतावच्छेदकत्वरूपत्वमिति। उक्तञ्चात्रापि हरिणा–"सत्वस्वभावमापन्ना व्यक्तिनामभिरुच्यते, असत्वभूतो भावश्च तिङपदैरभिधीयते"। तथा चोक्तम् "साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना, सिद्धभावस्तु यस्तस्याः स घञादिनिबन्ध इति। अत एव स्तोकस्य साध्यविशेषणे "स्तोकं पाकः" तथा च सिद्धक्रियाविशेषणत्वे" स्तोकः पाकः इत्युभयं सिध्यतीति प्रभाकृतः।

ननु पचतीत्यनेन फूत्कारत्वाऽधः सन्तापनत्वचुल्युपरिधारणत्वाद्यनेकव्यापाराऽवबोधकत्वा-न्नानार्थतापत्तिरिति चेन्न तदादिन्यायेनाऽत्र दोषो वार्यते। तथा हि "स घटः" इत्यत्र घटपदार्थः तत्पदवाच्यो वर्तते, तत्पदस्य घटार्थे शक्तत्वात् तथैव "स पटः" इत्यत्रापि घटपदार्थः तत्पदवाच्यो वर्तते तत्पदस्य पदार्थे शक्तत्वात् एवमेव अन्यत्रापि। अतः तत्पदवाच्यः क्वचित् घटपदार्थ क्वचिच्च पटपदार्थ इति अतः अनेकपदार्थे तत्पदस्य शक्तत्वेऽपि यथा नानार्थतापत्तिर्न तथैवात्रापि तद्दोषो वार्यते इत्याशयः। अत एवोच्यते आख्याते क्रियैकत्वव्यवस्थापि अवच्छेदक-बुद्धिविशेषैक्यमादाय। अत्र विषये उक्तञ्च वाक्यपदीये "गुणभूतैरवयवैः समूहः क्रमजन्मनाम् बुद्ध्या प्रकल्पिताऽभेदः क्रियेति व्यपदिश्यते"।

धात्वर्थं निरूप्य सम्प्रति तिङर्थमाह–आश्रये तु तिङ स्मृताः" आश्रये=फलाश्रये व्यापाराश्रये च तिङ् प्रत्ययस्य शक्ति इति यावत्। ननु तिङपदेन आश्रयमात्रस्य बोधात् कथं फलाश्रयस्थ व्यापाराश्रयस्य च बोधः सम्भवतीति चेदुच्यते–"अनन्यलभ्यो हि शब्दार्थः" इति सिद्धान्तेन फलव्यापारयोः धातुलभ्यत्वात् तिङशे आश्रयमात्रनिरूपितशक्तिरिति।

सम्प्रति वैयाकरणान्प्रति आक्षिपन्ति मीमांसकाः। ननु अनयोः (कर्तृकर्मणोः) आख्याता-र्थत्वे किं मानमिति? प्रतीतेः अर्थात् "येन शब्देन यदर्थबोधो जायते स तस्यार्थः" इत्यनेन बोधः सम्भवः स्यादिति चेत्तर्हि लक्षणया, आक्षेपात्, प्रथमान्तपदाद् वा इति हेतुत्रयेणापि सम्भविष्यति, अतः तत्र प्रतीत्या वोधो नावश्यक इति तथा हि–

**लक्षणया–**

यथा "गङ्गायां घोषः" इत्यादौ यथा गङ्गापदं तीरबोधकं भवति तथैवात्रापि तिङप्रत्ययो लक्षणया कर्तृबोधको भविष्यति। ननु लक्षणया कर्तृवोधत्वेऽपि भावनाबोधो न सम्भवेत् युगपद्-वृतिद्वयबोधोऽसम्भवादिति चेदुच्यते भावनाश्रये लक्षणाङ्गीकर्तव्येति ननु तिङपदस्य भावनाश्रये लक्षणायाञ्च सत्यां भावनायाः आश्रयपदे प्रकारत्वादप्रधानत्वापत्तिरिति चेद्द्वितीयहेतुमाह–

**आक्षेपात्-**

आक्षेपोऽनुपपत्तिरर्थापत्तिरिति यावत्। "येन विना यदनुपपन्नं तत्तेनाऽक्षिप्यते" यथा पीनोऽयं देवदत्तः दिवा न भुङ्क्ते" इत्यत्र भोजनं विना पीनत्वानुपपन्नत्वाद्रात्रिभोजनमाक्षिप्यते, तथैवात्रापि आश्रयं विना भावनायाः अनुपपन्नत्वादावनयाश्रयआक्षिप्यते। ननु पदनिष्ठवृतिज्ञान जन्यपदार्थोपस्थितिविषयस्यैव शाब्दबोधे प्रकारतया विशेष्यतया वा भानस्य नियतत्वेन आक्षिप्तस्य पदार्थस्य भानमसम्भवमिति चेत् उच्यते प्रथमान्तपदाद् वेति।

**प्रथमान्तपदाद्-**

ननु पचत्यादितिङन्तपदसमभिव्याहृतात् चेत्रादिपदादेव आश्रयप्रतीत्युपपत्तेरिति चेन्न प्रतीतेः वैपरीत्यान्न उपर्युक्तहेतुत्रयकर्तृकर्मणो साधकम्। अत एव स्वमतमाह-लः कर्मणि च भावे चाऽकर्मकेभ्यः इति सूत्रमेव मानम्।

ननु सूत्रमिदं कर्तृकर्मनिरूपितशक्तिं लकारे बोधयति न तु तिङप्रत्यये, अतः आख्यातार्थः अर्थात् तिङर्थः कर्तृकर्म इति कथं वक्तुमुत्सहते इति चेदुच्यते "बोधकतारूपां तिवादिशक्तिं तत्तद् स्थानित्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्मणि कर्तरि चानेन विधीयन्ते, नकारविसर्गादिनिष्ठाकर्मकरणादिबोधकताशक्तिमादाय शसादिविधानवत् इति।

सहायक-प्रोफेसर, व्याकरणविभागः

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# समावेशात्मकशिक्षायां श्रवणक्षतियुक्तच्छात्राणां शिक्षा

-डॉ. हरिओम

श्रवणक्षतियुक्तता एकप्रकारस्य श्रवणेन्द्रियसम्बन्धिः क्षतिः वर्तते। या श्रवणे बाधामुत्पादयति। अनया एव बाधया छात्रस्य मौखिकः शाब्दिकश्च विकासः उत्तमतया सम्यग्तया न सम्भवति। शिक्षायाः अर्जनकरणदृष्ट्या श्रवणक्षतियुक्तता (Hearing Impairment) एका एतादृशी शारीरिकी असमर्थता वर्तते यया छात्राः शिक्षार्जने काठिन्यमनुभवन्ति। इदमेव कारणमस्ति यत् छात्रान् श्रोतुं विशिष्टोपकरणानामावश्यकता भवति। ये छात्राः पूर्णरुपेणश्रोतुमयोग्या भवन्ति ते बधिरा इत्युच्यन्ते। येषां श्रवणेन्द्रिये केचन दोषाः भवन्ति तान् समाजेऽस्मिन् 'न्यूनश्रौता'

'उच्चश्रौता' (Hard of Hearing) वापि भणन्ति। श्रवणशक्तिरेव मौखिकसन्देशवाहकाधिगमः विकासस्य, मानसिकविकासस्य, भाषाविकासस्य च सशक्तसाधनमस्ति।

**श्रवणक्षतियुक्ततायाः कारणानि-**

बालकेषु श्रवणक्षतिः विशिष्टकारणैः जायते। तानि कारणानि अधोलिखितानि सन्ति-

1. जननिककारणम् (Genetic Causes)
2. जर्मनखसरा (German Measles)
3. गर्भावस्थायां श्रवणक्षतियुक्तता (Hearing Impairment in Duration of Pregnancy)
4. असामयिकप्रसवः (Premature Delivery)
5. असुरक्षितप्रसवः (Unsafe Delivery)
6. रोगः (Illness)

   6.1 कनफेड (Mumps)

   6.2 खसरा (Measles)

   6.3 चेचक (Smallpox)

   6.4 मोतिझारा (Typhoid)

   6.5 कुकरखांसी (Whooping Cough)

   6.6 कान में मवाद (Pus in Ear)

   6.7 असन्तुलिताहारः (Unbalance Diet)

**श्रवणक्षतियुक्ततायाः प्रकाराः-**

1. अल्पश्रवणक्षयबालकाः
2. मन्दश्रवणक्षयबालाकाः
3. गम्भीरश्रवणक्षयबालकाः
4. गहनश्रवणक्षतियुक्तबालकाः

**श्रवणक्षतियुक्ततायाः लक्ष्णानि-**

1. उच्चारणस्य शक्तयाः विकासः न भवति।
2. तेषां भाषाया विकासो न भवति।
3. तेषां शैक्षिकोपलब्धिस्तर अतीवनिम्नो जायते।
4. एतादृशाः छात्रा विद्यालये पाठितपाठस्य विषये काठिन्यमनुभवन्ति।

5. एतेषु परीक्षणानां प्रयोगो प्रभावितरूपेण सशक्तरूपेण च न भवितुमर्हति।
6. एतेषां समायोजनस्य प्रमुखा समस्या भवति कुत्रचिदपि एते व्यवहारकरणे काठिन्यमनुभवन्ति।
7. छात्रस्य दृष्टिकोण: स्वस्य कृते एव नकारात्मक: भवति।
8. एतादृशेषु हीनभावना उत्पद्यते।
9. छात्रा: समाजे अनुचितं व्यवहारं कुर्वन्ति।
10. पलायनस्य प्रवृति: तेषु भवति।

**श्रवणक्षतियुक्तच्छात्रेभ्य: शिक्षाया उपाया:-**

श्रवणक्षतियुक्तच्छात्रै: सह सा सर्वप्रमुखा समस्या भवति साऽस्ति सम्प्रेषणमिति। यतोहि एतादृशा: छात्रा: सम्प्रेषणे काठिन्यमनुभवन्ति। ये श्रोतुमसमर्था भवन्ति तेषां कक्षाधिगम अपि प्रभावितो भवति। एतेषां छात्राणां शिक्षायै विशिष्टसम्प्रेषणप्रविधीनामुपयोग: करणीयो भवति। केषाञ्चित् विशिष्टप्रविधीनामुल्लेखोऽत्र क्रियते-

1. चिह्नभाषा (Sign Language)
2. औष्ठपठनभाषा (Lip Reading)
3. सङ्केतभाषा (Symbol Language)
4. स्पर्शविधि: (Touch Method)
5. गतिविधि: (Movement Method)
6. सहायकयन्त्राणि (Helping Emplifiers)

**शिक्षणप्रविधय:-**

एषां छात्राणाङ्कृते अधोलिखितप्रविधीनाम् उपयोग: भवितुमर्हति-

1. कक्षायां शिक्षककरणसमये प्रश्ना अपि पृच्छेयु:। अनेन ज्ञायते यत् स: कियत् ज्ञातवान्।
2. एतेषां छात्राणां कृते शिक्षणसामग्रीं लेखितुं सहायकस्यावश्यकता भवति। तस्य कृते सहायकस्य उपलब्धता स्यात्।
3. सहायक: छात्रान् प्रति संवेदनशील: स्यात्।
4. एतेषां छात्राणां विशेषप्रशिक्षणं स्यात्।
5. एतेषां छात्राणाम् अधिगमन्यूनतासु विशेषरूपेण ध्यानं देयम्।
6. आधुनिक श्रवणक्षतियुक्तच्छात्राणां शिक्षणे सङ्गणकस्य प्रयोग: स्यात्।

**शैक्षिकावश्यकतानामुपलब्धिः-**

एतेषां छात्राणाम् आवश्यकनित्यकार्याणां करणे सहायतायै सुविधानां व्यवस्था करणीया। एताभिः सुविधाभि अवश्यमेव श्रवणक्षतियुक्तच्छात्रा लाभान्विताः स्युः। एताः सुविधास्सन्ति-

1. श्रवणसाहायकसामग्री (Hearing Aid Vests) ध्वनिककर्णस्य (Ear Phone) प्रयोगो कर्तुं शक्यते।
2. दृश्यस्य प्रयोगो कर्तुं शक्यते।
3. कक्षायां सामूहिकश्रवणं सर्वेभ्यः श्रवणक्षतियुक्तबालकेभ्यः प्रदीयते। ये कोऽपि क्षवणक्षतियुक्ततया पीड़िता स्युः।
4. प्रशिक्षितशिक्षकः एतेषां शिक्षणाय प्रोजेक्टर इत्यादीनां प्रयोगं कुर्यात्।
5. एतादृश्येभ्यः छात्रेभ्यः पृथक्कक्षा स्यात्।
6. एतेषां कृते पृथक्विद्यालयानां व्यवस्थापि भवेत्।

**श्रवणक्षतियुक्तच्छात्रेभ्यः व्यवसायिकनिर्देशनम्-**

एतेषां छात्राणां रुचि-अभिरुचि-क्षमता-योग्यतानामनुसारेण शैक्षिकनिर्देशनेन सह विचारोऽपि यत् कः छात्रः कस्मिन् व्यवसाये उपयुक्तः स्यात्। एतादृशाः सर्वे छात्राः तादृशव्यवसायेषु उपयुक्ता भवन्ति यत्र शाब्दिकसम्प्रेषणं मा स्यात्। तद्यथा-

1. टङ्कणम्।
2. विद्युतसम्बन्धिकार्याणि।
3. भोजननिर्माणेन सम्बन्धिकार्याणि।
4. काष्ठसम्बन्धिकार्याणि।
5. कलात्मककार्याणि।

इत्थम् एतादृशेभ्यः श्रवणक्षतियुक्तच्छात्रेभ्यः शिक्षां प्रदातुं शक्यते।

**सन्दर्भग्रन्थाः**

1. समावेशी शिक्षा।
2. विशिष्टकक्षा में शिक्षा।
3. सम्मिलितशिक्षा।

सहायक-प्रोफेसर, शिक्षाशास्त्रविभागः

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# शैक्षिकानुसन्धाने प्राक्कल्पनायाः रचनाविधिः

–सन्तोष गोडरा

अनुसन्धानस्य प्रक्रमे समस्याकथनस्य पश्चात् उपयुक्तानां प्राक्कल्पनानां रचना अत्यन्तं महत्त्वपूर्णं कार्यमस्ति। प्राक्कल्पनायाः अभावे वैज्ञानिकाध्ययनं प्रायः सम्भवो नास्ति। अत्र कारणमस्ति यत् समस्यायाः स्वरूपम् अधिकतया विषमं, विस्तृतं च भवति। अस्यां परिस्थितौ समस्यायाः यद् व्यापकक्षेत्रं भवति तस्य न्यूनता वा ह्रासता वा करणीया भवति। अनेन कारणेन अध्ययनस्य स्वरूपं स्पष्टं, सूक्ष्मं, गभीरञ्च भवति। यदि प्राक्क्लपनया अध्ययनस्य स्वरूपम् उपरोक्तप्रकारेण न भवति तर्हि अनुसन्धाता समस्यायाः अध्ययनाय इतस्ततः भ्रमति। तथा शोधप्रक्रिसमस्यायां नैकानि अनावश्यकतत्त्वानि संकलितानि भवन्ति, यतोहि प्राक्कल्पनायाः अभावे समस्यया सम्बद्धानि आवश्यकतत्त्वानां, चराणां वा विशिष्टज्ञानं न भवति। अतः अनुसन्धाने प्राक्कल्पनायाः रचना अत्यन्तं महत्त्वपूर्णं कार्यं विद्यते। अपि च शुद्धाः, उपयुक्ताः, वैधतायुक्ताश्च निष्कर्षाः परिणामेभ्यः मिलन्ति। अत एव अनुसन्धानविशेषज्ञैः प्रतिपादितं यत् अनुसन्धाने प्राक्कल्पनानां निष्कर्षाणां मध्ये कश्चन द्रढीयः सम्बन्धः वर्तत इति।

### अर्थः -

टाउनसैण्डमहोदयस्य अनुसारम् "प्राक्कल्पना एकस्याः समस्यायाः सम्भावितोत्तरमस्ति"। यद्यपि इयं परिभाषा असम्पूर्णा अस्ति यतोहि उत्तरशब्दस्य स्वरूपं स्पष्टं न जातम्। उत्तरशब्दस्य कलिंगरमहोदयेन उक्तं यत् प्राक्कल्पना द्वयोः चरयोः वा तदधिकानां चराणां मध्ये विद्यमानस्य सम्बन्धस्य विषये एकं कल्पनात्मकं कथनमस्ति। (A hypothesis is defined as a suggested answer to a problem)[1] (A hypothesis is a conjectural statement of the relation between two or more variables.)[2]

### परिभाषा -

ब्राउनघिशैलीमहोदयैः प्राक्कल्पनां परिभाषयन्तौ – प्राक्कल्पना तथ्यात्मकानां, सप्रत्यया–त्कानां तत्त्वानां मध्ये विद्यमानस्य सम्बन्धस्य विषये एकः तादृशः प्रस्तावः वर्तते, यस्य प्रस्तावस्य उद्देश्यानि ज्ञाततथ्यानाम्, अनुभवानाम् अतिरिक्तरूपेण ज्ञाने, परिज्ञाने विकासं साधयतीति।[3]

### अङ्गानि -

- प्राक्कल्पनया शोधसमस्यायाः सम्भावितोत्तरस्य प्रस्तावो लभ्यते।
- प्रस्तावे द्वौ चरौ वा तदधिकाः चरा वा भवन्ति।

- ये प्रस्ताविताः चराः सन्ति ते अवश्यं परीक्षणयोग्याः भवेयुः।
- संकलितानां दत्तांशानां गम्भीररूपेण निरीक्षणं, विश्लेषणं चावयाश्यं स्यात्।
- प्राक्कल्पनानां स्वीकारो वा अस्वीकारो वा भवेत्।
- अनेन शोधसमस्यायाः उपयुक्तं समाधानं मिलेत्।

प्राक्कल्पना एकस्याः शोधसमस्यायाः सम्भाव्यः, परीक्षणयोग्यः प्रस्तावः विद्यते। अस्याः आधारेण सम्बद्धानां चराणां, घटनानाम् आनुभाविकम् अध्ययनं कर्तुं शक्यते। एवञ्च समस्यायाः पर्याप्तम्, उपयुक्तं, वैधतायुक्तं समाधानम् उपलभ्यते।[3]

**प्राक्कल्पनानां वर्गीकरणम् -**

(अ) अप्रायोगिकप्राक्कल्पना

1. समस्तरीयप्राक्कल्पना
2. विषमस्तरीयप्राक्कल्पना
3. विशेषस्तरीयप्राक्कल्पना

(आ) प्रायोगिकप्राक्कल्पना

1. अस्तित्वपरकप्राक्कल्पना
2. सांख्यकीयप्राक्कल्पना

(अ) निराकरणीयप्राक्कल्पना

(आ) प्रायोगिकप्राक्कल्पना

सकारात्मकप्राक्कल्पना (धनात्मकप्राक्कल्पना)

नकारात्मकप्राक्कल्पना (ऋणात्कप्राक्कल्पना)

(इ) सम्प्रत्ययात्मकप्राक्कल्पना

(ई) सार्वभौमिकप्राक्कल्पना

**कारकाणि -**

- पूर्वनिष्कर्षेभ्यः परं नवीननिष्कासनां निस्सरणम्।
- अपूर्वव्याख्यायाः तथ्यात्मकव्याख्याकरणम्।
- वैज्ञानिकस्य बौद्धिकशक्तिः।
- आन्तरिकप्रेरणा।
- आनुरूपता।

- विशेषज्ञानाम् अभिप्रायः।
- वैज्ञानिकसिद्धान्तानाम् अध्ययनम्।
- वैय्यक्तिकानुभवाः।
- संस्कृतीनाम् अध्ययनम्।
- सम्बद्धसाहित्यस्य वैज्ञानिकरीत्या अध्ययनम्।[4]

**विशेषताः -**

- प्राक्कल्पना परीक्षणयोग्या स्यात्।
- सामान्यतः प्राक्कल्पनाः स्वानुसन्धानक्षेत्रेण सम्बद्धानां प्राक्कल्पनानाम् अनुरूपं भवेयुः।
- प्राक्कल्पना अल्पव्ययययुक्ता भवेत्।
- प्राक्कल्पना स्वकीयशोधसमस्यायाः स्पष्टमुत्तरं दद्यात्।
- प्राक्कल्पनायां तर्कसङ्गता सरलता स्यात्।
- प्राक्कल्पनायाः कथनं मात्रात्मकं भवेत्।
- प्राक्कल्पनाया नैकाः परिणामाः उपलब्धाः स्युः।
- प्राक्कल्पनायाः सम्बद्धानां चराणां व्याख्या निहिता स्यात्।
- प्राक्कल्पनायाः स्वीकारो वा अस्वीकारो वा समानरूपेण भवेत्।
- प्राक्कल्पनायाः स्वरूपं यथासम्भवं विधिनिर्धारितं भवेत्।
- प्राक्कल्पनाः निरूपणयोग्याः स्युः।[5]

**प्राक्कल्पनायाः कार्याणि -**

1. प्राक्कल्पना व्याख्यानरूपेण कार्यं साधयति।
2. प्राक्कल्पना अनुसन्धानं प्रेरयति।
3. प्राक्कल्पना विधीनां विकासो करोति।
4. प्राक्कल्पना प्रायोगिकप्रविधीनां मूल्याङ्कने समर्था भवति।
5. प्राक्कल्पना संगठनात्मकशक्तिरूपेण कार्यं करोति।
6. प्राक्कल्पना समस्याया-क्षेत्रस्य सीमाङ्कनं करोति।
7. प्राक्कल्पना तर्कसङ्गतदत्तांशानां संकलने सहकरोति।
8. प्राक्कल्पना चरेषु विद्यमानस्य सम्बन्धस्य विशेषज्ञैनं प्रददाति।
9. प्राक्कल्पना वैज्ञानिकनिष्कर्षाणां तथ्यानां च परिज्ञानं ददाति।
10. प्राक्कल्पना सिद्धान्तस्य रचनायां साहाय्यं करोति।[6]

**प्रामाणिकता** -

प्राक्कल्पनायाः प्रामाणिकता निम्नपरिस्थितिषु अङ्गीक्रियते। यथा-

1. यदा शोधसमस्यायाः पर्याप्तरूपेण उत्तरम् उपलभ्यते तदा।
2. यदा समस्यायाः उत्तरं संयोगजन्यकारकेभ्यः अत्यन्तम् उच्चैः तिष्ठति तदा।
3. यदा समस्यायाः प्राक्कल्पनानां रचनासमयः निश्चितः, निर्धारितविश्वासस्तरः भवति तदा।
4. यदा प्राप्तानां निष्कर्षाणामाधारे चराणां माध्यमेन व्याख्यात्कक्षमताम् लभते तदा।
5. तदा प्राप्तानां तथ्यानाम् आधारे भावि अध्ययनाय सूचनाः दातुं क्षमतां प्राप्नोति तदा।
6. यदा सर्वासां प्राक्कल्पनानामपेक्षया तासु एकस्याः प्राक्कल्पनायाः प्राप्ततथ्यानि श्रेष्ठानि भवन्ति तदा।

**कथनप्रक्रिया** -

1. प्राक्कल्पनायाः रचनायाम् मूल्यकथनानि कदापि नोपयोक्तव्यानि।
2. प्राक्कल्पनायाः रचनायाम् कथनानि यदि - तर्हि इत्यादीनाम् आदारेण भवितव्यानि।

उदाहरणार्थं ममैव शोधसमस्याम् "**राजस्थानस्य संस्कृतविभागीयक्रीडकच्छात्राणां सामान्यच्छात्राणाञ्च संस्कृतविषये शैक्षिकोपलब्धेः पाठ्यगामिक्रियाणाञ्च तुलनात्मक-मध्ययनम्**" आधृत्य प्राक्कल्पनायाः रचना निम्नामुसारं वर्तते -

1. पाठ्यसहगामिक्रिया विशिष्टबालचरकार्यक्रमस्यायोजनेन छात्रव्यक्तित्वसमूहे कार्यभावना, राष्ट्रसेवाभावना, स्वावलम्बनादयः गुणाः विकसन्ति।
2. पाठ्यसहगामिक्रियाः कार्यक्रमाः छात्रव्यक्तित्वे तादृशानां विविधकौशलानां समावेशः भवति येन समावेशेन समाजे सायोजिताः भवन्ति।
3. माध्यमिकविद्यालयेषु सञ्चाल्यमानाः क्रीडककार्यक्रमाः छात्रस्य सर्वाङ्गीणविकासो भवति।
4. छात्राणां व्यक्तित्वविकासे सह-शैक्षणिकगतिविधयः उपकुर्वन्ति।
5. पाठ्यसहगामिक्रियाकार्यक्रमाः तादृशानां छात्र-छात्राणां सर्जनं कुर्वन्ति, ये प्राकृतिक-विपत्तिकाले, युद्धकाले च महत् सेवाकार्यं कुर्वन्ति।

**निष्कर्षः** -

अनेन शोधपत्रसारांशेन ज्ञायते यत् शैक्षिकानुसन्धानकार्ये अत्यन्तं महत्वपूर्णं कार्यं वर्तते - प्राक्कल्पनायाः रचनेति, तां विना अनुसन्धानं निष्फलं भवतीति, अतः

अनुसन्धानकर्तारः प्राक्कल्नानां निर्माणावसरे अवश्य परोक्तानां विषयाणाम् उपरि विशेषरूपेण ध्यानं दत्वा स्वानुसन्धानकार्यं सम्पादयेयुरिति शम्।।

**सन्दर्भाः -**


1. Townsend J.C., (1953), Introduction Experimental Methods, pp.45
2. Kerlinger F.N., Foundation of Behavioral Research, pp.20
3. कपिल, एच.के., (2006), अनुसन्धानविधियाँ, पृ.सं. 39-42
4. सरीन एवं सरीन, शैक्षिकअनुसन्धान विधियाँ, पृ.सं. 92-94
5. कौल, लोकेश, (1998), शैक्षिक अनुसन्धान की कार्यप्रणाली
6. बुटा, के.डी., (2002), व्यावहारात्मक अनुसन्धान में प्रायोगिक अभिकल्प


सहायक-प्रोफेसर, शिक्षाविभागः

✦✦✦

**Shri Vaishnavi 2017** **ISSN : 7552277-906X**

# पुराणमाहात्म्यम्

**-डा.जि.अमरेश्वरकुमारः**

**उपक्रमः -**

अस्माकं संस्कृतवाङ्मये अष्टादशपुराणानि सन्ति। तेषु षट् सात्विकपुराणानि, षट् राजसपुराणानि, षट् तामसपुराणानि।

**पुराणपुरुषाज्जातं यथेदं जगदद्भुतम्।**
**तथेदं वाङ्मयं जातं पुराणेभ्यो न संशयः।।** (नारदीयपुराणम्)

इदम् अद्भुतं जगत् यथा परमात्मनः उत्पन्नं तथा इदं संस्कृतभाषावैभवं पुराणेभ्यः जातम्, अत्र सन्देहः न कर्तव्यः।

**पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्।**
**अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः।।** (वायुपुराणम्- 1-60-6)

ब्रह्मदेवः सर्वशास्त्राणां प्रथमं पुराणं स्मृतवान्। अनन्तरं तस्य वक्त्रेभ्यः वेदाः निःश्वास-रूपेण विनिर्गताः। अतः सृष्टेः मूलभूतं कारणं पुराणम्।

**विषयः -**

सृष्टिकर्तुः ब्रह्मणः प्रथमनिःश्वासं पुराणम्। अनन्तवाङ्मयाविभावस्य मूलभूतकारणं पुराणम्। भारतीयसंस्कृतेः मूलभूतं वेदधर्मं लोके सुप्रतिष्ठितं कर्तुंम् आविर्भूतानि सुलभसाधनानि पुराणानि। अत एव नारदमहापुराणे एवमुक्तम्–"वेदाः प्रतिष्ठितास्सर्वे पुराणेष्वेव सर्वदा" इति (ना.पु.2.24.18) विषयममुं स्कन्दपुराणमपि एवं समर्थयति "आत्मा पुराणं वेदानाम्" इति।

**यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः।**
**न चेत्पुराणं संविद्यान्नैव स स्याद्विचक्षणः॥** (वायु.पु. 1.2.180)

ब्राह्मणः वेदवेदाङ्गनिष्णातोऽपि पुराणविज्ञानरहितश्चेत् सः विचक्षणः न भवेत्। लोकज्ञान-रहितः स्यादित्यर्थः। देवीभागवतं तावत् परमेश्वरस्य श्रुतिस्मृती नेत्रे पुराणं हृदयमिति पुराणस्य प्राशस्त्यं वर्णयति–

**पुराणशब्दनिष्पत्तिः**

"पुरा भवं पुराणम्" प्राचीनकालोत्पन्नमित्यर्थः। (शब्दकल्पद्रुमः) "पुराऽपि नवं पुराणम्" प्राचीनकालसम्बन्ध्यपि एतत् विषयवैशिष्ट्येन नूतनत्वप्रतिभासमानमित्यर्थः। (यास्क-निरुक्तम्-3.9.34)

"पुरा पूर्वस्मिन् भूतमिति पुराणम्" - (अमरकोशः, गुरुवालप्रबोधिका) पुरा आगतानागतौ अणति कथयति इति पुराणम्। "अण–शब्दे" इति धातुः। पुरा इत्यव्ययस्य भावार्थे सायं चिरं प्राह्णे" इत्यादिसूत्रेण (4-3-32) "ट्यु" प्रत्यये तस्य "यवोरनाकौ" इति सूत्रेण अनादेशे नकारस्य णत्वे पुराण शब्दः निष्पन्नः। अस्य शब्दस्य अनादेशे नकारस्य णत्वे पुराण शब्दः निष्पन्नः। अस्य शब्दस्य अतीत(भूत)कालवाचित्वमिव अनागत(भविष्यत्)कालबोधकत्वमिति। "पुरा नीयत" इति पुराणम् वाचस्पत्यम्। प्राग्वृत्तकथनं पुराणम्-शुक्रनीतिः(4-92) पुराणशब्दस्य निघण्टुष्वुक्तानां व्युत्पत्तीनां मूलभूतानि वचनानि केषुचित्पुराणेषु दृश्यन्ते।

**यस्मात्पुरा ह्यनक्तीदं पुराणं तेन वा स्मृतम्।**
**निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते॥** (वायु.पु.1.1.200)

पुरा प्राचीनकालोदन्तं अनक्ति, व्यनक्ति, बोधयति पुराणमित्यर्थः।

**पुरा परम्परां व्यक्ति पुराणं तेन वै स्मृतम्**–प.पु.1.2.54

**यस्मात्पुरा ह्यभूच्चैतत् पुराणं तेन तत् स्मृतम्**–ब्र.पु.1.1.173

**पुरातनस्य कल्पस्य पुराणस्य विदुर्बुधाः**–म.पु.5.3.72

भविष्यपुराणे भविष्यकाले वर्तिष्यमाणकथांशाः पुराणत्वेन निबद्धाः। अतः कालक्रमेण

न केवलं प्राचीनार्वाचीनविषयाः अपि तु भविष्यत्कथार्थप्रतिपादकाः पुराणेषु प्रक्षिप्ता इति विमर्शकाः अभिप्रयन्ति।

**पुराणवेदयोः सम्बन्धः**

पुराणवेदयोः घनिष्ठः सम्बन्धः। एतत्सम्बन्धिनी चर्चा महाभारते पुराणेषु च बहुत्र दृश्यते। यथा –

1. आत्मा पुराणं वेदानाम्। (महाभारतम्)
2. इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। म.भा.आदि–1–1–294
3. पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः (म.भा.आ.–180)
4. वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः (पातञ्जलम्)
5. वेदार्थादधिकं मन्ये पुराणार्थम्। (तत्वसन्दर्भे–38)
6. इतिहासपुराणञ्च पञ्चमो वेद उच्यते। (नारदपुराणम्)
7. श्रुतिस्मृती उभे नेत्रे पुराणं हृदयं स्मृतम्। (नारदीयपुराणम्)
8. सर्ववेदार्थसाराणि पुराणानि। (न्यायभाष्यम्)

अत एव वेदपुराणयोः सम्बन्धः सर्वैरङ्गीक्रियते।

**पुराणेतिहासयोः सम्बन्धः।**

पुराणमितिहासश्च भिन्नार्थकापि अभिन्नार्थकौ। पुराणस्य व्युत्पत्तिलभ्योऽर्थः पुराभवमिति पुराणम्। अर्थात्–प्राचीन कालिकी घटनावली। इतिहासस्य व्युत्पत्तिलभ्योऽर्थः – इतिह(पारम्पर्योप-देशेऽव्ययम्) तदस्मिन्नास्ते इति इतिहासः।

अमरकोशे यल्लक्षणमितिहासस्य कृतं तदेव महाभारतस्य नीलकण्ठटीकायां पुराणस्यापि कृतम्। यथा –

**इतिहासः पुरावृत्तम् ( अमर–1–5–4 )**

अर्थात् सर्गप्रतिसर्गवंशमन्वन्तरवंशानुचरितानि दानतीर्थव्रतावताराश्च यत्र सन्ति तत्पुराणम्। ततो भिन्नः प्राचीनाख्यानात्मको नानाविषयसंवलितो लोकव्यवहारयुक्तश्च इतिहासः। इति।

**पुराणलक्षणम् –**

सृष्टिः, प्रलयः प्रसिद्धराजवंशपरम्परा मन्वन्तरदेवर्षिराजवंशेषु समुत्पन्नानां विशिष्टव्यक्तीनां पावनचरितवर्णनञ्चेति पञ्चविषयाः प्रधानतया यस्मिन् ग्रन्थे विवेचिताः सन्ति तत् पुराणमुच्यते।

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चेति लक्षणानां तु पञ्चकम्॥** (अ.को.)इति

**महापुराणलक्षणम् -**

भागवतमहापुराणं उपपुराणं पञ्चलक्षणं, महापुराणं दशलक्षणसमन्वितं भवेदिति नूतनं विवरणं प्रददाति।

**सर्गोऽस्याथ विसर्गश्च वृत्तीरक्षान्तराणि च।**
**वंशो वंशानुचरितं संस्थाहेतुरपाश्रयः।।**

**दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः।**

केचित्पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया। (श्री.भा.12.अ.7.श्लो.9,10)

येषु पुराणेषु दशानां लक्षणानां वर्णनं विद्यते तानि महापुराणानि कथ्यन्ते। येषु च पञ्च-लक्षणस्यास्ति प्राधान्यं तानि लघुपुराणानि, उपपुराणानि वा प्रोच्यन्ते।

**पुराणविभागः -**

पाद्मपुराणं तावत् गुणत्रयविभागमनुसृत्य पुराणानि त्रेधा विभजति। सात्विक-राजसतामसा-नीति।

1. सात्विकानि -

**वैष्णवं नारदीयञ्च तथा भागवतं शुभम्।**
**गारुडं च तथा पाद्मं वाराहं शुभदर्शने।।**
**सात्विकानि पुराणानि विज्ञेयानि शुभानि वै।**

2. राजसानि -

**ब्रह्माण्डं ब्रह्मवैवर्तं मार्कण्डेयं तथैव च।**
**भविष्यं वामनं ब्राह्मं राजसानि निबोधत।।**

3. तामसानि -

**मात्स्यं कौर्मं तथा लैङ्गं शैवं स्कान्दं तथैव च।**
**आग्नेयं च षडेतानि तामसानि निबोधत।।** प.पु.उ.ख.263.81.84

सात्विकपुराणानि श्रीमन्नारायणस्य गुणगणान् कीर्तयन्ति। एतानि मनुजानां मोक्षप्रदानि भवन्ति।

राजसपुराणानि सरस्वती-चतुर्मुख-वैश्वानराणां स्तोत्रपराणि। इमानि मानवानां स्वर्गदायकानि भवन्ति।

तामसपुराणानि महेश्वर, गणेश, स्कन्दान्, दुर्गादेवीं च स्तुवन्ति। अष्टादशपुराणेषु दशभिर्गीयते शिवः।

चतुर्भिर्भगवान् ब्रह्मा द्वाभ्यां देवी तथा हरिः।। (श्री.स्का.पु.के.ख.2.30.38)

इमानि पुराणानि महापुराणम्, उपपुराणमिति द्वेधा विभक्तानि। महापुराणानि अष्टादशेति

सर्वै: सर्वत्र परिगणितानि।

देवीभागवते पुराणानां गणनाक्रमो विहितोऽस्ति। यथा हि-

**म-द्वयं-भ-द्वयं-चैव ब्र-त्रयं व-चतुष्टयम्।**
**अ-ना-प-लिं-ग-कू-स्कानि पुराणानि प्रचक्षते।।** (दे.भा.1-2-3)

1. विज्ञानसर्वस्वसदृशानि पुराणानि-गारुड, अग्नि, नारदीयपुराणानि।
2. तीर्थव्रतमाहात्म्यान् अधिकतया वर्णितानि पुराणानि-पद्म, स्कान्द, भविष्यात्पुराणानि।
3. पूर्वोत्तरभागयो: प्रक्षिप्तानि पुराणानि-ब्रह्म, भागवत, ब्रह्मवैवर्तपुराणानि।
4. चारित्रिकांशबाहुल्यानि पुराणानि-ब्रह्माण्डपुराणम्, वायुपुराणम्।।
5. मतप्राधान्यपुराणानि-लिङ्ग, वामन, मार्कण्डेयपुराणानि।
6. विष्ण्ववतारनामान्यधिकृत्य अभिख्यातानि-मत्स्य, कूर्म, वराह पुराणानि इति।

**पुराणपरिचयः -( पुराणकर्ता )**

**अष्टादशपुराणानि कृत्वा सत्यवतीसुतः।**
**पश्चात्भारतमाख्यानं चक्रे तदुपबृंहितम्।।** म.भा.आ.प.1.26.7

उक्तमहाभारतश्लोकात् व्यासमहर्षि: अष्टादशपुराणानां कर्तेति स्पष्टं ज्ञायते।

**पुराणरचनाकालः**

पुराणानां आविर्भावकालं प्रति निश्चप्रचं न किञ्चिद्वक्तुं शक्यते। वेदानामिव इतिहास-पुराणादीनामपि काल: अत्यन्तं प्राचीन: इत्येव परं वक्तुं पार्यते।

पुराणानामाद्यत्वे परिदृश्यमानं परिनिष्ठितं रूपं तु क्रस्तो: पूर्वं पञ्चशताब्द्या:, षष्ठशताब्द्या वा परत एव निष्पन्नमिति विमर्शका: वदन्ति। तेषां मौलिकरूपं तु ततो बहुकालात्पूर्वमेवाऽऽ-सीदिति निर्णीयते।

गोपथब्राह्मणे पुराणानि स्मर्यन्ते - एवमिमे सर्वे वेदा: निर्मिता: सकल्पा: सरहस्या: सब्राह्मणा: सोपनिपत्का: सेतिहासा: सान्वयाख्याता: सपुराणा: सस्वरा: (गो.ब्रा.प्र.2)। बृहदारण्य-कोपनिषदि "इतिहास: पुराणं विद्या उपनिषद:" इति परामर्शोऽस्ति। (ब्रृ.इ.2.4.11)

**पुराणप्रवक्ता सर्वपूजनीयः**

**प्रख्यातो व्यासशिष्योऽभूतसूतो वै रोमहर्षणः।**
**पुराणसंहितां चक्रे पुराणार्थविशारदः।।** (वि.पु.3.6.16)

भगवान् व्यासमहर्षि: पुराणसंहितां विरच्य विषयानुरोधेन अष्टादशभि: पुराणै: विभागं कृत्वा शिष्येभ्य: उपदिष्टवान्। भगवान् व्यास: पुराणानि प्रथमं सूतमहर्षये (रोमहर्षणाय) सूतमहर्षि: स्वसुताय उग्रश्रवसे, उग्रश्रवा: नैमिशाख्ये शोनकादि(८८.000)मुनिभ्य: प्रोक्तवान्।

एवं प्रकारेण ऋषिपरम्परया पुराणानि लोके प्रचारं प्राप्नुवन्। स्कान्दपुराणे अयं विषयः एवं विशेषेण कथितः। पुराणवक्ता बालः युवा, वृद्धः, दरिद्रः, दुर्भगो वा पुण्यात्मभिः सः सदा वन्द्य एव। पुराणवेत्तरि कदाऽपि नीचबुद्धिं न कुर्यात्। पुराणप्रवक्तुः मुखान्निस्सृता वाणी मर्त्यानां कामधेनुतुल्या। पुराणप्रवचनसमये तस्य आसमाप्तिपर्यन्तं कस्यापि नमस्कारं न कुर्यात्। दुर्जन-सम्मिलिते, शूद्रश्वापदावृत्ते, द्यूतक्रीडास्थले प्राज्ञः पुराणं न वदेत्। सुग्रामे सज्जनसेविते सुप्रदेशे, देवालये पवित्रनदीतीरे, पण्डितः विष्णुकथाः वदेत्। ताम्बूलाद्यैरूपायनैः पुराणं सम्पूज्य तत्पुराणं भक्त्या शृण्वन्तः मनुजाः दरिद्राः पापात्मनः न भवन्ति। ये पुराणवेत्तारं अनभिवन्द्य उपविश्य (उन्नतासने) स्थित्वा शयित्वा विष्णुकथां शृण्वन्तः ते विषवृक्षाः, अजगराः गर्दभाः शुनकाः, कृकलासाः, वनसूकराश्च भवन्ति। पुराणप्रसङ्गमध्ये ये विघ्नं कुर्वन्ति ते कोटिवत्सरं नरकान् अनुभूय ग्रामसूकराः जायन्ते। पुराणप्रवक्तुः कम्बल, कृष्णाजिनवस्त्राणि, मञ्चकमेव आसनार्थं यच्छन्तः नराः स्वर्गलोकं प्राप्य ईप्सितान् भोगाननुभूय ब्रह्मादि लोकेषु स्थित्वा मुक्तिं प्रयान्ति। पुराणज्ञस्य नूतनयज्ञोपवीतं प्रयच्छन्तः प्रतिजन्मनि भोगिनः ज्ञानसम्पन्नाः भवन्ति। महापातकिनः, उपपातकिनो वा पुराणश्रवणादेव परमं पदमलङ्कुर्वन्ति। पुराणप्रवचने प्रचलति ये उत्तमाः अङ्गीकुर्वन्ति ते अश्रृण्वन्तो नित्यं मोक्षं यान्ति।

## पुराणप्राशस्त्यम्

भारतीयवाङ्मये पुराणसाहित्यस्य अद्वितीयं स्थानं वर्तते। वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः" (ना.पु.2.24.17. श्री.स्का.पु.प्र.ख.2.61)

पुराणानि तत्तत्कालेषु भारतीयजीवनविधानस्य संस्कृतेः स्वरूपस्वभावौ समग्रतया प्रस्फुटी-कुर्वन्ति। भारतीयसंस्कृतौ चरित्रे प्राचीनार्वाचीनजीवने पुराणानां विशिष्टं स्थानमस्ति। चतुर्दशविद्यासु पुराणस्यापि प्रमुखं स्थानं कल्पितमासीत्।

**अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।**
**पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश॥** (वि.पु.36-27)

**पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥** (याज्ञवल्क्यस्मृति 1-3)

निगूढान् वेदविषयान् इतिहासपुराणाभ्यां ज्ञापयेत्। श्री एम् विन्टर्निच् इति महाभागेन विरचिते A History of Indian Literature नाम्नि ग्रन्थे इतिहासाः पुराणानि स्त्रीशूद्राणां वेदविषयान् उपदेष्टुं विरचितानीति स्पष्टीकृतमासीत्।

सर्वेषु पुराणेषु प्रसङ्गवशात् वर्णधर्माः आश्रमधर्माः राजधर्माः मोक्षधर्माः पतिव्रताधर्माः सुभाषितानि, इत्यादिविषयाः प्रोक्ताः। धार्मिकविषयाः विविधानि व्रतानि शुभाशुभकर्माणि प्रायश्चित्तानि स्वर्गनरकसाधनानि युगधर्माश्च पुराणेष्वस्माकं लभ्यन्ते। अतः समाजस्य श्रेयसे उन्नत्ये एतानि पुराणानि बहूपकाराणीति सर्वजनसम्मतम्।

**उपसंहार:**

मुख्येन कलियुगे पुराणश्रवणात् ऋते जनानां उत्तम: धर्म: वा मोक्षदायकं वा नास्ति। विष्णुकथाश्रवणं नामसङ्कीर्तनं उभे वा मनुजानां पुण्यवृक्षमहाफले। प्रयत्नात् अमृतपानं कुर्वन् एक एव जरामरणरहित: स्यात्। परं तु विष्णो: कथामृतं पिबन् कुलं सर्वम् अजरामरं रक्षेत्।

किञ्च भगवदनुग्रहस्य साधने भक्तिज्ञानवैराग्यविषयबोधकानि पुराणानीति स्पष्टं ज्ञायते। पुराणेषु प्रतिपादिता: चतुर्विधपुरुषार्थानां विषया: वेदमूलका एव। वेदार्थोपबृंहणे, समाजस्य अभ्युन्नत्यै मानवश्रेयसे जनसामान्यस्य उपयोगाय आख्योपाख्यानरूपेण पुराणानि बहून् विषयान् उपदिशन्ति।

**उपयुक्तग्रन्थसूची**


1. आचार्य बलदेवानन्द उपाध्याय – पुराण–वमर्श – चौखम्बा विद्याभवन – वारणासी – 2007.
2. पण्डित गिरिधर शर्मा चतुर्वेदी – पुराण परिशीलन – बिहार राष्ट्रभाषा परिषद् – पटना – 1998.
3. पण्डित ज्वाला प्रसाद मिश्रा – अष्टादशपुराण दर्पण – राष्ट्रिय संस्कृत संस्थान, दिल्ली – 2005
4. नारदीयमहापुराणम् – राष्ट्रिय संस्कृत संस्थान, दिल्ली – 2002


प्रकाशनविभाग: श्रीवेङ्कटेश्वरवेदविश्वविद्यालय:, तिरुपति:

✦✦✦

**Shri Vaishnavi 2017** **ISSN : 7552277-906X**

# चतुरमल्लिनाथ:

**–सुरेश स्वामी**

संस्कृतवाङ्मयजगति मल्लिनाथस्य स्थानं कविपरम्परायाम् अद्वितीयमस्ति। यतोहि मल्लिनाथेन संस्कृतभाषायां विरचितेष्वनेकानेकमहाकाव्येषु प्रामाणिटीका विरचिता। मल्लिनाथ–विरचितायां व्याख्यायां समुचितसन्तुलनं सर्वासु रचनासु लक्ष्यते। वस्तुत: मल्लिनाथ: काव्यरचनासु,

व्याख्यासु, टीकासु च प्रवीणाः दक्षाः, चतुराश्च। अतः सः चतुरमल्लिनाथः इति नाम्ना प्रसिद्धोऽस्ति। कुत्रचिद् अस्य नाम कोलाचलमल्लिनाथः अपि लभ्यते।

मल्लिनाथस्य नाम्नः पूर्वं "कोलाचल" इति पदं तस्य पारिवारिकपरम्परां सूचयति। आन्ध्रप्रदेशस्य परम्परायाः अनुरूपं "कोलाचल" इति पदं तस्य परिवारस्य मूलस्थानं सूचयति। वर्तमाने तेलंगानप्रदेशे "कोलाचलमपुरी" नाम्ना ग्रामः विद्यते। तस्य विवरणं "वेलुगोतिकरिवंशावली" इति नामके ग्रन्थे लभ्यते। अतः स्वीक्रियते यत्-मल्लिनाथस्य ग्रामः "कोलाचलमपुरी" आसीत्। यः वर्तमाने तेलंगानाप्रदेशे स्थितोऽस्ति।

परम्परागततथ्यैः विवरणं प्राप्यते यत्-चतुर्दश-शताब्द्यां "कोलाचलमपुरी" कस्यचित् शक्तिसम्पन्नस्य भूस्वामिनः अधिकारे आसीत्। सः सर्वदा आगतानां विदुषाम् आदरपूर्वकं सम्मानं करोति स्म। मल्लिनाथः अपि तस्य सभापण्डितः आसीत्।

परं 'पेद्दुभट्टचरितम्' इति ग्रन्थस्य आधारेण मल्लिनाथस्य निवासस्थानं "तेवपुरम्" इति आसीत्। "दक्कन महाविद्यालयः, पुना" इति महाविद्यालयस्य पण्डितवामनाचार्यानुसारेण रघुवंशादीनां महाकाव्यानां टीकाकारः मल्लिनाथः काश्यपगोत्रीयब्रह्मणः आसीत्। तस्य निवासस्थान-मपि "गजेन्द्रगढ" इति आसीत्। मल्लिनाथस्य बाल्यकालः कोलाचलग्रामे व्यतीतः। तस्य अध्ययनं काश्याम् अभवत्।

अध्ययनानन्तरं सः भूस्वामिनः सभापण्डितः बभूव। किञ्चित्कालपर्यन्तं सः सिंहभूपालस्य सभापण्डितः बभूव। अन्ते च विजयनगरस्य सम्राजो देवरायस्य सभापण्डितः भूत्वा आजीवनं सारस्वतसाधनां कृतवान्।

### मल्लिनाथस्य कृतयः

महाकविमल्लिनाथेन मौलिकतया व्याख्यारूपेण, टीकारूपेण च द्वादश रचनाः कृताः। तासाम् उल्लेखः टी. ऑफ्रेक्ट-महोदयेन "केटलागस कैटलागारम्" इति ग्रन्थनामावलिपुस्तके कृतः।

1. अनिण्यन्तम् (तैत्तिरीयसंहिताधारितस्वरविभक्तिग्रन्थः)
2. रघुवंशटीका
3. कुमारसम्भवटीका
4. मेघदूतटीका
5. किरातार्जुनीयटीका
6. शिशुपालवधटीका
7. नैषधीयटीका
8. भट्टिकाव्यटीका

9. तार्किकटीका
10. एकावली टीका
11. उदारकाव्यम्
12. रघुवीरचरितम् (महाकाव्यम्) इति।

मल्लिनाथप्रणीतस्य रघुवीरचरितमहाकाव्यस्य सम्पादनं टी. गणपतिशास्त्रिमहोदयेन कृतम्। अनेनैव महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासने राजकीयमुद्रणयन्त्रालये 1917 तमे वर्षे रघुवीरचरितस्य प्रकाशनं कृतम्। तदर्थमेव डॉक्टरआफ्रेक्टसम्पादिते ग्रन्थानामवलिपुस्तके रघुवीरचरितं किमपि मल्लिनाथप्रणीतमिति निर्दिश्यते। अनेन अपि ज्ञायते यत्–रघुवीरचरितस्य प्रणेतारः मल्लिनाथः एव।

## मल्लिनाथस्य साहित्यिकं वैभवम्

मल्लिनाथस्य व्याख्यासु टीकासु च व्यापकं गम्भीरञ्च अध्ययनं स्पष्टतया विद्यते। मल्लिनाथस्य रघुवंशमेघदूतादिभिः टीकाभिः संस्कृतसाहित्यवाङ्यमं समृद्धिम् अधिगच्छति। तस्य सञ्जीवनी टीका तु बहु प्रसिद्धा वर्तते। यया पाठकाः पञ्चमहाकाव्यानां खण्डकाव्यानाञ्च अध्ययनं सारल्येन कुर्वन्ति।

मल्लिनाथेन विरचितं रघुवीरचरितं रामायणस्योपजीव्यमहाकाव्यानां विकासपरम्परायां विशिष्टमहाकाव्यमस्ति। "रामादिवद्वर्तितव्यं न रावणादिवत्" इति शिक्षां प्रथयद् महाकाव्यमिदं संस्कृतसहित्यजगति पुष्पसुगन्धवत् प्रशस्यते। भवभूतिना यथा उत्तररामचरितनाटकस्य माध्यमेन नवीनदृष्टिकोणस्य प्रतिपादनं कृतम्, तथैव मल्लिनाथेन रघुवीरचरितमहाकाव्येन राममहाकाव्य-परम्परायाः वीररसप्राधान्येन वृद्धिः कृता।

मल्लिनाथस्य भाषायां लालित्यस्य माधुर्यस्य औजसः प्रौढत्वस्य च समीचीनः समन्वयो लक्ष्यते। रघुवीरचरिते छन्दसामुपयोगः प्रमुखं वैशिष्ट्यम्। वंशस्थः उपजातिः, अनुष्टुप्, वसन्ततिलका मालिनी, चर्चरी, वियोगिनी द्रुतविलम्बितम्, इन्द्रवज्रा, उपेन्द्रवज्रा च छन्दसां प्रयोगः लक्ष्यते।

भावानुकूलया शब्दावल्या विनियोगपुरस्सरं शब्दालङ्काराणाम् अर्थालङ्काराणाञ्च प्रतिपद-मुपन्यासः सचेतसां चेतांसि नितरामवर्जयति। अस्मिन् महाकाव्ये रसनिरूपणे अपि महती विदग्धताऽवाप्यते। वीररसः सर्वातिशायी। अङ्गत्वेन करुण, विप्रलम्भ, रौद्रः, भयानकः, अद्भूतः इत्यादयः रसाः यथायथं विन्यस्ताः।

इत्थं संस्कृतसाहित्यजगति मल्लिनाथस्य साहित्यिकेन योगदानेन चतुरमल्लिनाथस्य सार्थकता सिद्धयति।

साहित्यशोधच्छात्रः, श्रीरणवीरपरिसरः, जम्मूः

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# कारकार्थविचारः

–पुरुषोत्तमदासः

वैयाकरणानां विशिष्टः सिद्धान्तः स्फोटात्मकः अस्ति। तत्र वाक्यस्फोटो मुख्यो वर्त्तते। अतएव महावैयाकरणकौण्डभट्टेन भूषणसारे उच्यते–वाक्यस्फोटोऽतिनिष्कर्षो तिष्ठतीति मतस्थितिः।

ताः एव सरणीः समधिगम्य सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन आदौ सन्धिप्रकरणमाह हरिः शेते, रामश्चिनोति इत्यादि। वाक्यार्थज्ञाने पदार्थज्ञानस्य कारणत्वे सति हरिः इति पदार्थस्य ज्ञानं समपेक्षितम्। तत्पदार्थबोधनाय तदग्रे षड्लिङ्गप्रकरणं निगदन्ति।

पुनः अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति इति सिद्धान्तेन सुबादिप्रत्ययानां स्वार्थिकत्वापत्ति–भिद्या कारकप्रकरणमारम्भन्ते। तानि च कारकाणि षट्–

**कर्त्ता कर्म च करणञ्च सम्प्रदानं तथैव च।**
**अपादानाधिकरणमित्याहुः कारकाणि षट्॥** इति

किं नाम कारकत्वम् इति कथ्यते–

क्रियान्वयित्वं कारकत्वम्, क्रिया जनकत्वं कारकत्वम्, क्रियानिर्वर्त्तकत्वम् कारकम् इति तत्तत्शास्त्रेषु लक्षणानि दत्तानि।

उपर्युक्त कारकाणाम् अर्थज्ञापनाय आचार्यकौण्डभट्टेन सुबर्थनिर्णयप्रकरणादौ कारिकेयं प्रस्तुता–

**आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा।**
**यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः॥** इति

तत्र षष्ठीविभक्तेः कारकत्ववारणाय साक्षात् पदमपि देयम् इति कैश्चिदुच्यते अर्थात् साक्षाद् क्रिया जनकत्वं कारकत्वम् इति। पुनः प्रातिपदिकार्थे कारकत्ववारणाय कारकाधिकार–पठितत्वमपि वदन्ति केचन। तदा निष्कृष्टलक्षणं भवति कारकाधिकारपठितत्वे सति साक्षाद् क्रियाजनकत्वं कारकत्वम्।

अत्र आश्रयपदेन द्वितीया, तृतीया सप्तमीनां बोधो भवति। सम्प्रतिद्वितीयार्थः 'कर्म' इति विचार्यते।

कर्मसंज्ञा विधायकं सूत्रं 'कर्त्तुरीप्सिततम् कर्म' इति वर्त्तते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। कर्त्तुः इति षष्ठ्यन्तं पदं, ईप्सिततमं इति प्रथमान्तम्, कर्म इत्यपि प्रथमान्तम्। कर्त्तुः इत्यत्र 'क्तस्य च वर्त्तमाने' इत्यनेन शास्त्रेण 'कर्त्तरि षष्ठी'। 'ईप्सिततमं' इत्यत्र 'अतिशयितं

इप्सिततमं' इत्यस्मिन् अर्थे तमब् प्रत्ययो वर्तते। अस्ति कश्चन विशिष्टः सिद्धान्तः तमब् प्रत्ययस्य या प्रकृतिः तत् प्रकारीभूतो योऽर्थः तदगतातिशयितत्वं तमपा द्योत्यते। अत्रेदं विचार्ययते यत् तमब् प्रत्ययस्य प्रकृतिः ईप्सित इति वर्त्तते। तत्र 'आण्ल् व्याण्तौ' धातुः इच्छार्थकः सन् प्रत्ययः सविषयकधातुत्वात् विषयतावचक क्त प्रत्ययो वर्त्तते। यतोहि सविषयक-धातुसमभिव्याहारे क्तप्रत्ययार्थो विषयत्ता इति। अतः एषु प्रकारीभूतेषु अर्थेषु कुत्र तमपा अतिशयितत्वं द्योत्यते इति अस्ति विचिकित्सा।

ननु 'सनर्थ इच्छायाम्' एव तमब्प्रत्ययस्य सम्बन्धः अतः इच्छागतातिशयित्वं तमपा द्योत्यते इति चेन्न। 'देवदत्तः कारागारं गच्छति' इत्यादीनां प्रयोगानाम् अनापत्तिः। 'अतिशय इच्छायाः कारागार गमनं प्रत्याथावात्। अतएव तमब्प्रत्ययस्य सम्बन्धः सम्बन्धार्थक 'आण्ल् व्याण्तौ' धातौ एव कर्त्तव्यः। तेन अतिशय सम्बन्धस्य लाभो भविष्यति। तथा च प्रकृतधात्वर्थ-प्रधानीभूतव्यापारजन्यफलात्रयत्वेन इच्छीयोद्देश्यं कर्मपदवाच्यं भवति। ननु कर्त्तुः इत्यत्र कर्त्तरि शब्दात् कर्तृवाचका 'षष्ठीविभक्तिः' वर्त्तते। उद्देश्यतावच्छेदकविधेयस्य ऐक्यात् 'घटोघटः' इत्यादिषु स्थलेषु शाब्दबोधः यथा नोत्पद्यते तथैव कर्त्तुः इत्यत्रापि शाब्दबोधानुपपत्तिः स्पष्ट एव। इति चेदुच्यते षष्ठ्यर्थ कर्त्तरि पदस्य आश्रयत्वात् प्रकृतिभूतकर्त्तरिपदस्य प्रकृतधातूपात प्रधानव्यापाराश्रयत्वात् उद्देश्यकोटौ अधिकावगाही ज्ञानत्वात् नीलो घटोघटः इत्यादिषु स्थलेषु शाब्दबोधवत् अत्रापि प्रकृतधातूपातप्रधानव्यापाराश्रयाभिन्नस्य वाचकत्वात् शाब्दबोधः सुलभ एव। प्रकृतिप्रत्ययार्थयोः अभेदान्वयस्वीकारात्। अतः प्रकृतधातूपातप्रधानीभूतव्यापाराश्रयाभिन्ना-श्रयनिरुपितफलतावच्छेदक सम्बन्धावच्छिन्न आधेयतावत् फलाश्रयो कर्मसंज्ञको भवति इति द्वितीयार्थः।

तच्च कर्मसप्तविधम्-

**निर्वर्त्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधा मतम्।**
**तच्चेप्सिततमं कर्म चतुर्ह्यन्यित्तु कल्पितम्।।** वा. पदीयम्

**औदासीन्येन यत् प्राप्यं यच्च कर्त्तुरनीप्सितम्।**
**संज्ञान्तरैनाख्यातं यद्यच्चाप्यन्यपूर्वकम्।।** वा. पदीयम्

आश्रयपदेन कर्त्तुरपि ग्रहणं भवति। तच्च कर्तृत्वम् - प्रकृतथातूपात्रव्यापाराश्रयः आश्रयपदेन सप्तम्यन्तस्यापि ग्रहणं भवति। तच्च सप्तम्यर्थः अधिकरणत्वरुपः।

**कर्त्तुकर्मव्यवदितामसाक्षाद्धारयत् क्रियाम्।**
**उपकुर्वत क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।।**

अवधिः पञ्चम्यर्थः। अर्थात् अपादानम्। अपादानविधायकं सूत्रम् - 'ध्रुवमपायेऽपादानम्'। 'ध्रुव स्थैर्ये' इत्यनेन धातोः 'इगुपथ ज्ञा श्री किरः कः' इत्यनेन 'क' प्रत्ययं सम्पाद्य ध्रुव इति पदं निष्पद्यते। ध्रुवं अर्थात् स्थिरम्। अपायो विश्लेषः। तस्मिन् अपाये अर्थात् विश्लेषे सति यत् ध्रुवं अर्थात् स्थिरं वर्त्तते तस्य अपादान संज्ञा भवति। ननु 'धावतः अश्वात् पतति' इत्यत्र अश्वस्य चलायमानत्वात् अध्रुवत्वात् कथम् अपादानसंज्ञा इति चेदुच्यते भर्तृहरिणा-

**अपाये यदुदासीनं चलं वा यदि वाचलम्।**
**ध्रुवमेवातदावेशात्तदापादानमुच्यते॥**

अर्थात् अत्रत्यं ध्रुवपदं पारिभाषिकं वर्त्तते। तच्चेत्थं प्रकृतधात्वर्थक्रियानाश्रयत्वे सति तज्जन्य विभागाश्रयत्वं ध्रुवत्त्वमिति। ननु परस्परात् 'मेषौ उपसरतः' इत्यत्र अपसरणक्रियायाः उभयत्र अर्थात् उभयोः मेषयोः आश्रितत्वात् क्रियाश्रयत्वात् कथम् अपादानदत्वं इति चेदुच्यते मेषान्तरक्रियापेक्षं प्रथममेषस्य अपादानसंज्ञा स्वक्रियाश्रयत्वात् कर्त्तरि संज्ञा च भविष्यति। तथैव द्वितीयमेषस्य मेषान्तरक्रियापेक्षत्वात् अपादानसंज्ञा तथा च स्वक्रियाश्रयत्वात् कर्तृसंज्ञा सेत्स्यति। अर्थात् मेषान्तरक्रियायाः अनाश्रयत्वे सति विभागजनकत्वात् अपादानत्वं सुलभमेव। अतएवोच्यते भर्तृहरिणा–

**मेषान्तरक्रियापेक्षम् अवधित्वं पृथक् पृथक्।**
**मेषयोः स्वक्रियापेक्षं कर्त्तृत्वञ्च पृथक् पृथक्॥**

तच्चापादानं त्रिविधम् – तथाहि निर्दिष्टिविषयकिञ्चित्, उपात्त विषयं तथा अपेक्षित–क्रियञ्चेति त्रिधा अपादानमुच्यते॥ इति

क्रमशः उदाहरणानि–

क. वृक्षात् पत्रं पतति।

ख. बलाहकाद् विद्योते।

ग. कुतः नद्यः।

करणत्वं नाम किम् तदर्थं सूत्रमुच्यते–

साधकतमं करणं–क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्।

उदाहरणं–रामेण बाणेन हतो वाली।

भर्त्तृहरिरप्याह–

**क्रियायाः परिनिष्पत्तिः यद्व्यापारानन्तरम्।**
**विवक्ष्यते यदा तत्र करणं तत्तदा स्मृतम्॥**

उद्देश्यः चतुर्थ्यर्थः–तच्च सूत्रम्। 'कर्मणा यमभिप्रैति स सम्प्रदानम्'। अत्र सम्प्रदानसंज्ञा वर्तते। सा च संज्ञा अन्वर्थसंज्ञा। सम्यक् प्रदीयते अस्मै तत्सम्प्रदानम्। ननु कर्मणा यम् अभिप्रैति इत्यस्मिन् वाक्ये विचिकित्सा जायते यत् कस्य धातोः कर्मणा अभिप्रैतार्थस्य कारकस्य सम्प्रदानसंज्ञा भवति इति चेदुच्यते प्रत्यासत्ति न्यायेन सम्प्रदनघटक दाधातुरैव गहाण। तेन सूत्रार्थो गम्यते दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञको भवति। ननु वृत्तिकारमते स्वस्वत्वनिवृत्ति– पूर्वकपरस्वतोत्पादनार्थकस्य दा धातोः योगे कर्मणा अभिप्रेतस्य सम्प्रदानसंज्ञकत्वात् ब्राह्मणाय गां ददाति इत्यत्र सम्प्रदानसंज्ञा निबधित्वेऽपि 'खण्डिकोपाध्यायः शिष्याय यपेटां ददाति' इति भाष्योदाहरणस्य अनुपपत्तिः स्पष्टैव, दा धातोः संयोगीकरणार्थकत्वात् स्वस्वत्वनिवृत्तिपूर्वकपरस्वतोत्पादनार्थकअभावाच्च कथं सम्प्रदानत्वं इति चेदुच्यते। यत्किञ्चिदर्थकस्य

दाधातोः योगे कर्मणा अभिप्रेतस्य सम्प्रदानसंज्ञा भवति। तेन भाष्यकारमते 'रजकाय वस्त्रं ददाति' इति प्रयोगोऽपि साधुः। तच्च सम्प्रदानं त्रिविधं–

**अनिराकरणात् कर्त्तुः त्यागाङ्गं कर्मणेप्सितम्।**
**प्रेरणानमुतिभ्यां च लभते सम्प्रदानताम्।। इति**

क्रमशः उदाहरणानि–

- सूर्याय अर्घं ददाति।
- विप्राय गां ददाति।
- उपाध्यायाय गां ददाति।

प्रवृत्तिनिवृत्त्यन्यतरानुकूलव्यापारानात्रयत्वम् अनिकाकरणकर्तृत्वरूपसम्प्रदानत्वम्।

**सन्दर्भग्रन्थाः**

1. वैयाकरणभूषणसारः
2. वाक्यपदीयम्
3. महाभाष्यम्
4. सिद्धान्तकौमुदी
5. दर्पणव्याख्याभूषणसारस्य (भूषणसारः)
6. वैयाकरणयतोन्मज्जनाटीका (भूषणसारः)

व्याकरणशोधच्छात्रः, श्रीरणवीरपरिसरः, जम्मूः

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# साहित्यशास्त्रे उपमालङ्कारः

–ऋषिकुमारः

को नाम अलङ्कारः इति विषये बहूनि मतानि अलङ्कारशास्त्रे विहितानि सन्ति। 'अलङ्कृतिरलङ्कारः'। अलंपूर्वकं 'कृ' इत्यनेन धातुना भावे घञ् प्रत्यये सति अलङ्कारशब्दो निष्पन्नमिति। 'सौन्दर्यमलङ्कारः'[1]–सौन्दर्यम् एव अलङ्कारमिति।

अलङ्कारो नाम आभूषणम्। यथा शारीरिकम् आभूषणं शरीरम् अलङ्करोति तथैव शब्दार्थौ काव्यमलङ्कुरुतः। अर्थात् यः काव्यमलङ्करोति सः अलङ्कारः। अलङ्कारः अलङ्कार्यस्य केवलम् उत्कर्षाधायकं तत्त्वं भवति, न तु जीवनाधायकम्।

अलङ्कारविषयकं मतानि यथा आचार्यैः कथितानि–

**काव्यशोभाकरान् धर्मानलङ्करान् प्रचक्षते।**[2]

काव्यस्य शोभाकराः सौन्दर्याधायका ये धर्मा विच्छित्तिविशेषास्त एवालङ्कारा इत्युच्यन्ते। तथैव ध्वन्यालोककृदानन्दवर्धनः–

**अङ्गाश्रितास्त्वलङ्कारा मन्तव्या कटकादिवत्।**[3]

तथैव काव्यप्रकाशकारोपि वदति–

**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।**[4]

अलङ्कार इव्ययं शब्दः 'अलङ्क्रियन्ते शब्दा अर्था वा एभिरिति करणव्युत्पत्या अनुप्रासोपमादीनाम्।'

अलङ्कारस्य भेदद्वयं कृतं आचार्यैः–शब्दालङ्काराः अर्थालङ्कारश्चेति शब्दमाश्रित्य ये अलङ्कारा भवन्ति ते शब्दालङ्काराः। अर्थात् यत्र कस्यचित् शब्दस्य परिवर्तनं कृत्वा तत्स्थाने तस्य शब्दस्य पर्यायवाचकशब्दस्थापनेन स अलङ्कारो न भवति तत्रेदम् अवगन्तव्यं यत् तत्र तेन शब्देनैव अलङ्कारस्य स्थितिः आसीत्। कस्यचित् शब्दविशेषस्य यत्र प्राधान्यं भवति, तत्र शब्दालङ्कारो भवति। इत्थं यः अलङ्कारः शब्दपरिवर्तनं न सहते। सः शब्दालङ्कार इति। मुख्यतः अनुप्रासयमकश्लेषश्चेति शब्दालङ्काराः सन्ति।

अर्थमाश्रित्य ये अलङ्काराः भवन्ति ते अर्थालङ्काराः अर्थात् श्लोके शब्दस्य परिवर्तनेनापि पूर्ववत् तस्य अलङ्कारस्य सत्ता तिष्ठति। एतादृशस्थले कश्च अलङ्कारः शब्दाश्रितो न भवति प्रत्युत अर्थाश्रितो भवति। इत्थं प्रकारेण य अलङ्कारः शब्दपरिवर्तनं सहते स अर्थालङ्कारः इति। तत्र स्वभावोक्तिरूपमादयाश्च अर्थालङ्काराः सन्ति।

अर्थालङ्कारकुञ्चेषु एव अस्ति उपमालङ्कारः। उपमालङ्कारे उपमान–उपमेय–साधारणधर्म उपमावाचक शब्दानां च प्रयोगः भवति।

उपमानम् अधिकगुणवत् भवति। येन पदार्थेन सादृश्यं प्रदर्श्यते स पदार्थः उपमानं भवति। यथा चन्द्रसदृशं मुखम् इत्यत्र चन्द्रेण मुखस्य समानता प्रदर्श्यते। अतोऽत्र चन्द्रपदार्थः उपमानमस्ति।

उपमातुं योग्यम् उपमेयमिति कथ्यते। यथा 'चन्द्रसदृशं मुखम्' इत्यत्र मुखे चन्द्रस्य साम्यं प्रदर्शितं वर्तते। अतः मुखम् उपमेयं वर्तते। उपमेये उपमानापेक्षया अल्पगुणो भवति। साधारणधर्मः सः भवति यः उपमानोपमेययोः द्वयोरपि आवश्यकत्वेन भवति। यथा चन्द्रसदृशं मुखं मनोहरं वर्तते। अत्र मनोहरत्वधर्मः उपमाने चन्द्रे उपमेये च मुखे उभयत्र समानरूपेण

वर्तते। अतः मनोहरत्वमत्र साधारणधर्मः। पुनश्च एकस्य अपरेण यत्साम्यं प्रदर्श्यते तद्वायकः शब्दा उपमावाचका इति कथ्यते। यथा "कमलमिव मुखम्" इत्यत्र "इव" शब्दः उपमावाचकः कथ्यते।

इत्थम् एतेषां चतुर्णाम् एकत्रैव उपस्थितौ पूर्णोपमा। एकस्य द्वयोः वा लोपेन लुप्तोपमा इति च कथ्यते।

**उपमालङ्कारस्य परिभाषाः-**

उपमालङ्कारस्य परिभाषाः प्रायः सर्वैः आचार्यैः प्रतिपादिताः। तेषां परिभाषाणां परस्परं न्यूनाधिकं वा भिन्नतां सन्ति। तत्र सादृश्य-साम्य-साधर्म्यादिनां शब्दानां प्रयोगः आचार्यैः कृता, तत्रापि एकस्य कस्यचित् शब्दस्य सन्निवेशः परिभाषायां स्थापितं। अत्र केचन परिभाषाः निम्नाः सन्ति-

**विरुद्धेनोपमानेन देशकालक्रियादिभिः।**
**उपमेयस्य यत्साम्यं गुणलेशेन सोपमा॥**[5]

**उपमानोपमेयस्य गुणलेशेतः साम्यमुपमा॥**[6]

**उपमा नाम सा तस्याः प्रपञ्चोऽयं प्रदर्श्यते॥**[7]

**यच्चेतोहारि साधर्म्यमुपमानोपमेययोः।**
**मिथोविभिन्नकालादिशब्दयोरुपमा तु तत्॥**[8]

**उपमानोपमेययोः साधर्म्ये भेदाभेदतुल्यत्वे उपमा॥**[9]

**साधर्म्यमुपमा भेदे॥**[10]

**साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः॥**[11]

**तत्रैकवाक्यवाच्यं सादृश्यं भिन्नयोरुपमा॥**[12]

**यच्चेतोहारि साधर्म्यमुपमानोपमेययोः।**
**मिथोविभिन्नकालादि शब्दयोरुपमा तु तत्॥**[13]

**चमत्कारि साम्यमुपमा॥**[14]

**हृद्यं साधर्म्यमुपमा॥**[15]

**सादृश्यं सुन्दरं वाक्यार्थोपस्कारकमुपमालंकृतिः॥**[16]

**उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।**
**हंसीव कृष्ण। ते कीर्तिः स्वर्गङ्गामवगाहते॥**[17]

**उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।**
**हृदये खेलतोरुच्चैस्तन्वङ्गीस्तनयोरिव॥**[18]

**उपमाप्रपञ्चः-**

सर्वेषां अलङ्काराणां उपजीव्यभूतायाः उपमायाः निरुपणं क्रियते। कारणं यत् "प्रधाने कृतो यत्नः फलवान् भवति।[7] इति नयेन प्रायः सर्वेऽर्थालङ्काराः उपमाप्रपञ्चत्वेन ज्ञायन्ते। साहित्यदर्पणकारेण दशमे परिच्छेदे अर्थालङ्कार प्रकरणे उपमा विषये उक्तं-

> **सादृश्यमूलेषु अर्थालकारेषु लक्षितव्येषु तेषामप्युपजीव्यत्वेन प्राधान्यात् प्रथममुपमामाह-साम्यं इत्यादि.........**[19]

अत्र उपमालङ्कारः सादृश्यमूलकार्थालङ्काणां मूलत्वेन स्वीकृतं विश्वनाथेन।

कस्यचिद् कवेः उपमाविषयकं विचारः-

> **अलङ्कारशिरोरत्नं सर्वस्वं काव्यसंपदाम्।**
> **उपमा कविवंशस्य मातेवेति, मतिर्मम।।**

अर्थात् उपमा वस्तुतः काव्यस्य जननी वर्तते। उपमालङ्काराश्रितः कविवंशः, उपमालङ्कारः काव्यस्य सर्वस्वं वर्तते। उपमालङ्कारः अर्थालङ्काराणां चूडामणिः इति।

अत्र उपमाविषयकं परिचर्चा रसगंगाधरकृत्पण्डितराजजन्नाथमहाभागानां मतानुगुणं प्रस्तूयते।

पण्डितराजेन उपमालङ्कारप्रकरणे उदाहरणं प्रदत्तम्-

> **त्वयि कोपो ममाभाति सुधांशाविव पावकः।**

अत्र नायकः क्रुद्धनायिकां प्रति वदति यत् तव क्रोधः चन्द्रवर्तीः अग्निरिव प्रतियते। ध्यातव्यमत्र यत् चन्द्रमध्ये अग्निः असम्भवः अत्र नायिकायां विद्यमानान्तस्थक्रोधस्य चन्द्रे विद्यमानासम्भवाग्निना सह उपमा न भवितुं शक्यते। यस्य वस्तुनः सत्ता एव नास्ति तेन सह सादृश्यं कथं भविष्यति? तदा तत्र चमत्कारत्वं कथं जायते? अत्र पण्डितराजः स्वयं समाधयति खण्डशः अत्र चन्द्रमसः एवञ्च अग्नेः उपस्थितिः भवितुं शक्यते। यतोहि उभौ पदार्थौ स्व स्व पृथक् सत्तां भजतः। अतः खण्डशः उपस्थितौ सत्यौ कवि स्वसामर्थ्यानुगणं स्वकल्पनानुगुणञ्च सम्भावित रुपेण चन्द्रवर्त्यग्नेः सम्मिलित पदार्थ रुपेण निर्माणं करोति। तदा तस्य सादृश्यस्यापि कल्पनां विधातुं कविः स्वतन्त्रः। इतोऽपि यदि कोऽपि वदेत् यत्र कल्पित सादृश्यं तु असत्य-मिति। तदा चमत्कारत्वं कुत्र? तत्र आनन्दस्यापि प्राप्तिः बाधिता। अस्यापि शंकायाः समाधान-मस्ति यत् आनन्दः सत्यवस्तुना एव भवति, एवं नास्ति, कोऽपि नियमः नास्ति यत् सत्यवस्तुना एवानन्दः। यतोहि कोऽपि भावुकः भावनया कस्यापि कनकनिर्मिताङ्ग्याः परमसुकुमार्यायाः कल्पनां कृत्वा, यस्याङ्गानि कनकनिर्मिता वर्तते तथा यया मणिमयदन्तकिरणानां द्वारा अन्धकारं नष्टं जायते। तस्यालिङ्गनं कृत्वा आनन्दं प्राप्नुवन्ति। अत्र ते यस्यानन्दस्यानुभूतिः जायते ततानन्दं मिथ्या अस्ति। अर्थात् मिथ्यालिङ्गनं अपि आनन्ददायकः प्रतीयते। यदा लक्षणस्य चर्चां कुर्मः तदा तत्र उपमानोपमेयस्य सत्यतायाः विषये निवेषः नास्ति। अतः उपमानस्य कल्पनायां अपि उपमा स्वीकर्तुं शक्या।

पण्डितराजः अग्रे उदाहरति-

कल्पितोपमानोपमेयभावविशिष्टं स्थलान्तरमपि दर्शयति-

**स्तनाभोगे पतन्भाति कपोलात्कुटिलोऽलकः।**
**शशाङ्कबिम्बतो मेरौ लम्बमाना इवोरगः॥**

अत्रापि "त्वयि कोप......इत्यादि स्थले यस्याः युक्तिनां समाधानं कृतं वर्तते ते एव युक्तयः अत्रापि समाना। अत्रापि चन्द्रमण्डलस्थलात् मेरुपर्वतोऽपरि सर्पस्य लम्बमानत्वं असम्भवः तथा कल्पितोपमाने सति असत्यमस्ति। स्तनभागे कपोलत् लम्बमानानां कुटिलकेशस्य लम्बमानसर्पेण सह उपमा तु कल्पिते सति अपि चमत्कारत्वं जनयति। अतः अत्र उपमालङ्कारः अस्तित्येव नास्ति संशयः।

अनेनोपरोक्त समस्तविवेचनेन ज्ञायते यत् अलङ्कारेषु उपमालङ्कारः सर्वेषां अर्थालङ्काराणां आधारः अस्ति। उपमालङ्कारः चमत्कारजनकः आनन्ददायकश्च अस्ति तथा उपमालङ्कारः कविनां काव्यस्पधारभूतः तत्वमस्तिति।

**सन्दर्भः-**

1. वामनः, काव्यालङ्कारसूत्रवृत्ति 1-1-2
2. दण्डी, काव्यादर्श
3. आनन्दवर्धनः ध्वन्यालोक 2/29
4. मम्मटः, काव्यप्रकाश 8/67
5. भामह-काव्यालङ्कारः 2/30
6. वामनः-काव्यालङ्कारसूत्र 4/2/1
7. दण्डी-काव्यादर्शः 2/14
8. उद्भट्ट-काव्यालंकारसारसंग्रह 1/15
9. रुय्यकः-अलङ्कारसर्वस्वम् 15
10. मम्मटः-काव्यप्रकाश सू. 125
11. विश्वनाथः-साहित्यदर्पणः 20/14
12. विश्वेश्वर-अलंकार कौस्तुभ पृ.4
13. उद्भट्ट-काव्यालंकारसारसंग्रह 1/15
14. वाग्भट्ट-काव्यानुशासन पृ.33
15. हेमचन्द्र-काव्यानुशासन 6/1
16. पं. राजजगन्नाथ-रसगंगाधर पृ. 204

17. अप्पय दीक्षित-कुवलयानन्दः पृ.02
18. जयदेव-चन्द्रालोकः 5/7
19. पतञ्जलि-महाभाष्य पस्पशाह्निक
20. विश्वनाथ, साहित्यदर्पणः 10/14

साहित्यशोधच्छात्रः, श्रीरणवीरपरिसरः, जम्मूः

✦✦✦

**Shri Vaishnavi 2017** **ISSN : 7552277-906X**

# आधुनिकसंस्कृतसाहित्यस्य परिचयः

**–शशि शर्मा**

आधुनिकतायाः पर्याय आङ्ग्लभाषायो माडर्निटी (Modernity) इति शब्दो ललित-भाषाया अधुनार्थे मोदाशब्दात् (mode just now) व्युत्पन्नः (moda modomuo-modoern-modernity)। कैसियोदोरूसमहोदयः (cassiodorus) माडर्न इति शब्दः समसामयिकालस्य अर्थे स्वीकरोति। वस्तुतस्तु, सुष्ठु सम्यक् रूपेण त्रिधा विभागः कृतः अर्वाचीनसंस्कृत वाङ्मयस्य-

| | | | |
|---|---|---|---|
| (i) | पुनर्जागरणकालः (Renaissance Period) | 1784-1884 |
| (ii) | स्थापनाकालः (Removation Period) | 1885-1947 |
| (iii) | समृद्धिकालः (Golden Period) | 1948-अधुनापर्यन्तम् |

स्वातन्त्र्योत्तरकाल एवार्वाचीनसंस्कृतवाङ्मयस्य स्वर्णयुगम्। यतो हि अस्मिन्नेव काले संस्कृतरचना धर्मिता स्वकीयविविधतया पुष्कलतया बहुलतया सञ्जाताभूतपूर्वा। एकोनविंशति-शताब्द्याः आरभ्य अद्यावधिपर्यन्तं प्रायशः द्विशतवर्षाणां कालः संस्कृतसाहित्यस्य आधुनिकः कालः। कालखण्डेऽस्मिन् संस्कृतस्य सर्जनात्मकं साहित्यं महाकाव्य-लघुकाव्य-गीतिकाव्य, नाटक-उपन्यास-कथा साहित्य-लघुकथा एकांकी-रूपकानादिरूपेण विभिन्नासु धारासु प्रस्फुटितं पल्लवितं च। एतद साहित्यं विधानां विविधतया नवीनतया च परिपूर्णम् अस्ति। एषा विविधता नवीनता च अनेकेषु रूपेषु अस्ति। यथा-लघुकथा, एकांकी, रेडियोनाटकम्, आधुनिकः उपन्यासः, पत्रकारिता च। शैलीगत प्रवृत्तिभिः शिल्पगत प्रवृत्तिभिः च सहैव विषयवस्तुनि अपि नवीनता विद्यते। साम्प्रतं न केवलं पौराणिकस्य ऐतिहासिकस्य च कथावस्तुनः आधारेण

आधुनिकसंस्कृतरचनाः विरच्यन्ते अपि राजनैतिकं सामाजिकं चापि विषयम् अवलम्ब्य साहित्यसर्जना अनवरतरूपेण क्रियते।

आधुनिकसंस्कृतसाहित्यस्य परिमाणम् अतीव विशालम् अस्ति। एकतः अत्र यदि विधानां वैविध्यं दृश्यते तर्हि अपरतः साहित्यसर्जनायाः वैपुल्यं प्राप्यते। आधुनिककालस्य संस्कृतसाहित्यसर्जनायां पद्यसाहित्यवत् गद्यसाहित्यम् अपि बहु समृद्धम् अस्ति। गद्यसाहित्ये अपि कथा साहित्यं नूतनं नूतनं रूपं धृत्वा संस्कृतसाहित्यस्य श्रीवृद्धिं करोति। संस्कृतपत्रिकाभ्यः मूलतः आविर्भूतं कथासाहित्यं शनैः शनैः स्वतन्त्रकृतिरूपेण आगतम्। दीर्घकथानाम् अनन्तरं लघुकथानां प्रचलनम् आरब्धम्। पुनश्च लघुकथा, टुप्कथा पटुकथा, स्पशकथा, व्यङ्ग्यकथा, हास्यकथा प्रभृतिषु नूतनेषु कथासाहित्यं समाहतं जातम्। यथार्थस्य अभिव्यक्तिः सरलता सहजता च, ओजसः, अभिव्यक्तिः कथ्यशिल्पयोः नवीनता, छन्दोलङ्काराबाध्यता, भावाभिव्यञ्जन-शैल्याः नवीनताः, आधुनिकः भवबोधः प्रभृतय आधुनिकसंस्कृतसाहित्यस्य प्रमुखाः विशेषताः।

आधुनिककाले नवीनशैल्यां प्रवृत्तायां गद्यविधायां सहजतां, सरलताम्, अकृत्रिमतां च प्रश्रयं दीयते। भाषायां सन्धीनाम् अलङ्काराणां च प्रयोगः अल्पादपि अल्पतरं भवति। संस्कृतभाषां जनभाषाकरणार्थम् अयं प्रयासः सर्वथा सार्थकः सिद्धयति। अद्यतनं कथासाहित्यम् अनुदिनं विकासोन्मुखम् अस्ति संस्कृतकथासाहित्यस्य सहजं शिल्पविधानं संस्कृतसाहित्यम् अन्यासां भारतीयभाषाणां कथासाहित्यस्य समकक्षम् आनयति। एतद् कार्यं यैः संस्कृतकथाकारैः साम्प्रतं क्रियते तेषु एते कथाकाराः विशेषेण उल्लेखनीयाः प्रंशसनीयाः वन्दनीयाश्च-प्रो. राधावल्लभ त्रिपाठी, प्रो. अभिराजराजेन्द्रमिश्रः, देवर्षिकलानाथशास्त्री, डॉ. बनमाली विश्वालः, डॉ. प्रशस्यमित्र शास्त्री, प्रो. प्रभुनाथ द्विवेदी, केशवचन्द्रदाशः, प्रमोदभारतीयः, रवीन्द्र कुमारपाण्डा, नारायणदाशः प्रमोदकुमार नायकः अरूणरञ्जनमिश्र च। कथा माध्यमेन सामान्याः जनाः अपि संस्कृतेन युज्यन्ते। अतएव कथाविधायाः विकासः संस्कृते अनवरतरूपेण प्रचलति। पूर्वं तु कथासाहित्यं संस्कृत पत्रिकासु दृश्यते स्म किन्तु साम्प्रतम् अस्य कथासाहित्यस्य लोकप्रियता वर्द्धिता जाता। परिणामतः कथासाहित्यं स्वतंत्रकृतिरूपेण प्रकाशितं जातम्। कथा दीर्घाः भवन्ति स्म। किन्तु एतासां कथानां शिल्पविधानम् अतीव सहजं सरलं च भवति स्म येन पाठकः सारल्येन कथानां रसास्वादनं कर्त्तुं समर्थः भवति स्म। शनैः शनैः कथानाम् आकारः लघुः जातः। एतादृश्यः कथाः लघुकथानाम्ना प्रसिद्धिं प्राप्ताः।

जीवनस्य यथार्थभावाभिव्यक्तिं कर्त्तुम् अद्य लघुकथायाः आश्रयः गृह्यते। यर्थार्थभावा-भिव्यक्त्यर्थं लघुकथा एका समर्था विधा विद्यते। इदमेव कारणं यत् अस्मिन् आधुनिके वैज्ञानिकयुगे संस्कृतस्म एषा विधा अतीव लोकप्रिया अभवत्। अस्याः लोकप्रियता अनुदिनं वर्द्धते चापि। लघुकथासु सामान्यजनजीवनस्य दैनन्दिनघटनाः, समस्याश्च एवंप्रकारेण वर्णिताः यत् पाठकः पठनसमकाले एव आत्मानं चित्रितः प्राज्यते। साम्प्रतं राजनैतिकषड्यन्त्र-भ्रष्टाचार-अत्याचार-दुराचार-दुर्नीति-असंतुलित-पारिवारिक-सम्पर्क-दैनन्दिन-जीवनविसंगति-प्रभृति विषयान् अवलम्बय अन्यासु भारतीयभाषासु साहित्यस्य सर्जनं प्राचुर्येण भवति। संस्कृतसाहित्यमपि

अस्य अपवाद: नास्ति। संस्कृतसाहित्येऽपि कथाकारा: एतानि विषयाणि स्वीकृत्य सहजया सरलया जीवन्तभाषया स्वाभाविक शैल्या च कथासाहित्यस्य सर्जनम् अनवरतरूपेण कुर्वन्ति। बनमाली विश्वालस्य लघुकथा। 'वासुदेवस्य जन्मदिनम्', कलानाथ शास्त्रिण: 'दिग्भ्रान्ति:', राजेन्द्रमिश्रस्य 'चञ्चा', प्रभुनाथद्विवेदिन: 'मतदानम्', प्रशस्यमित्रशास्त्रिण: 'ईश्वरीयो दण्ड:', बनमाली विश्वालस्य 'विश्वासधोतोऽपि सुखाय', प्रभुनाथद्विवेदिन: 'वैद्यराज:', बनमाली विश्वालस्य 'प्रतिशोध:', रवीन्द्रकुमारपाण्डाया: 'धूलि धूम रेणुगृहम् च, केशवचन्द्रदाशस्य 'असंसारी', भिन्न: संकेत:, 'तिर्यग् दिगन्त:' च प्रभुनाथद्विवेदिन: 'गंगास्नानम्', कलानाथ-शास्त्रिण: 'शून्या आसन्दी', राजेन्द्रमिश्रस्य 'इक्षुगन्धा', 'शतपर्विका' 'पोतविहगौ', प्रभृतय: लघुकथा: सन्दर्भेऽस्मिन् विशेषरूपेण उल्लेखनीया:। आधुनिकसंस्कृतकथाकारा: न केवलं लघुकथां लिखन्ति अपितु ते टुप्कथां, पटुकथां, स्पशकथां, व्यङ्ग्यकथां, हास्यकथां, विनोदकथां चापि तया एव गत्वा लिखन्ति।

साहित्यशोधच्छात्र:, श्रीरणवीरपरिसर:, जम्मू:

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# श्रीराधाचरितमहाकाव्ये श्रीराधाकृष्णयो: रहस्यालाप:

**–श्यामलाल:**

श्री वृन्दावनधाम्नि ब्रजवलये स्थानान्तरेषु च सच्चिदानन्दस्य परब्रह्मणो जगदुत्पत्तिस्थिति-प्रलयकारणस्य अपि कारणस्य श्रीकृष्णस्य कयाचिद् अनिर्वचनीयया शक्त्या चराचरात्मकस्य जगत: सञ्चालनं सम्पद्यत इति मन्यन्ते। इयं च जगदादिभूतस्य भगवत: श्रीकृष्णस्य आह्लादिनी परा महती शक्ति: अथवा आद्या प्रकृति: भगवतो भिन्ना नास्ति। लोके लीलाकैवल्यम् इति सिद्धान्तात् तां तां लीलां विधातुं तत्तत्स्वरुपं कलयति।

वस्तुत: एकैव सा शक्ति: तत्तद् उद्देश्येन तां ताम् आकृतिं परिदधाति। जगत्परिपातुकामा विष्णुवामपादा लक्ष्मीरुपा, मर्यादां द्रढयितुं कामा श्रीरामवामभागा सीतारुपा, रसस्वरुपा राधा रुपा, तप: प्रभावं प्रदर्शयितुकामा पार्वतीरुपा भवति। श्रीराधैव श्री कृष्ण:, श्री कृष्ण एव श्री राधा। तयोर्द्वयो: कश्चनापि भेदो नास्ति। श्री कृष्णस्य नित्यस्य नवीनस्य माधुर्यस्य प्रादुर्भाव: श्री राधैव।

साधारणजनानां तु वार्ता दूरे तिष्ठन्तु, विदुषाम् अपि इदं रहस्यमद्यापि वर्तते यत् परम-पुरुषार्थे मोक्षेऽपि अपि निरभिलाषा श्रीराधा केवलं श्रीकृष्णस्य प्रेमाणमेवाभिलषति। सर्वं कर्तुमकर्तुमन्यथाकर्तु समर्थे भगवति परमेश्वरे भक्तिर्भवेत् परं तस्याः फलं नाभिलष्येत्। कीदृशीयं भक्तिः, कश्चास्याः भक्तेः प्रकारः, कीदृशश्च त्यागः, सर्वमेतत् रहस्यमेव वर्तते।

इदं तु परं रहस्यं यत् भक्तौ तस्यां परमाराध्यानां गोपीनां सर्वविधस्य शृंगारस्य प्रतीति-र्भवति। परन्तु शृंगारेण तेन गोपीनां स्वः कश्चन् स्वार्थो नास्ति। केवलं सच्चिानन्दस्य सुख-समीहायामेव तासां प्रत्येकं श्वासप्रश्वासयोः उपयोगः। मूल्यशिक्षायां प्रेमतत्त्वः चरमोत्कर्षं प्राप्तमीति सर्वैः मन्यते। काव्येऽस्मिन् कविना राधातत्त्व, प्रेमतत्त्व, श्रीराधाकृष्णयोः रहस्यालापः वर्णितमस्ति।

तपःस्वध्यायनिरतैः महर्षिभिः अनेकानि शास्त्राणि प्रणीतानि। तेषु वर्णितास्तेजस्विनाः इष्टफलप्रदाः बहवो देवाः स्वरुपतः, शक्तितः, कर्मतः च विस्तरेण निरुपितः। श्रीराधायाः श्रीमाधवविषयानुरागे कुत्रापि लौकिकवासनायाः गन्धमात्रम् अपि नास्ति। स च अनुरागः 'स्पटिकमणिरिवामलो' भागीरथीप्रवाहः इव सततं प्रवहन् क्वचनापि कदापि विच्छिन्नः कामवासना शून्योऽहमताममतालेशरहितः अस्ति।

अस्यां प्रेमसाधनायां लौकिकचक्षुषा दृश्यमानायां शृंगाररसाभासः प्रतीयेत। कदाचित् तु प्रतीयते यत् अत्र लौकिक भोगकामसुखादिकमस्ति। परन्तु अलौकिके परमप्रेमास्पदे सच्चिनन्दे परब्रह्मणि लौकिकतायाः प्रवेशः एव दुष्प्रवेशः। एतद् वस्तु यथायथं समवगन्तुं पूर्वं परा भक्तिः श्रीराधामाधवर्योऽजनीया तत् प्राप्त्यनन्तरं तयोरगम्यं स्वरुपं ज्ञातं भवेत्। ततश्च तयोर्लीलाऽवगता भविष्यति। एतदर्थं निखिलमपि लौकिकं वस्तु परिहेयम्, 'सर्वधर्मान् परित्यज्य मामेकं शरणं ब्रज' इति तत्प्रतिज्ञा वाक्यं सततं ध्येयम्। यावत् राधामाधवयोः रहस्यं ज्ञातं न भवेत् तावत् सर्वापि तयोर्लीला ग्राम्यकथेव प्रतिभाति। यतोहि प्रथमन्तु गोपीरहस्यमेव दुर्बोधम्, राधाकृष्णयोः रहस्यस्य तु कथैव का? तेषां प्रासादाच्च जनैः स्वाभीष्टं फलं प्राप्यन्ते। यथा-विद्याकामैर्जनैः शिव उपास्यते 'विद्याकामः शिवं जपेत्' शक्तिकामैश्च देवी, दाम्पत्त्यप्रेमकामैः पार्वती। ब्रह्मतेजकामैर्भगवान् भास्करः। कार्यसिद्धिर्गणपतिः एवमेव तत्तदुद्देश्येन ते ते देवाः समुपास्यन्ते।[1] अतः साधिते प्रेमतत्त्वे ताः निखिलाः अपि विभूतयः साधकस्य परो नतमस्तकाः दासाः इव विष्ठन्ति प्रेमतत्त्वमेव सर्वान् प्राणिनो वशीकर्तुं शक्नोति। प्रेम्णः सामर्थ्येन सर्वापि शक्तिः, सर्वमपि सामर्थ्यं, सर्वाश्च विभूतयः हस्तामलकवद्भवति।

**सन्दर्भः**

1. श्रीमद्भागवत् शक.2, अध्याय 3

शोधच्छात्रः, साहित्यविभागः

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# वाक्यपदीयब्रह्मकाण्डे शब्दब्रह्मप्रतिपादनम्

–नीरजशर्मा

पाणिने: प्राक्तनस्य व्याकरणस्य स्वरूपमभूद् किदृशं इत्यस्माभि: साकल्येन साम्प्रतम् न ज्ञातुम् शक्यते। सूत्राणि कतिचित् पाणिनीयेषु सूत्रेषु पद्यात्मकान्यपि सन्तीति तस्मात् प्राक्तनस्य कस्यचिद् व्याकरणस्य पद्यात्मकत्वमवगम्यते। पाणिनिसमकालिकस्य व्याडिकृतस्य लक्षश्लोकात्मकस्य संग्रहाख्यस्य ग्रन्थस्य तत: प्राग्भवस्य वाजप्यायनस्य च समुल्लेख: कृतो महाभाष्यकृता भगवता पतञ्जलिना। पतञ्जलिकाले तादृशा बहवो गद्यात्मका: पद्यात्मकाश्च व्याकरणग्रन्था जीवन्ति स्म इति ध्रुवं शक्यते वक्तुम्। संग्रहशब्दोऽपि तथार्थमभिव्यनक्ति। तेभ्य: सर्वेभ्य: परम्परागतेभ्य: व्याकरणग्रन्थेभ्य: महाभाष्ये समाहृत: सार:। वाक्यपदीयकारस्य भर्तृहरे-र्गुरुणा वसुरातेन (द्र. पुण्यराजटीका) न्यायप्रस्थानमार्गान् स्वं च दर्शनमभ्यस्य व्याकरणागमसंग्रह: पुन: संपादित:।

भर्तृहरिणा तस्य प्रकृतिरूपमिदं वाक्यपदीयं व्याकरणागमदर्शनरूपं निबद्धं व्याकरणानां महते कल्याणाय सिद्धम्। परम्परया भक्तितत्त्वस्यास्य वाक्यपदीयस्य गभीरत्वाद् भर्तृहरिणा स्वोपज्ञटीकयेदं परिमण्डितं द्वितीयकाण्डं यावदेव। स्वोपज्ञटीकापरिमण्डितस्यैव ग्रन्थस्य वाक्य-पदीयेत्यभिधानात् तृतीयं काण्डं भर्तृहरिकृतं नेति व्याहारो नास्ति सत्तर्कपदविक्षुण्ण:।

न शोभते कदाचिद् पस्पशारहिता शब्दविद्या इति तु विद्यावन्त: विदन्त्येव। व्याकरण-महाभाष्ये प्रथममाह्निकं पस्पशाह्निकत्वेन समाख्यातम्। तत्र व्याकरणस्य दार्शनिकं रूपं स्फुट-मभिव्यक्तम्। आगमकाण्डेत्याख्यातं वाक्यपदीयस्य ब्रह्मकाण्डेत्यपरपर्यायं प्रथमं काण्डं प्राधान्यतो महाभाष्यस्य पस्पशाह्निकमेवाधारीकरोतीति तत्रापि तत्काण्डस्य पस्पशरुपता, व्याकरणदर्शनीय-मुख्यप्रतिपाद्यशब्दब्रह्मतयोपोद्घातेरुपता वा निश्चेतव्या। इत्थं तावत् काण्डतत्रयात्मकस्य वाक्य-पदीयस्य प्रथमं काण्डं सम्पूर्णस्य ग्रन्थस्य भूमिकारूपम्। तच्च ग्रन्थनाम्नापि सिद्धति। वाक्यं च पदं चेति वाक्यपदम् इति द्वन्द्वसमास:, वाक्यपदमधिकृत्य कृतो ग्रन्थो वाक्यपदीयमित्ययं शब्द: 'शिशुकन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छ:' (पा. 4.3.88) इत्यनेन पाणिनीयेन सूत्रेण छे कृते निष्पद्यते। इह वाक्यपदीयस्य अभिव्यज्यते काण्डद्वयात्मकता। द्वितीय काण्डं वाक्यप्रतिपादकं, तृतीयञ्च पदप्रतिपादकम्। प्रसिद्धिर्वर्तते प्रकीर्णकाण्डत्वेन तृतीयस्य काण्डस्य, तथापि तस्य विषयप्रतिपादनदृशा पदकाण्डत्वमक्षतमेव। सिद्धति अनौचित्यमपि ग्रन्थनामानुसारेण वाक्यकाण्डात् पूर्वं पदकाण्डीयसत्ताया। ब्रह्मकाण्डरुपागमकाण्डस्य पदकाण्डतया स्वीकरणे न केऽपि मतिमादधेत बुधा:।

तत्र तवाद् महाभाष्यीयपस्पशाह्निकोक्त: स्फोटसिद्धान्तो वाक्यपदीयब्रह्मकाण्डे विस्तरेण

व्यवस्थापितः। व्याकरणफलाफलविचारणारूपपस्पशाह्निकभाष्यव्याख्यानसंयुतं वाक्यपदीयमिति संश्रृणुते कोषकल्पतरूकारो धीवर्गे (101 तमे श्लोके)। मन्ये न्यायप्रस्थानमार्गविराजितः स्वदर्शनोबृंहितश्च भर्तृहरिगुरुप्रणीत आगमसंग्रहो वाक्यपदीयस्य द्वितीय उपजीव्योऽभूत्। वस्तुतस्तु ब्रह्मकाण्डेऽविकला व्याकरणपरम्परा समाहृता। सरलया भावप्रवणया च सरण्याऽऽनुष्टुभैश्छन्दो-भिर्निबध्य वाक्यपदीयम्, संग्रहग्रन्थप्रतिकृतिरिवोपस्थापितं वैयाकरणानां पुरस्तान्महावैयाकरणेन भर्तृहरिणा।

महाभाष्यकारेण 'चत्वारि श्रृङ्गा त्रयो अस्या पादा.........त्रिधा बद्धो वृषभो रोरवीति' इति ऋग्वेदीयं मन्त्रं व्याकरणदृशा व्याख्यातवता महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणमिति निरूपितम्। ब्रह्मकाण्डीये 'प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते' (130) इति श्लोके तु 'देवन' इत्यस्य स्थाने 'येन' 'साम्यम्' इत्यस्य च स्थाने 'सायुज्यम्' इति प्रायुङ्क्त भर्तृहरिर्मन्त्रगतवृषभशब्दमृषभत्वेनोपाददानः। सायुज्यं तावत् सार्ष्टिसालोक्यसारूप्यादिषु मोक्षेष्वन्यतमो विशिष्टरूपो मोक्षः, यत्र ब्रह्मैक्यं प्रपद्यते भक्तः। इत एव शब्दब्रह्मता निर्धारिता महायोगिना ब्रह्मकाण्डे।

उपनिषन्महाभारतादिषु वर्णितं शब्दस्वरूपं पास्थाय तस्य समग्रं रूपं समुदीरितम्। उपनिषदि (मैत्र्यु. 6.22) शब्दब्रह्मस्वरूपमित्थं लभ्यते।

**द्वे ब्रह्मणी वेदितव्ये, शब्दब्रह्म परं च यत्।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥**

अयमेव श्लोको महाभारतस्य शान्तिपर्वणि (232, 30) पठित एवमेव। भगवद्गीतायाम् जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते (6.44) इति शब्दब्रह्माख्यानम्। महाभारते (शान्ति. 232, 24) अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा इति वाचोऽनादिनिधनताऽभिहिता। वाक्यपदीये भर्तृहरि प्रतिभाचमत्कारप्रसूतेयमर्द्धालिर्विलोकनीया-

**अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम्।**

अन्तिमं चरणद्वयं तु-

**वेदशब्देभ्यः एवादौ निर्मिमीते स ईश्वरः।**
**नामधेयानि चर्षीणां याश्च वेदेषु सृष्टयः॥**

किञ्च महाभारतीयम्-

**सर्वेषां स च नामानि कर्माणि च पृथक् पृथक्।**
**वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे॥**

वाक्यपदीयकारेण चतसृणां वाचां मध्ये श्रय्या वाचो व्याकरणविषयतामाकलप्य तद्विवृत्ते-र्महिम्नश्च समुदीरिणार्थं समासादितोऽवकाशः इह ग्रन्थे प्राप्तरूपविभागत्वं वाचः (1, 12) प्रत्यस्तमितभेदत्वं तस्याः (1, 18), सूक्ष्मबागात्मनाऽऽन्तरस्य ज्ञातुरवस्थितिः (1, 112) इत्यादि निरूपितम्। वाचो महत्त्वं चेत्थमुपवर्णितम् स्वोपज्ञटीकायाम्-

**वाग्रूपता चेन्निष्क्रामेदवबोधस्य शाश्वती।**
**न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी॥**

**सा सर्वविद्याशिल्पानां कलानां चोपबन्धनो।**
**तद्वशादभिनिष्पन्नं सर्वं वस्तु विभज्यते॥**

**अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः।**
**तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत्॥**

शब्दरूपो वेदः खलु शब्दब्रह्मणोऽनुकृतिः समाख्याता भर्तृहरिणा (15) महाभाष्यकृता तु रक्षार्थं वेदानामध्येयं व्याकरणमित्येवोक्तम्। स एव वेद एकोऽप्यनेकवर्त्मेव महर्षिभिः पृथक् पृथक् समाम्नातः। यथाऽद्वैतवेदान्ते विक्षेपावृतिरूपेति मायायाः शक्तिद्वयाधारेण तमःप्रधानकिक्षेप-शक्तिमदज्ञानोपहितचैतन्यादाकाशादिसृष्टिर्भवति तद्वदिहापि शक्तिव्यपाक्षयादेकमपि शब्दब्रह्म भिन्नमानतं भवति, अपृथक्त्वेऽपि शब्दब्रह्म शक्तिभ्यः पृथक्तेनेव वर्तते। एवं तावदिह–'एकस्य सर्वबीजस्य (4) तस्य शाखासु दृश्यते (6) तमेवाश्रित्य (7), तस्यार्थकादरूपाणि (8), सत्याविशुद्धितत्रोक्ता (9) विद्यैवैकपदागमा (10) इत्यादिषु कारिकाषु सुस्पष्टाः।

किञ्च कोऽयं शब्दः इत्यनुप्रयोगे 'प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तस्मात् ध्वनिः शब्दः' इति भगवान् पतञ्जलिराह पस्पशाह्निके। तपरस्तत्कालस्य (1, 1, 70) इत्यत्र 'सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते' इति कात्यायनीये वार्त्तिके तु स उवाद–'एवं नहि स्फोटः शब्दः' स्फोटस्तावानेव भवति, ध्वनिकृता वृद्धिः' इति।

तत्रैव कारिका भवति–

**ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।**
**अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावः॥**

भर्तृहरिणा महाभाष्योक्तिं सम्यग् विवृत्य व्याख्यातवता मध्यमानादभि व्यङ्ग्यस्य शब्दस्य स्फोटात्मकता ब्रह्मरूपता नित्यता, ध्वन्यात्मकस्य च तस्या नित्यता महता कौशलेन व्यवस्थापिता। परिशीलनीयाः तत्र च इमे श्लोकाः–नादस्य कमजन्मत्वाद् न पूर्वो नापरश्च सः (48), स्फोटस्याभिन्नकालस्य (75) ध्वन्यः स्फोटात्मा तैर्न भिद्यते (77) स्फोटरुपाविभागेन ध्वनेर्ग्रहणमिष्यते (81), अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता (93) स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरूदाहृताः (102) इति।

शब्दोऽयं मीमांसकानां नित्यशब्दो मतः पूर्वमेव। ततोऽपि पूर्वं 'वायुस्फोटाः सनिर्घाताः (3, 43, 5) इत्यत्र महाभारते स्फोटशब्दो जनकतया प्रकाशतया वा प्रसिद्धोऽभूत्। हरिवंशपुराणे तु स्फुटं स्फोटस्य वर्णसंश्रयत्वमभ्युपगतम्–"अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रयः" (हरिवंश-भविष्यपर्वणि 16, 52) इति। एवमेव श्रीमद्भागवते (10, 85, 9; 12, 6, 37, 40) स्फोट-स्वरूपमालोचनीयम्–

**दिशां त्वमवकाशोऽसि दिशः खं स्फोट आश्रयः।**

**नादो वर्णस्त्वमोङ्कार आकृतीनां पृथक्कृतिः॥**

**समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः।**
**हृद्यानाशादभून्नादो वृत्तिरोधाद् विभाव्यते॥**

**शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक्।**
**येन वाग् व्यज्यते यस्य व्यक्तिराकाश आत्मनः॥** इति॥

शोधच्छात्रः, काशी हिन्दू वि.विद्यालयः, वाराणसी

✦✦✦

**Shri Vaishnavi 2017** **ISSN : 7552277-906X**

# काव्यतत्त्वेषु अलङ्कारः

**–राहुल लोधा**

काव्यसौन्दर्याभिवर्धकानामलङ्काराणामध्ययनं विश्लेषणञ्च भारतीय-काव्यशास्त्रीयचिन्तनस्य प्रमुखमङ्गमस्ति। काव्यतत्त्वेषु काव्यालङ्कारः न केवलमलङ्कारप्रस्थाने अपितु अलङ्कारेतरप्रस्थानेष्वपि महत्वपूर्णः अस्ति।

अलङ्ककारः नैव काव्यस्य अपितु लोक-जीवनस्यापि सौन्दर्यधायकः वर्तते। वाण्याः अलङ्काराः मानवस्य सहजप्रवृत्या रुच्या वा आविर्भूताः सन्ति। लोक-जनजीवने नानाविध-अलङ्कारैः स्वकीयकथनस्य सौन्दर्याधानं प्रभावोत्पादनञ्च दृश्यते। काव्यजगत्यपि काव्यस्य उक्तिषु चमत्कारार्थं प्रभावोत्पादनार्थञ्च अलङ्कारः प्रयुज्यते।

लोक-व्यवहारे प्रयुक्ताः अनलङ्कृताः शब्दार्थाः अलङ्कारेण संयुज्य काव्यपदवीम् अलङ्कुर्वन्ति।

**यानेव शब्दान्वयमालपामो यानेव चार्थान्वयमुल्लिखामः।**
**तैरेव विन्यासविशेषभव्यैः संमोहयन्ते कवयो जगन्ति॥**

–नीलकण्ठदीक्षीतः, शिवलीलार्णवः 1, 3

रीतिसंप्रदायस्य प्रबलप्रतिष्ठाता आचार्यवामनद्वारा औपम्यमूलकालङ्काराणां स्वरूपविवेचनं कृतमस्ति। तेषाम्मते अलङ्कारः सौन्दर्यस्य पर्यायोऽस्ति।

**सौन्दर्यमलङ्कारः।** –वामनः, काव्यालङ्कारसूत्रवृत्ति 1, 1, 2

अलङ्कार शब्दस्य प्रयोगः द्वयोः अर्थयोः भवति। द्वावेव अर्थौ अलङ्कारशब्दस्य भिन्न-भिन्न व्युत्पत्या उपलभ्यते। "**अलङ्कृतिरलङ्कारः**" अर्थात् भूषणस्य शोभायाः वा भावः।

(अलम्+कृ+क्तिन्=अलङ्कृतिः) (अलम्+कृ+घञ्=अलङ्कारः)

अर्थेस्मिन् अलङ्कारः सौन्दर्यादभिन्नः अस्ति। अस्मिन्नेवार्थे आचार्य-वामनेन सौन्दर्यमलङ्कारः इति उक्त्वा अलङ्कारयुक्तं काव्यं ग्राह्यम् अलङ्कारहीनम् असुन्दरम्वा काव्यम् अग्राह्यम्। इति कथितः।

**काव्यं ग्राह्यमलङ्कारात्।** - वामनः, काव्यालङ्कारसूत्रवृत्ति 1, 1, 1

अस्मिन् अर्थे कवेः समस्त-उक्तीनां सौन्दर्यम् अलङ्कारः अस्ति। काव्यस्य यानि तत्त्वानि काव्ये शोभायाः आधानं कुर्वन्ति, तानि अलङ्कारस्य व्यापकार्थे तस्याङ्गानि सन्ति। गुणालङ्कारयोः सद्भावेन दोषाभावेन च काव्ये सौन्दर्यत्वं समायाति। अतः विशिष्टार्थे शब्दार्थस्य गुणादयः काव्यसौन्दर्यस्य पर्यायभूतालङ्कारस्य साधकमात्रमस्ति। इति प्रथमोऽर्थः।

यस्मिन् अर्थे शब्दार्थयोः अनुप्रासोपमादयः अलङ्कारः कथ्यते, स अर्थः करणव्युत्पत्या समुपलभ्यते।

अर्थात् इदं तत्त्वं काव्यसौन्दर्यस्य साधनमस्ति। एवम्प्रकारेण काव्यशास्त्रे अलङ्कारस्य भावकरणौ द्वौ अर्थौ प्राप्येते। भारतीयसाहित्यशास्त्रे यादृशी व्यापकता अलङ्कारस्यास्ति तादृशी कस्यापि काव्यतत्त्वस्य नास्ति। विभिन्नैः काव्यतत्त्वविश्लेषणकर्तृभिः आचार्यैः स्वकीये ग्रन्थे काव्यालङ्काराणां विवेचनं कृतमस्ति।

यथा-

ध्वनिवादी आचार्यः आनन्दवर्धनः अपृथग्यत्ननिर्वर्त्य-अलङ्काराणां ध्वनिकाव्ये उपादेयत्वं मन्यन्ते। वक्रोक्तिवादी कुन्तकेन अलङ्काराणां स्वरूपनिरुपणं कृतम् एवञ्च अलङ्कार-अलङ्कार्ययोः भेदाभेदविषये सूक्ष्मविवेचनमपि कृतम्। रससिद्धान्तस्य प्रवर्तकस्य आचार्यभरतस्य कालादारभ्य विश्वनाथादि रसवादी आचार्याणां कालपर्यन्तं तेषां रचनासु अलङ्काराणां स्वरूपविश्लेषणं प्राप्यते। अलङ्कारवादी आचार्यः जयदेवः अलङ्कारहीना काव्यत्वकल्पना शीतल-अनलकल्पनावत् मन्यते।

भावाभिव्यक्तौ सहजभावेन समाविष्टः अलङ्कारः भावव्यञ्जनां पुष्टं करोति अथवा संबलितं करोति। अतः अलङ्कारः बाह्यः धर्मः, इति मन्तव्यम्। रसव्यञ्जनया सह सहजभावेन समाविष्टः अलङ्कारः अपृथग्यत्ननिर्वर्त्यः अलङ्कारः कथ्यते इति ध्वनिकारस्य मतम्। एतादृशाः अपृथग्यत्ननिर्वर्त्य-अलङ्कारः ध्वनिकाव्ये ग्राह्याः। कुत्रचित् काव्ये उक्तिभङ्गिद्वारा पाठकस्य हृदये चमत्कारार्थं कविना सायासेन अलङ्कार-योजना क्रियते। एतादृशाः अलङ्काराः पृथग्यत्न-निर्वर्त्यालङ्काराः भवन्ति तथा च ध्वनिकाव्ये अग्राह्याः भवन्ति।

**रसाक्षिप्ततया यस्य बन्धश्शक्यक्रियो भवेत्।**
**अपृथग्यत्ननिर्वर्त्यः सोलङ्कारो ध्वनौ मतः॥** -ध्वन्यालोकः, 39

अलङ्कारः वाच्योपस्कारकत्वात् काव्यस्य शरीरं वर्तते। किन्तु कदाचित् काव्ये अलङ्कारः शरीरी अपि भवति। यदा अलङ्कारः वाच्यः तदा शरीरं, किन्तु व्यङ्ग्ये सति शरीरी पदं प्राप्नोति।

**शरीरीकरणं येषां वाच्यत्वेन व्यवस्थितम्।**
**तेऽलङ्काराः परां छायां यान्ति ध्वन्यङ्गतां गताः॥** –ध्वन्यालोकः, 51

"एतदुक्तं भवति–

सुकविः विदग्धपुरन्ध्रीवत् भूषणं यद्यपि श्लिष्टं योजयति, तथापि शरीरतापत्तिरेवास्य कष्टसंपाद्या, कुङ् कुमपीतिकाया इव।" इति लोचने।

निष्कर्षतः आनन्दवर्धनः अपृथग्यत्ननिर्वर्त्यालङ्कारं भावाभिव्यक्तेः सहजातधर्मत्वात् काव्यस्य अन्तरङ्गधर्मः स्वीक्रियते।

साहित्यशोधच्छात्रः, श्रीरणवीरपरिसरः, जम्मूः

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# वर्तमानसन्दर्भे श्रीमद्भगवद्गीतायाः महत्त्वमुपादेयता च

–चेतनकुमारः

**गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता॥**

**गीतायाः महत्त्वम्–**

महाभारतस्य भीष्मपर्वणि भगवतः श्रीकृष्णस्यार्जुनं प्रति ज्ञानकर्मभक्तिसमन्वितं सप्त-शतश्लोकात्मकं सर्वोपनिषदां सारः मधुरं सुललितञ्च गीतमेकं श्रीमद्भगवद्गीता। महाभारतस्य युद्धकाले शोकाकुलोऽर्जुनस्य कर्त्तव्यनिष्ठताबोधको भगवतो वचनमस्ति भगवद्गीता। अस्माभिः मनुष्यजीवने किं कर्त्तव्यम्, किमकर्त्तव्यम् एतादृशः कर्त्तव्यपथप्रदर्शकोऽस्ति ग्रन्थोऽयम्।

वस्तुतः पञ्चसहस्रवर्षपूर्वं द्वापरान्ते कुरूक्षेत्रे श्रीकृष्णस्यार्जुनं प्रत्युपदेशः तस्य ज्ञान चक्षून्मिलनार्थं गुरोपदिष्टवाक्यमासीत्। तदेव साम्प्रतिके युगेऽपि मानवमात्रस्याज्ञानान्धकारनाशकत्वेन

गीताशास्त्रस्योपगिता दरीदृश्यते। आध्यात्मिकदृष्टया अपि जीवस्य पारमर्थिकज्ञानाय गुरोरावश्यकता भवत्येव तदेव भगवद्गीतायाभर्जुनो गुरोः कृष्णस्य शिष्यत्वं स्वीकृत्य गोवत्सवद्गीतामृत[1] पानं कृत्वा मोहरूपी संसारजलधिं तरितवान्। यतोहि ज्ञानाय शरणागति आवश्यकी। यथा–

**कार्पव्यदोषोपहतस्वभावः,**
**पृच्छामि त्वं धर्मसम्मूढचेताः।**
**यच्छ्रेय स्यान्निश्चितं ब्रूहि तन्मे,**
**शिष्यस्तेऽहं शधि मां त्वां प्रपन्नम्।।2/7**

श्रीमद्भगवद्गीतायां कर्मयोगः, भक्तियोगः तथा च ज्ञानयोग एतेषां त्रयाणां समन्वयः प्राप्यन्ते। कर्मयोगेन स्वकर्त्तव्यनिष्ठा तथा च निष्कामभावेन कर्मं कृत्वा फलाकाङ्क्षाभावस्य संकल्पना वर्तते। केवलं कर्मणि एवास्माकमधिकारः न तु फले।[2] शास्त्रमिदं पथप्रर्दशकत्वेन अस्मानग्रे सारयति। यथा–

**अकीर्तिं चापि भूतानि**
**कथयिष्यन्ति तेऽव्ययाम्।**
**सम्भावितस्य चाकीर्ति-**
**र्भरणादतिरिच्यते।।2/34**

यतोहि "न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत"[3] इति वचनानुसारेण कर्मं तु भवत्येव परं तस्य कर्मणः निष्कामभावनया भगवदर्पणम् ईश्वरप्रणिधानमुच्यते। उक्तमपि–

**यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।**
**यत्तपस्यसि कौन्तेय तत्कुरूष्व मदर्पणम्।।**

निष्कामकर्मणः सन्देशः तथा च जीवनस्य प्रत्येकपरिस्थितिषु समानतायाः भावः सुखदुःखे, मानापमानौ, लाभालाभौ, जयाजयौ, शीतोष्णौ एव गीतादर्शनम्।[4] क्रोधादि शत्रून् विजित्य सन्मार्गं प्रति गमनमेव गीताया उपदेशः।

भगवद्गीतायां कर्मः, अकर्मः, विकर्मणः चर्चाऽपि 'गहना कर्मणो गतिः' इत्यनेन सिद्धयति। यच्च कर्मणा सह अकर्मणः, विकर्मणः ज्ञानमपि आवश्यकम्। उक्तमपि–

**कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।**
**स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत्।।4/18**

त्यागस्य भावना, निष्कामकर्म, इन्द्रियसंयमद्वाराक्रामकोधादिशत्रुजयः तथा परोपकारादि विषयवर्णनमपि ग्रन्थेऽस्मिन्प्राप्यते।

ज्ञानेन स्वस्वरूपज्ञानं, संचितक्रियमाणादिकर्माणां नाशः, आत्मसाक्षात्कारः च सम्भवति। यथा उक्तमपि–

**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।**
**तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति।।4/38**

सत्वरजतमस्वरूपा भवति प्रकृतिः। प्रकृतेः गुणानां मनुष्यजीवने, तस्य कर्माणां तथा च कर्मफलानां प्रभावः प्रभवति। सात्विक, राजसिक, तामसिक प्रकृत्याः जनाः भिन्नं-भिन्नं कार्यं कुर्वन्ति तेषामपि फलनिरूपणंमत्र विद्यते। अक्षरब्रह्म, परब्रह्मणः निरूपणं स्पष्टतया प्रतिपादितम्-

**अक्षरं ब्रह्म परमं स्वभावोऽध्यात्मुच्यते।**
**भूतभावोद्भवकरो विसर्गः कर्मसञ्ज्ञितः।।8/3**

कर्मज्ञानभक्तिसमुच्चयेन संन्यासस्य प्रतिपादनमपि कृतः। कर्मफलस्य त्यागः, कृतकर्माणां न्यासः एव सन्यासः।[5] श्रेष्ठ कर्मण आचरणं तथा स्वधर्मपरायणता एव गीतायाः मुख्योद्देश्यः।

**श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।**
**स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्।।18/47**

**आधुनिककाले उपयोगिता-**

* मनुष्यजीवने कर्त्तव्यमकर्त्तव्यस्य सम्यक्ज्ञानं गीतायाः माध्यमेन भवितुं शक्यते। यतोहि, कर्म, अकर्म, विकर्मणः चर्चा अत्रोपलभ्यते।
* कर्त्तव्यनिष्ठापूर्वकस्वकर्मणः निर्वाहः तथा च निष्कामभावनया कर्मणः सम्पादनं गीतायाः सारः। साम्प्रतिके काले उत्कोचादिघटनानां वृद्धिप्रायः दृश्यते यदि निष्काम-भावेन कर्त्तव्यनिष्ठया कर्मं क्रियते चेत् एतादृशी समस्यानां समाधानं भविष्यति।
* क्रोधादिशत्रुणां जयं कृत्वा सन्मार्गं प्रति गमनं आवश्यकम्। क्रोधः केवलं आवेगो वर्तते रजोगुणसमुद्भवेन क्रोधः जायते परमाऽऽत्मसंयमेन शत्रुणां जयः सम्भवति। यथा-

**काम एष क्रोध एष रजोगुणसमुद्भवः।**
**महाशनो महापाप्मा विद्धयेनीमह वैरिणम्।।3/37**

* यज्ञनिष्पादनकर्मणः त्यागभावनया उद्भवः। यथा यज्ञकर्मणि 'इदमग्नये न मम' इत्यादि वचांसि त्यागभावप्रतीकाः तथैव अस्माकमाचरणे, व्यवहारे त्यागभावनायाः प्रादुर्भावः समेषां प्राणिनां सौहार्ददृष्टया व्यवहार भवेत्। यथा-

**यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्विषैः।**
**भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्।।3/13**

**अन्नाद्भवन्ति भूतानि सर्जन्यदन्नसम्भवः।**
**यज्ञाद्भवति पर्जन्यो यज्ञः कर्म समुद्भवः।।3/14**

ज्ञानेन आत्मकल्याणः, समाजस्यकल्याणः तथा च भक्त्या समाजस्य प्रत्येकवर्गं प्रति दयाप्रेमभावनायाः भावः भवति।

वस्तुतः गीता न केवलं शास्त्रमपितु जीवनदर्शनम् वर्तते। जीवनस्य प्रत्येक अवस्थासु गीतायाः ज्ञानं अस्मान् सन्मार्गं प्रेरयति। तज्ज्ञानं कर्मणा, भक्त्या सह प्रयोज्य वयं जीवनस्य चरमोत्कर्षं प्राप्तुं शक्नुमः। तथैव उक्तम्–

**यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।**
**तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥18/78**

**पादटिप्पणी–**

1. सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
   पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥
2. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन॥2/47
3. भगवद्गीता 3/5
4. सुखदुखे समे कृत्वा–
5. काम्यानां कर्मणां न्यासं सन्यासं कवयो विदुः।
   सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥18/2

शोधच्छात्रः, सर्वदर्शनविभागः, श्रीरणवीरपरिसरः, जम्मूः

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# शब्दार्थसम्बन्धविचारः

–अनमोलशर्मा

**या स्मर्यमाणा श्रेयांसि सूते ध्वंसयते रूजः।**
**तामभीष्टफलोदारकल्पवल्लीं स्तुवे शिवाम्॥**

अर्थबोधाय शब्दप्रयोगः परं शब्देनैव नैव निराकाङ्क्षबोधः, निराकाङ्क्षबोधस्तु वाक्यादेव यदुक्तं "[1]तत्र वाक्यस्फोटो मुख्यस्तस्यैव लोकेऽर्थबोधकत्वात्तेनैवार्थसमाप्तेश्च" ततश्च 'शब्द' इति पदं वाक्यपरं तदेव अस्माकं ब्रह्म यदुक्तं भर्तृहरिणा–

**[2]अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥**

तस्य च शब्दस्यार्थः शब्दार्थस्तयोः सम्बन्धः शब्दार्थसम्बन्धः स च वाच्यवचकभावरूपः अनादिश्च यदुक्तं व्याडिना सङ्ग्रहे।[3]

**सम्बन्धस्य न कर्तास्ति शब्दानां लोकवेदयोः।**
**शब्दैरेव हि शब्दानां सम्बन्धः स्यात् कृतः कथम्॥**

अतः शब्दार्थसम्बन्धस्याकर्तृकत्वाद् सोऽनादिरेव। भर्तृहरिणामि पदकाण्डस्य सम्बन्ध-समुद्देशे गदितं-

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा॥**

वाच्यवाचकभावरूपः सम्बन्धरेव शक्तिः, तस्याः शक्तेर्ग्राहकञ्च 'इतरेतराध्यासमूलकं तादात्म्यम्' वस्तुतस्तदेव सम्बन्धः शक्तिश्च। यतो हि शक्तिः सम्बन्धं विना कार्यकर्तुं नोत्सहते यथा प्रदीपे प्रकाशकत्वशक्तिः सत्त्वेऽपि न वस्तुसंसर्गं विना प्रकाशकत्वशक्तेर्जानं तथैव तादात्म्यसम्बन्धं विना वाच्यवाचकभावरूपायाः शक्तेः ज्ञानं यदुक्तं-

**[4]उपकार स यत्रास्ति धर्मस्तत्रानुगम्यते।**
**शक्तीनामप्यसौ शक्तिः गुणानामप्यसौ गुणः॥**

तादात्म्यञ्च 'तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्'। इत्थं शब्दार्थयोस्तादात्म्यमेन सम्बन्धः, तादात्म्यादेव 'श्लोकमश्रृणोदथार्थं श्रृणोति', 'अर्थं वदति', 'रामेति द्वयक्षरं नाम मानभङ्ग पिनाकिनः' इत्यादयः प्रयोगा भवन्ति। तादात्म्ये वस्तुतो भेदस्य सत्त्वात् न मधुशब्दो-च्चारणे माधुर्यरसास्वादापत्ति न वा वह्निशब्दोच्चारणे मुखे दाहकत्वापत्तिः। नागोजिभट्टः परमलघुमञ्जूषायां ब्रवीति "वस्तुतो बौद्ध एवार्थः शक्यः पदमपि स्फोटात्मकं प्रसिद्धं तयोस्तादा-त्म्यम्। तत्र बौद्धे वह्नयादावर्थे दाहादिशक्तिमत्त्वाभावात्"। इति।

साहित्यशास्त्रे तु वस्तुतो बौद्धार्थस्यैव सत्ता दृश्यते यदुक्तं रसगङ्गाधरे द्वितीयानेन पण्डितराजजगन्नाथेन-

"ननु 'त्वयि कोऽयो ममाभाति सुधाशाविव पावकः' इत्यत्रोपमानस्यात्यन्तासत्त्वात् न सादृश्यं, चमत्कारस्तु कथं स्यात्।" इति। स्वयमेव शङ्कां निराकरोति कविः खण्डशः पदार्थयोः सुधाशुपावकयोः उपस्थितिं करोति तदनन्तरं तयोरन्वयं बुद्धौ परिकल्प्य काव्ये चन्द्राधिकरणकं पावकं नायिकाधिकरणकस्य कोपस्य उपमानत्वेन वर्णयति। अत एव-

**[5]स्तानाभोगे पतन्भाति कपोलात्कुटिलोऽलकः।**
**शशाङ्कबिम्बतो मेरौ लम्बमान इवोरगः॥**

इत्यादयः प्रयोगा भवन्ति। इत्थं शब्दः स्फोटात्मकः तदर्थश्च बौद्धात्मकः तयोः सम्बन्धश्च वाच्यवाचकभावरूपः तादात्म्यरूपो वा नित्य एव, यदुक्तं–

"[6]सिद्धे शब्दार्थसम्बन्धे' इति। तथा भाष्येऽपि '[7]नित्यपर्यायवाची सिद्धशब्दः। यत्कूटस्थेषु अविचालिषु भावेषु वर्तते। तद्यथा–सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशमिति।' इति। भर्तृहरिणापि उक्तं–

**[8]नित्याः शब्दार्थसम्बन्धाः तत्राम्नाता महर्षिभिः।**
**सूत्राणां सानुतन्त्राणां भाटयाणाञ्च प्रणेतृभिः॥**

किम्बहुना पदमस्ति शक्तिमत् तत्र शक्तिश्च वाच्यवाचकभावरूपा, सा च तत्र (पदे) भवत्येव न तु तद् व्यतिरिक्ता। यथा शिवः न शक्तिः रहितः, हिमं न शैत्यरहितं, वह्निश्च न उष्णत्वरहितः तथैव पदमपि शक्तिरहितं (वाच्यवाचकभावरहितं) न। यदुक्तं–

**[9]अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते।**

इति शब्दार्थसम्बन्धविवेकमर्शः।

**सन्दर्भः**

1. वैयाकरणसिद्धान्त परमलघुमञ्जूषायां शक्तिनिरूपणे।
2. ब्रह्मकाण्डे वाक्यपदीये।
3. लक्षश्लोकात्मको ग्रन्थविशेषः।
4. वाक्यपदीये।
5. रसगङ्गाधरस्य द्वितीयानने उपमालङ्कारनिरूपणे।
6. कात्यायनस्य प्रथम वार्तिकः "सिद्धे शब्दार्थसम्बन्धेलोकतोऽर्थप्रयुक्ते शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु।
7. महाभाष्ये पश्पशाह्निके।
8. वाक्यपदीये ब्रह्मकाण्डे।
9. वाक्यपदीये ब्रह्मकाण्डे।

शोधच्छात्रः, रणवीरपरिसरः, जम्मू

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# शैक्षिकप्रबन्धनम्

–असीमकुमारपाठकः

शिक्षा मानवजीवनस्य एकं महत्वपूर्णमङ्गमस्ति, यतः मानवः जन्मादारभ्य मृत्युपर्यन्तं स्वसामर्थ्यानुसारम् अन्वेषणं नवनवोन्मेषज्ञानार्थं निरन्तरप्रयासरतो भूत्वा ज्ञानमाप्नोति। शिक्षा स्वयमेव ज्ञानसागरं वर्तते। समुद्रवत् ज्ञानस्य सूक्ष्मतथ्यानां ज्ञानमत्यन्तरहस्यपूर्णं वर्तते। यस्य अन्वेषणं सर्वदा काठिन्यमनुभूयते। तथैव शिक्षयाः सीमा निर्धारयितुं न कोऽपि समर्थः। अत एव मानवः संसारे व्याप्तसर्वशिक्षां न प्राप्तुं शक्नोति। मानवः सर्वदा आवश्यकतानुगुणं ज्ञानार्जनं करोति।

शिक्षायाः प्रमुखोद्देश्यं वर्तते, यत् मानवे राष्ट्रं प्रति, राष्ट्रकार्यं प्रति, गृहं प्रति एवं संसारे व्याप्तं सम्पूर्णं समाजं प्रति प्रेमभावना, सहृदयता, ममभावः, एवं सर्वोत्तममं व्यक्तित्वस्य निर्माणम् वर्तते। प्रत्येकमानवः राष्ट्रस्य उत्तमः नागरिकः वर्तते, अतः स्वोत्तमाचरणद्वारा मानवस्य दायित्वं वर्तते, यत् सः उत्तमराष्ट्रस्य निर्माणार्थं बालकेभ्यः उत्तमशिक्षा एवम् उत्तममार्गदर्शने उत्तमप्रेरणा प्रदानम् एव करणीयम् इति शिक्षायाः प्रमुखोद्देश्यम् वर्तते। उत्तमशिक्षायै उत्तमप्रबन्ध नस्य आवश्यकता अनुभूयते। अत एव वक्तुं शक्यते यत् शैक्षिकप्रबन्धनमेकं शिक्षायाः प्रकृष्टं बन्धनं नियमं समायोजनमेव शैक्षिकप्रबन्धनमिति उच्यते। शिक्षायाः सन्दर्भे शैक्षिकप्रबन्धनस्य अर्थः व्यापकः दरीदृश्यते। यस्मिन् सुव्यवस्थित एवं सुयोग्यप्रशासनद्वारा निर्धारितानां नीतिणां तथा च सम्पूर्णयोजनानाम् उद्देश्यानां साफल्यार्थं निर्विघ्नतया स्वलक्ष्यप्राप्त्यर्थं च यत् किमपि कार्यं क्रियते तत्सर्वं शैक्षिकप्रबन्धनस्यान्तर्गतं भवति। अत एव निष्कर्षतः वक्तुं शक्यते। यत् शिक्षायाः सुसञ्चालनार्थं सुव्यवस्थापनं सुनियोजनं, उपकरणम् एवं भौतिकसंसाधनं मानवसंसाधनमित्यस्य निर्धारणं तथा च क्षेत्रम् एवं लक्ष्यविशेषस्य यं प्रबन्धनं क्रियते तत्सर्वं शैक्षिकप्रबन्धनमित्युच्यते।

सर्वकारेण अथवा प्रशासनेन निर्धारितानां सद्विचाराणां नीतिणां च माध्यमेन समस्त–विद्यालयानां महाविद्यालयानां, विश्वविद्यालयानां, शोधसंस्थानानां एवं प्रायोगिकसंस्थानानां एवं विविधस्तस्य शिक्षणसंस्थानानां च सार्वभौमिकं एवं सुव्यवस्थितरूपेण सञ्चालनार्थम् एवं विविधपाठ्यक्रमस्य स्तरानुगुणं निर्माणार्थं विकासार्थं एवं समस्याणां निदानार्थं प्रबन्धनस्य आवश्यकता भवति। बालकानां सर्वाङ्गिणविकासाय सम्पूर्ण– कौशलस्य विकासाय शैक्षिकप्रबन्ध नं सहायताप्रदानं करोति।

शैक्षिकप्रबन्धनद्वारा प्रशासनेन वा सुव्यवस्थितरूपेण समयनिर्धारणं कुर्वन् स्वोद्देश्यानुसारं कार्यसम्पादनं तथा च बालकानां सर्वाङ्गिणविकासः कर्तुं शक्यते। प्रबन्धनं शिक्षासंस्थानेन

सम्बद्धं भवति। अनेन सकुशलतापूर्वककार्ये सौविद्ध्यमायाति। अनेन प्रबन्धनेन समानकार्य-विभाजनद्वारा सर्वेषां समानरूपेण दायित्वपूर्तये समानः अवसरः प्राप्यते। शैक्षिकप्रबन्धनस्य प्रमुखोद्देश्यं मानवानां एवं मानवनिर्मितसंसाधनानां समुचितप्रयोगः, समायोजनं, व्यवस्थापनं तथा च सम्पूर्णकार्ये सौविद्ध्यार्थं समानावसरप्रदानम् इति।

अनुक्रमाङ्कः-50, शिक्षाशास्त्रीप्रथमवर्षम्

✦✦✦

Shri Vaishnavi 2017 ISSN : 7552277-906X

# उपनिषदां महत्त्वम्

-प्रतिमा बेहरा

उपनिषदशब्दस्यार्थः वेदस्य शाखाः ब्राह्मणग्रन्थाः शाखारवारण्यकानि पुष्पाणि, उपनिषद-स्तेषां पुष्पाणां सुगन्धति। वेदस्य अन्तिमभाग एव उपनिषत, तस्मादेतद् "वेदान्त" इति कथ्यते आचार्यशङ्करमतानुसारं "ब्रह्मविद्या" एवोपनिषद्। उप(समीपे) नि(निश्चये) सद्(स्थानम्) (क्विप्) अर्थात् उप,नि उपसर्गद्वयं पूर्वकात् विशरण-गत्यवसादनार्थकम् षद्ळ (सद्) धातोः क्विपि उपनिषदशब्दस्य निष्पत्तिर्भवति। तत्वज्ञानार्थ गुरोः समीपे सविनयं स्थितिः उपनिषद इत्युच्यते। उपनिषद् शब्दसु वेदान्तशब्देन पराविद्याशब्देन वा अभिधीयते वेदान्तो नाम "उपनिषत् प्रमाणम्", आचार्यवरः शंकरःप्राह-'उप' शब्दो सामीप्यमाह, निशब्दश्च निश्चयार्थः, तस्मादैकात्म्यं निश्चितम्। सा विद्या सहेतुं संसारं सादयतीति उपनिषदुच्यते-1. अविद्यानाशनम्, 2. दुःखनिरोधम्, (3) ब्रह्मप्राप्तिञ्च इत्यर्थत्रयमुपनिषद् शब्दस्य रहस्यार्थः वर्तते। अतः श्रीमद्भगवद्गीता द्वितीयं अध्याये उल्लेखं अस्ति-

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।**
**पार्थो वत्सः सुधोर्भोक्ता दुग्धं गीतामृतं महत्॥**

उपनिषदां संख्याः-वस्तुतः अनेकाः उपनिषदः सन्ति। मुक्तिकोपनिषदि उपनिषदां संख्या 108 भवति। यत्र ऋग्वेदेन सह 10 उपनिषद्, शुक्लयजुर्वेदेन 19 उपनिषद्, कृष्णयजुर्वेदेन 12 उपनिषदः, सामवेदेन 16 उपनिषदः, अथर्ववेदेन 31 उपनिषदः, सम्बन्धिताः

भवन्ति। यद्यपि शताधिका: उपनिषद्ग्रन्था: वर्तन्ते तथापि उपनिषदां विषये एकादशसंख्या अतीव महत्वपूर्णं अस्ति यथोक्तम्–

**ईश-केन-कठ-प्रश्न-मुण्ड-मण्डूक्य-तित्तिर:।**
**ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश।।**

1. ईशावास्योपनिषद:–शुक्लयजुर्वेदसंहिताया: चत्वारिंशत्तमोऽध्याय: ईशावास्यमिदं सर्वम् इति मन्त्रेण प्रारभ्यते; अत: अध्यायोऽयम् ईशावास्योपनिषद इत्युच्यते।

2. प्रश्नोपनिषद:–अथर्ववेदस्य पिप्पलादशाखाया: उपनिषदियं प्रश्नानां समप्तिकारणाम् प्रश्नोपनिषद् इत्युच्यते।

3. केनोपनिषद:–केनेषितं पतति प्रेषितं मन: इति मन्त्रेण प्रारम्भ्यते इयमुपनिषद् अस्यामुपनिषदि चत्वार: खण्डा: सन्ति। प्रथमखण्डे अष्टौ मन्त्रा: द्वितीयखण्डे पञ्चमन्त्रा तृतीयखण्डे द्वादशमन्त्रा: तथा चतुर्थे खण्डे नवमन्त्रा: समुपलभ्यन्ते। अस्या: उपनिषद् सर्वत्र परमात्मन: शक्तिरनुसन्धेया मुमुक्षुभि: इति सारांश:।

4. तैत्तिरीयो:–तैत्तिरीयारण्यकस्य सप्तम-अष्टम-नवमखण्डानां सम्मिलितमभिधानं तैत्तिरीयोपनिषद् इति वर्त्तते। अस्मात् उपनिषदि तिस्रो वल्लयो भवन्ति-शिक्षावल्ली भृगुवल्ली आनन्दवल्ली च।

**यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति,**
**यत् प्रयन्त्यभिसंविशन्ति, तद्विविजिज्ञासख तद्ब्रह्म इति।**

5. कठोपनिषद:–कृष्णयजुर्वेदस्य कठशाखासम्बन्धे अस्याम उपनिषदि द्वौ अध्यायौ स्त:। प्रत्याध्यायं तिस्र: तिस्रो वल्लय: सन्ति। नचिकेतोपाख्यानम् अत्र अतीव प्रसिद्धामस्ति।

नचिकेता आह–

**श्वोभावा मर्त्यस्य यदन्तकेतत् सर्वेन्द्रियाणां जरयन्ति तेन:।**
**अपि सर्व जीवितमल्पमेव, तदैव वाहास्तव नृत्यगीतं।।**

6. छान्दोग्योपनिषद्:–सामवेदस्य ताण्ड्यशाखाया: अष्टम: प्रपाठक: एव छान्दोग्योपनिषत्-शब्देन अभिधीयते। मधुविद्या-पुरूषविद्या-अग्निविद्या-प्राणविद्या-वैश्वानरविद्या-भूमविद्या -आत्मविद्या-प्रभृतीनां विद्यानां वर्णनम् अस्यामेव उपनिषदि समुपलभ्यते।

7. बृहदारण्यकोपनिषद्–इयं बृहदारण्यकोपनिषद् न केवलं तत्त्वज्ञानदृष्टया अतीव प्रमाणिकी वर्तते, अपि तु आकारदृष्टयापि अतीवविशालास्ति षडध्याय-समन्वितेऽस्मिन् उपनिषद्ग्रन्थे याज्ञवल्क्यस्य ब्रह्मविषयकं तत्त्वज्ञानमतीव विस्तरेण निरूपितमस्ति।

8. ऐतरेयोपनिषद्–ऐतरेयारण्यकस्य चतुर्थादध्यायात षष्ठाध्यायापर्यन्तस्यनामैतरेयोपनिषद वर्तते। अस्यामुपनिषदि त्रय अध्याया: सन्ति।

9. मुण्डकोपनिषद्–इयमुपनिषत अथर्ववेदीया वर्तते। इयं मुण्डकनिमित्ताय निर्मिताऽस्ति। अस्यामेवोपनिषद् आयाति–

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते**
**तयोरन्यः पिप्पलं स्वाद्वत्ति अनशनन् चान्यः अभिचाकशीति।**

(श्वेता. 4/6)

10. माण्डूक्योपनिषद्–इयमुपनिषदतीव लघ्वो वत्तते, परन्तु विषयोऽस्य वैशाल्यं नूनं बिर्भति। अस्यामुपनिषदि केवलं द्वादश वाक्यानि सन्ति।

11. श्वेताश्वतरोपनिषद्–इयमुपनिषद् कृष्णयजुर्वेदीया वर्तते। अस्यामुपनिषदि षडध्यायाः सन्ति। अस्यामुपनिषदि जीवतत्त्वस्य, ब्रह्मतत्त्वस्य प्रकृतितत्त्वस्य च वर्णनं सविस्तरं समुपलभ्यते। उपनिषद् वाक्यमहाकोश 18। एकाशीत्युत्तरशतोपनिषदां वाक्यानि संमूहोतानि सन्ति।

## उपनिषदां महत्त्वम्–

उपनिषदां प्रधानमेव प्रतिपाद्यो विषयोऽस्ति आत्मा। संहितातः आरण्यकं यावत् तद्ब्रह्म आत्मनो भिन्नमित्यनेन रूपेण प्रतिपादितमस्ति। उपनिषदां महत्त्वं न केवलं भारतीयै, अपितु पाश्चात्त्यैरपि मनीषिभिर्निर्विवादम् उररीक्रियते। उपनिषत्सु काश्चन उपनिषद नद्यात्मिकाः काश्चन गद्यात्मिकाः काश्चन गद्यपद्यात्मिका वर्त्तन्ते। उपनिषदो हि भवब्धिसंतारिका, आधि-व्याधि-संतप्त-मानस-संतर्पिका, मायापोहनिबद्धजीवाधिविनाशकाः, अभ्युदय-निःश्रेयसावाप्ति-हेतवश्च सन्ति। उपनिषदो भारतीयाध्यात्मविद्याया ज्वलन्ति अन्यत्र वर्णितानि सन्ति। सवैः अपि मनीषिभिः, धर्मप्रवर्तकैः तत्त्वज्ञैः आचारशिक्षकैः, धर्मशास्त्रकारैः च उपनिषदां महत्त्वं स्वीयदृष्ट्या स्वीक्रियते। उपनिषदत्सु दर्शनानां सर्वेषामपि बीजानि निहितानि सन्ति।

